ISSN: 2320-740X

# शारदा

अङ्कः - 19, 2024-25

A Peer-reviewed research journal



केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः

श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्

श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - ५७७१३९

ISSN: 2320-740X

# शारदा

अङ्कः - 19, 2024-25
A Peer-reviewed research journal

**संरक्षकः**
आचार्यः श्रीनिवास वरखेडी

**प्रधानसम्पादकः**
आचार्यः सुब्राय वि. भट्टः

**सम्पादकाः**
आचार्यः चन्द्रशेखरभट्टः
आचार्यः राघवेन्द्रभट्टः
डा. विश्वनाथहेगडे
डा. राघवेन्द्रः पी. आरोल्ली

**सहसम्पादकौ**
डा. रवीशः एन्.
डा. उमेशकुमारपर्वतः

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
संसदः अधिनियमेन स्थापितः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
**श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्**
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - ५७७१३९

| | | |
|---|---|---|
| Title | : | Śāradā |
| Publisher | : | Director<br>Central Sanskrit University<br>Shri Bharathi Teertha Center for Excellence in Shastras<br>Shri Rajiv Gandhi Campus, Sringeri - 577139<br>(Karnataka) |
| E-Mail | : | director-sringeri@sanskrit.ac.in |
| Patron | : | Prof. Srinivasa Varakhedi |
| Chief Editor | : | Prof. Subraya V. Bhatta |
| Peer-review Committee:<br>(Advisory Committee) | | Prof. A. P. Sachidananda<br>Former Vice-Chancellor<br>Rashtriya Sanskrit Sanstha, New Delhi<br><br>Prof. Ramachandrula Balaji<br>Associate Director, CSU,<br>Shri Rajiv Gandhi Campus, Sringeri<br><br>Prof. Satish Bhat<br>Professor, Department of Advaita Vedanta,<br>National Sanskrit University, Tirupati.<br><br>Prof. Naveen Holla<br>Associate Director, CSU,<br>SBTSSK, Shri Rajiv Gandhi Campus, Sringeri<br><br>Prof. Ganesh T. Pandit<br>Associate Dean, Research, CSU, New Delhi<br><br>Dr. Vinay M. S.<br>Assistant Professor of English<br>MPM Government First Grade College of Professional & Business Management, Karkala, Udupi |
| Publication Date | : | 29-08-2026 |
| Design | : | Dr. Raghavenadra P. Arolli, Dr. Raveesha N. |
| Printed at | : | Annu Graphics, Thirthahalli, 9480114845 |

© All the rights reserved for publisher. Provided that contributors are responsible for their respective articles.

**प्रो. श्रीनिवासः वरखेडी**
कुलपति
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

**केन्द्रीय संस्कृत विश्वविद्यालयः**
संसद के अधिनियम द्वारा स्थापित
**Central Sanskrit University**
Established by an Act of Parliament

के.सं.वि./कुलपति-101/2026-27/101

दिनाङ्कः -17-08-2026
श्रावण शुक्ल पञ्चमी, वि. सं. 2083



## ॥ शुभसन्देशः ॥

भारतीयज्ञानसागरस्य अस्ति अनितरसाधारणं वैशिष्ट्यम्। अस्मिन्निहितानि ऐहिकम् आमुष्मिकञ्च निष्पादयन्ति वेदशास्त्रपुराणकाव्यादिरत्नानि जगतो गर्वकारणम्। तेषां स्थाने विनियोगेन राष्ट्रोन्नतिः विश्वकल्याणञ्च सम्पद्यते। अध्ययनम्, अध्यापनम्, लेखनम्, संशोधनम्, प्रसारः, सामाजिकापेक्षानिर्वाहः इत्यादिभिः नानाक्रियाभिः भारतीयविद्याशाखानां साधुसमाश्रयः कर्तव्यः। एतदुद्देशेन भारतसर्वकारेण प्रतिष्ठापितः केन्द्रीयसंस्कृतविश्वविद्यालयः कर्मण्यस्मिन् अग्रेसरो वर्तत इति नाविदितं सर्वेषाम्। शिक्षाशोधप्रकाशनादिकार्यतत्परेण विश्वविद्यालयस्य श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रात्मना परिणतेन श्रीराजीवगान्धीपरिसरेण शारदाख्या शोधपत्रिका प्रकाश्यमाना वर्तते। भारतस्य दिशि दिशि संस्कृतकार्यं विदधानैः बुधैः विशिष्य तरुणैः अनुसन्धातृभिः लिखितैः भारतीयज्ञानपरम्पराप्रकाशकैः विमर्शात्मकैः शोधलेखैः समलङ्कृतेयं प्रतिष्ठिता शोधपत्रिका। शोधपत्रिकेयं विद्वन्मनोरञ्जनी विद्यार्थिजिज्ञासाशमनी च भूयादित्याशासे।

(प्रो. श्रीनिवासः वरखेडी)
कुलपतिः

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, Website : www.sanskrit.nic.in

आचार्यः सुब्राय वि. भट्टः
निदेशकः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी

Prof. Subraya V. Bhatta
Director
Central Sanskrit University
Śrī Bhāratītīrtha Śāstrasamutkarṣa Kendram
Shri Rajiv Gandhi Campus, Sringeri - 577 139



## ॥ शुभं सन्दिशाम ॥

"योऽनूचानः स नो महान्" इति केन्द्रीयसंस्कृतविश्वविद्यालयस्य ध्येयवाक्यम् । साङ्गवेदाध्यायी अनूचानः इति परिभाषितः । वेदाध्ययनं च गुरुमुखोच्चारणानूच्चारणरूपम् अर्थज्ञानपर्यन्तमिति मीमांसकमर्यादा । तदर्थज्ञानञ्च अनुष्ठान-मननादिद्वारा चित्तशुद्धौ तत्त्वज्ञाने वा पर्यवस्यतीति तत्त्वज्ञानिनाम् ऋषीणाम् उपदेशः । तदर्थमेव महर्षिभिः शास्त्राणि संरचितानि । तदुक्तम् - "शमार्थं सर्वशास्त्राणि रचितानि महर्षिभिः" इति । काले काले महर्षयो वाचं तपसा संशोध्य ज्ञानस्य रत्नानि नः प्रददुः। काले गते बहुतिथे कालवशादेव मुनिवचनरूपाण्यमूनि रत्नजातानि धूलिधूसरितानीव जातानि। अतः तेषां संशोधनं प्रकाशनं प्रचारं च कर्तुं दृढसङ्कल्पं कृत्वा केन्द्रीयसंस्कृतविश्वविद्यालयः शारदानाम्नीं शोधपत्रिकां प्रकाशयति यस्यां च देशस्य प्रथितविदुषां, गवेषणरतानां शोधच्छात्राणां च मौलिकानि लेखनानि सङ्कलितानि। इयं च शोधपत्रिका प्राचीनपरम्परा-आधुनिकतयोः सेतुर्भवति येन शास्त्राणां कालातीतं सत्यं लोकसम्मुखमानेतुमवसरो लभ्यते।

अस्याः शोधपत्रिकायाः प्रकाशनदायित्वं शृङ्गेरीस्थाय श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रनाम्ना परिणतायास्माकं राजीवगान्धीपरिसराय प्रादात्। कुलपतीनामादेशं प्रह्वीभावेन स्वीकृत्य श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रं सश्रद्धमिदं कार्यं समपादयत्। अत्र सङ्कलितलेखाः शास्त्रीयप्रमाण-तार्किकसमीक्षा-भाषासौन्दर्यैः त्रिभिर्गुणैः मण्डिताः पत्रिकाया मौल्यं तन्वन्तीत्यत्र नास्ति संशयलेशः। एतदवसरं कल्पितवद्भ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभ्यः आचार्यश्रीनिवासवरखेडीमहाभागेभ्यः वन्दनानि समर्पयामि। लेखकेभ्यः लेखान् सङ्गृह्य, संशोध्य पत्रिकायाः सम्पादनकर्मणि व्यापृतेभ्यः शास्त्रसमुत्कर्षकेन्द्रप्राध्यापकेभ्यः अभिनन्दनानि समर्प्यन्ते। शारदाम्बायाः जगद्गुरूणां च अनुग्रहेण सनाथीकृतेयं शोधपत्रिका पाठकानां स्वान्तमावर्जयतु इत्याशासे।

आचार्यः सुब्राय वि. भट्टः
निदेशकः

दिनाङ्कः -17-08-2026
श्रावण शुक्ल पञ्चमी, वि. सं. 2083

# सम्पादकीयम्

लोकोपकाराय प्रवर्तितानि महर्षिभिः शास्त्राणि। तद्रहस्यं पुनः सम्यक् ज्ञातव्यं चेत् कारणसामग्री, सुयोग्यपात्रता, निरन्तरो यत्नश्च वैपुल्येन आसादनीयो भवति। तत्त्वप्रतिपत्तये पुनःपुनः तद्विषयको विचारः प्रवर्तनीयः। वेदः, तदङ्गानि, उपनिषदः, आयुर्वेदः, दर्शनम्, गणितम्, गोलविज्ञानम्, खगोलशास्त्रम्, वास्तुशास्त्रम्, साहित्यम्, कला, भौतिकशास्त्रञ्च शाखोपशाखतया इह भारते देशे अत्यन्तं समृद्धानि वर्तन्ते। महनीयेयं भारतीया ज्ञानपरम्परा।

अद्य जगति यन्त्राणां प्राधान्यं, भौतिकसुखानां परा काष्ठा, मनसश्च अशान्तिः परिदृश्यते, तदा एतादृश्याः समृद्धशाखायाः विस्तृतिः समग्रविश्वकल्याणायापेक्ष्यते। शाखागतानां निगूढरहस्यानां लोकोपकारकतया चिन्तनं, गम्भीरविमर्शः, आधुनिकयुगानुकूलः प्रसारश्च भवेत्। अतः विद्वांसः स्वकीयैः चिन्तनैः विहितान् विचारान् लेखबद्धान् कुर्युः, येन आयतावपि लोकस्य महान् उपकारः स्यात्।

तदेतद् उद्देश्यं मनसि निधाय, भारतीयज्ञानपरम्परायाः शास्त्राणां च नूतनदृष्ट्या अनुसन्धानस्य प्रोत्साहनार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य निर्देशानुसारं 'शारदा' नाम्नी वार्षिकी शोधपत्रिका प्रकाश्यमाना वर्तते। विश्वविद्यालयस्य श्रृङ्गेरीस्थः श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रात्मना परिणतः श्रीराजीवगान्धीपरिसरः अस्य प्रकाशनस्य सर्वमुत्तरदायित्वं ऊढ्वा 2005-06 तमवत्सरात् (कोविड्काले वर्षद्वयं विहाय) निरन्तरं पत्रिकामिमां प्रकाशयन्वर्तते। विदुषां शोधलेखानां सङ्ग्रहः, व्यवस्थितं सम्पादनम्, मुद्रणम् इत्यादिकार्यं यथाविधि विधाय, अस्याः पत्रिकायाः अङ्कः- 19 सम्प्रति प्राकाश्यं नीयते।

अस्यां 'शारदा'शोधपत्रिकायां भारतीयविद्याशाखाभिः अन्विताः संस्कृतभाषायां, हिन्द्याम्, आङ्ग्लभाषायाञ्च निबद्धाः अष्टाविंशतिः शोधलेखाः समाविष्टाः सन्ति। एतेषु लेखेषु न केवलं प्राचीनशास्त्राणां परम्परागता व्याख्या समागता, अपि तु आधुनिकवैज्ञानिकदृष्ट्या तेषां शास्त्रसिद्धान्तानां पुनर्मूल्याङ्कनमपि कृतं वर्तते। अस्यां पत्रिकायां प्रकाशिताः लेखाः विदुषां गम्भीरचिन्तनस्य फलस्वरूपाः सन्ति।

१. **संस्कृतसाहित्यं दर्शनञ्च** - वैशेषिक-न्याय-वेदान्त-मीमांसादि-दर्शनानां गूढप्रमेयाणां विशदीकरणं तथा च भास-कालिदास-भवभूत्यादि-महाकवीनां काव्येषु प्रतिपादितानां सामाजिक-नैतिक-सौन्दर्यशास्त्रीयमूल्यानां सूक्ष्मपरीक्षणमत्र समुपलभ्यते।

२. **भारतीयज्ञानपरम्परा (IKS) तथा च आधुनिकविज्ञानानि** - आयुर्वेदे वर्णितः स्वस्थवृत्तसिद्धान्तः, गणिते भास्कराचार्य-आर्यभटादीनां योगदानानि, वास्तुशास्त्रस्य

पर्यावरणानुकूलता, तथा च गोलविज्ञाने खगोलस्य आकाशीयपिण्डानां च विवेचनपरा विषयाः अत्र भाषात्रये प्रस्तुतैः निबन्धैः अलङ्कृताः सन्ति।

३. **संस्कृतव्याकरणम्, भाषाशास्त्रम्, सङ्गणकशास्त्रञ्च** - पाणिनिकृतायाः अष्टाध्याय्याः सूत्रेषु निहितं तार्किकत्वम्, आधुनिकसङ्गणकभाषाशास्त्रे (Computational Linguistics) तस्य उपयोगिता,विभिन्नभाषाणां परस्परसम्बन्धस्य विमर्शश्च अस्यां पत्रिकायां समावेश्यन्त।

**कृतज्ञतानिवेदनम्**

'शारदा'पत्रिकायाः सम्पादनकार्यस्य सिद्धये येषां मार्गदर्शनं साहाय्यञ्च लब्धं, तेभ्यः सर्वेभ्यः हार्दिकं कार्तज्ञ्यं निवेद्यते। पत्रिकायाः सुचारुप्रकाशनाय शुभसन्देशं प्रदाय अस्मान् अन्वग्रहीषुः केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयाः कुलपतयः **आचार्याः श्रीनिवासवरखेडीमहाभागाः**। तेभ्यः वयमत्र प्रणतिं समर्पयामः। प्रकाशनकार्यस्य अस्य प्रतिपदं मार्गदर्शनं व्यधुः **श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रस्य** निदेशकाः **आचार्याः सुब्राय वि. भट्टवर्याः**। तेभ्यः धन्यवादाः समर्प्यन्ते। अस्याः पत्रिकायाः गुणवत्तापरिरक्षणाय परामर्शदातृसमितेः सदस्याः लेखान् आमूलाग्रं परिशील्य, शास्त्रशोधदृष्ट्या परीक्ष्य प्रकाशनयोग्यत्वेन चित्वा प्रादुः। एतेभ्यः विद्वद्भ्यः समीक्षकेभ्यः वन्दनानि समर्पयामः। लेखनानि दत्तवद्भ्यः विद्वद्भ्यः अनुसन्धातृभ्यश्च लेखकेभ्यः धन्यवादा अर्प्यन्ते। पत्रिकायाः सुदृश्यविन्यासे साहाय्यं कृतवद्भ्यः अक्षय भट्टः, मेधा गिरीष वर्मा, याह्वी जोषी, लक्ष्मी एस्. अय्यर्, सहना ज्योतेप्पा नरगुन्द, अरुषा पि. वैद्या, भव वि. गुणे, अंशुलशर्मा, सुजल खतिवाडा, प्रज्वल कृष्ण जोशी इत्येतेभ्यः छात्रेभ्यः धन्यवादा आविष्क्रियन्ते। ज्ञान-वैराग्य-तपोधनानां, जगद्गुरूणां, दक्षिणाम्नाय-शृङ्गेरी-शारदापीठाधीश्वराणां **श्रीश्रीभारतीतीर्थमहास्वामिनां** तत्करकमलसञ्जातानां **श्रीश्रीविधुशेखरभारतीमहास्वामिनां** च चरणाम्बुजयोः सभक्तिश्रद्धं प्रणामान् समर्पयामः।

पराभव-श्रावण-कृष्ण-प्रतिपत् (29.08.2026)

विद्वज्जनविधेयाः,
सम्पादकाः

# विषयानुक्रमणिका


| | | |
|---|---|---|
| **संस्कृतम्** | | ३ |
| 1. बहुव्रीहौ सर्वनामसंज्ञाविचारः | डा. चन्द्रशेखरभट्टः | ३ |
| 2. असिद्धवदत्राभात् सूत्रार्थविचारः | डा. प्रमोद् भट्टः | ७ |
| 3. हलन्तेभ्यः स्त्रियां टाब्विधानविचारः | डा. शिवकुमारी काटूरि | १३ |
| 4. वैयाकरणमतानुसारं धात्वर्थनिरूपणम् | श्री. उज्ज्वलः एस् | १६ |
| 5. आख्यातार्थविचारसन्दर्भे गुणाधिकरणसिद्धान्तविमर्शः | प्रलय-नन्दी | २२ |
| 6. सारमञ्जर्याम् एवशब्दार्थविचारः | वासुदेवगराइ | २८ |
| 7. वैयाकरणसिद्धान्तकौमुद्या अच्सन्धिप्रकरणे बाध्यबाधकसूत्रविमर्शः | शुभजित्-फौजदारः, डा. सि. एस्. आर्. लिङ्गा रेड्डी | ३३ |
| 8. पूर्वमीमांसान्यायसञ्चारपूर्वकम् अङ्गुष्ठमात्रपुरुषस्य ब्रह्मत्वसाधनम् | डा. विश्वनाथ हेगडे | ४० |
| 9. प्रत्यक्षस्य वर्तमानमात्रग्राहित्वम् | महेश चिदम्बर भट्टः | ४५ |
| 10. गौडीयवैष्णवदर्शने प्रतिपादितस्यानादितत्त्वस्य दार्शनिकनिरूपणम् | डा. राजेशः प्रामाणिकः | ४९ |
| 11. तेजोबिन्दूपनिषदि प्रतिपादितपञ्चदशाङ्गयोगेन परब्रह्मावगतिः | विभाकरकुमारदीक्षितः | ६१ |
| 12. तार्किकयुक्त्या पूर्वपक्षीयासत्ख्यातौ दोषोपचारः, उक्तदोषपरिहारश्च | अनिरुद्ध घोषः | ७२ |
| 13. सांख्ययोगप्रत्यभिज्ञादर्शनानां तत्त्वसिद्धान्तमीमांसा | हरिप्रिया तिरुनगरि | ७९ |
| 14. न्यायबिन्दुदिशा प्रत्यक्षलक्षणविमर्शः | श्री जीवन गराईः | ९० |
| 15. कपिलनये बन्धस्वरूपविमर्शः | प्रभातकुमारमण्डलः | ९७ |
| 16. भास्करोक्तसूक्ष्मनक्षत्रानयनक्रमस्य विमर्शः | डा. रमानन्द् भट्टः एन्. | १०४ |
| 17. वैदिकसंस्काराणां स्वरूपं, महत्त्वं, कर्णवेधस्य वैज्ञानिकता च | डा. यशस्वी | १११ |
| 18. नाथसम्प्रदायस्य ऐतहासिकविकासः, साधनापद्धतिः, साम्प्रदायिकसंरचना च | डॉ० छबिलाल न्यौपानेः | ११५ |

| | | |
|---|---|---|
| 19. श्रीरामचरितस्तोत्रम् – रामायणसारप्रदर्शकम् अप्रकाशितं स्तोत्रम् | रिधमः पण्ड्या | १२६ |
| 20. संस्कृतवाङ्मये पर्यावरणविज्ञानम् | डा मनीष शर्मा | १३५ |


## हिन्दी


| | | |
|---|---|---|
| **हिन्दी** | | १४२ |
| 21. संस्कृत वाङ्मय में भारतीय ज्ञान-परम्परा का सांस्कृतिक स्वरूप | श्री बलराम,<br>डॉ. देवेन्द्र सिंह राजपूत | १४२ |
| 22. वैदिक साहित्य : भारतीय ज्ञान परंपरा का मूल आधार | डॉ. गोविन्द कुमार | १५३ |
| 23. WHO - परिभाषित स्वास्थ्य का पातञ्जल योगसूत्र की दृष्टि से विश्लेषण | डॉ. विजय गुप्ता | १५८ |


## English


| | | |
|---|---|---|
| **English** | | १६९ |
| 24. The Cloud as a Traveller: Cultural Geography and Environmental Imagination in Kālidāsa's Meghadūta. | Dr. Sindhu T.S | १६९ |
| 25. THE LAW OF INHERITANCE IN MANUSMRUTI : Principles and traditions in ancient Hindu law | Dr. Bhuvaneswary Kunjamma V R | १७६ |
| 26. Roots of the future: a case study on nurturing moral values in Bharat 2.0 through IKS-driven education | Preeti Chaudhary,<br>Dr. Jitendra Singh Goyal | १८४ |
| 27. Significance of Sanskrit in Carakasaṃhitā | Riya Dutta | १९७ |
| 28. Teachings of the Bhagavadgītā for Stress Reduction and Emotional Balance | Partha Gorai | २०१ |





ISSN : 2320-740X

# संस्कृतम्

# बहुव्रीहौ सर्वनामसंज्ञाविचारः

डा. चन्द्रशेखरभट्टः*
आचार्यः(सं), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– द्वन्द्वे च इति ज्ञापकाल्लब्धसर्वाद्यन्तसर्वनामसंज्ञा बहुव्रीहिसमासेऽपि प्राप्ता इति तत्र सर्वनामसंज्ञानिषेधाय न बहुव्रहौ इति सूत्रमारब्धम् ।तत्र सूत्रस्यार्थविवृतौ प्राच्यनव्यमतभेदः दृश्यते । कौमुदी-काशिका-प्रक्रियाकौमुदीकाराणां च मतं मनोरमाग्रन्थोक्तदिशा परिशील्य महाभाष्यरीत्या बहुव्रीहिसमासस्यैव सर्वनामसंज्ञानिषेधः इति सिद्धान्तः स्थापितः ।त्वत्कपितृकः,त्वकत्पितृकः इत्यनयोः कतरद्रूपं साधु? किं च उपसर्जनत्वादेव सिद्धे न बहुव्रीहौ इति सूत्रं स्पष्टार्थमेव इत्याद्यंशाः प्रबन्धेऽस्मिन् चर्चिताः ।*

***कूटशब्दाः*** *– प्रियसर्वाय, त्वत्कपितृकः, उपसर्जनम्, प्रकृतिप्रत्यापत्तिः, बहुव्रीहिः, चिकीर्षिते ।*

**विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।**
**चरीकर्ति बरीभर्ति सञ्जरीहर्ति लीलया ॥**

नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो नमो महद्भ्यो गुरुभ्यः । शब्दसाधुत्वविषया सैषा व्याकरणस्मृतिः[१] इत्यभियुक्तोक्त्या प्रयुक्तानामन्वाख्यानायेदं व्याकरणशास्त्रमारम्भि । तत्र बहुव्रीहिसमासे त्वत्कपितृकस्त्वकत्पितृक इत्युभयथा प्राप्त्या कतरस्य साधुत्वमिति विचिचारयिषायां न बहुव्रीहौ[२] सूत्रं मनागालोच्यते ।

सर्वादीनि सर्वनामानि[३] इति सूत्रेण सर्वादीनां पञ्चत्रिंशतः शब्दानां सर्वनामसंज्ञा व्यधायि । सा च द्वन्द्वे च इति (समुदायनिषेधात्) ज्ञापकात् सर्वाद्यन्तस्यापि भवति । ततश्च सर्वशब्दस्येव परमसर्वशब्दस्यापि सर्वनामत्वे सर्वनामसंज्ञा प्रयुक्तकार्याणि स्युरिति परमसर्वे, परमसर्वस्मै इत्यादिरूपाणि सिध्यन्ति । एवं तदन्तस्यापि संज्ञाभ्युपगमे प्रियविश्व इत्यादीनामपि सर्वनामत्वे प्रसक्ते तन्निषेधाय न बहुव्रीहाविति सूत्रमारब्धम् इति काशिकाग्रन्थदिशा व्याख्यानम् । बहुव्रीहौ चिकीर्षिते सर्वनामता न स्यादिति कौमुदीग्रन्थः ।अयं च परस्तात् विचार्यते ।

बहुव्रीहौ सर्वनामता न स्यात् । प्रियविश्वाय । विश्वः प्रियो यस्य इति विग्रहः ।अत्र स्मायादिसर्वनामसंज्ञाप्रतिबद्धं कार्यं न भवति । न च विश्वः प्रियो यस्येति बहुव्रीहौ विश्वशब्दस्य प्रियशब्दविशेषणत्वात् सप्तमीविशेषणे बहुव्रीहौ इति सूत्रेण पूर्वनिपाते सर्वाद्यन्तत्वाभावेन सर्वनामत्वं नेति वाच्यम् 'वा प्रियस्य'[४] इति वार्तिकेन प्रियशब्दस्य पाक्षिकपूर्वनिपातविधानेन सर्वाद्यन्तत्वलाभात् । एवं द्व्यन्याय, त्र्यन्याय इत्यप्युदाहरणे ।

ननु बहुव्रीहौ सर्वनामता न स्यादित्युक्ते बहुव्रीहाविति सप्तमीश्रवणात् सर्वनामतानिषेधस्य किं बहु-

---

***सम्पर्कसूत्रम्** - 9448836941, Email- chkbhat@sanskrit.ac.in

[१]वाक्यपदीयम् १.१४१

[२]अष्टाध्यायी १.१.२९

[३]अष्टाध्यायी १.१.२७

[४]का.वा. २.२.३५

व्रीहिरधिकरणं यथा बहुव्रीह्याधारा सर्वनामसंज्ञा न स्यादिति ? उत सर्वादीनीत्यनुवृत्तेः बहुव्रीहिघटकानां सर्वादिशब्दानामधिकरणत्वम्, यथा बहुव्रीहौ सर्वादेः सर्वनामता न स्यादिति ? अत्र न्यासकार आह[1] - बहुव्रीहिसमासस्य सर्वनामतानिषेधसामर्थ्यात् तदन्तस्यापि सर्वनामत्वप्राप्तिरनुमीयते । एवञ्च तदन्तस्यापि सर्वनामत्वमित्यंशज्ञापनायैव प्रतिषेधारम्भः । ततः परमसर्वादेः सर्वनामत्वे स्मायाद्यादेशः प्रियसर्वायेत्यादौ तन्निषेधश्च सिध्यति । किञ्च बहुव्रीहिघटकसर्वादीनामपि निषेधकमिदम् । त्वं पिता यस्य, अहं पिता यस्य इति विग्रहे असति प्रतिषेधे अज्ञाताद्यर्थविवक्षयामकच्प्रत्यये त्वकत्पितृको, मकत्पितृक इत्यनिष्टापत्तिः इति ।

प्रक्रियाकौमुदीव्याख्यात्रा प्रकाशकृता[2] च बहुव्रीहौ सर्वनामता न स्यात्, प्रियसर्वाय इति ग्रन्थमुपादाय सूत्रकारमते बहुव्रीहौ न सर्वनामता, भाष्यकारमते गौणत्वमात्रे न तदित्युक्तम् । अत्रैवं वक्तव्यम् - उक्तरीत्या यदि बहुव्रीहिसमास एव निषेधाधिकरणं स्यात् तर्हि समुदाये सर्वनामसंज्ञायाः प्राप्त्यभावेन निषेधो व्यर्थः स्यात् । ननु तदन्तविधिना सर्वाद्यन्तस्य संज्ञा इति चेन्न, पाठात् पर्युदासः पठितानां शुद्धानां संज्ञाकरणमित्युक्तेः ।अयमाशयः- भाष्ये[3] संज्ञोपसर्जनप्रतिषेधो वक्तव्यः इत्युक्त्वा स कथं वक्तव्य इति शङ्कित्वा पाठात्पर्युदासः पठितानां संज्ञाकरणम् इत्युक्तम् ।एकेन यत्नेन उभयं कत्थं लभ्यम्? एकशेषनिर्देशात् ।सर्वादीनि च सर्वादीनि च सर्वादीनि ।सर्वनामानि च सर्वनामानि च सर्वनामानि ।सर्वेषां यानि नामानि तानि सर्वादीनि भवन्ति । सर्वादीनि सर्वनामानि भवन्ति ।संज्ञोपसर्जने च विशेषे अवतिष्ठेते ।एवञ्च यदा सर्वादिशब्दः संज्ञात्वेन विनियुज्यते तदाप्रसिद्धप्रवृत्तिनिमित्तपरित्यागेन स्वरूपमात्रार्थकः प्रवर्तत इति विशेषे अवतिष्ठते । अतिसर्वाय इति उपसर्जनमपि अतिक्रान्तार्थविशेषणतामापन्नं सत् अतिक्रान्तार्थवृत्ति भवति । बहुव्रीहावन्यपदार्थप्राधान्यात् अवयवानामुपसर्जनतया सर्वादिगणबहिर्भूतत्वेन सर्वनामत्वाभावात्, तादृशोपसर्जनसर्वाद्यन्तस्य सुतरामभावात् । एवञ्च समुदायस्य संज्ञानिषेधो व्यर्थः । अनेनैव हेतुना अवयवस्यापि सर्वनामत्वाभावेन बहुव्रीह्यवयवानां सर्वनामत्वनिषेधो व्यर्थः ।

ननूपसर्जनानां पाठात्पर्युदासः वार्तिककारेणोक्तः न सूत्रकारेणेति सूत्रकारमते उपसर्जनस्यापि प्राप्तिरस्त्येवेति निषेधः सार्थक इति चेत् न, महत्याः संज्ञाया आश्रयणेन तल्लाभात् ।लघ्वर्थं हि संज्ञाकरणम् ।संज्ञा च नाम यतो न लघीयः ।महत्याः संज्ञायाः करणे एतत्प्रयोजनम् अन्वर्थसंज्ञा यथा विज्ञायेत ।एवञ्च सर्वेषां नामानि सर्वनामानि इत्यन्वर्थसंज्ञाबलादेव प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्वसमानाधिकरणानां गणे पाठ इति सूत्राक्षरैरेव तदर्थलाभात् उपसर्जनप्रतिषेधः सूत्रकारसम्मत एव । अनेन प्रसादकृदुक्तमपि निराकृतं भवति । तेन हि सूत्रकारमते बहुव्रीहौ सर्वनामताप्रतिषेध इत्युक्तम् । एतेन च सूत्रवार्तिकयोर्मतं विलक्षणमिति प्रतीयते । देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेन न पश्यतीति प्रतीतिवत् । तदेतदयुक्तम्, गौणत्वमात्रे संज्ञानिषेधस्य सूत्रकारस्यापि सम्मतत्वात् । तत्रेयान् विशेषः - सूत्रकारस्य अन्वर्थत्वबलेन, वार्तिककारस्य उपसर्जनप्रतिषेधेन च गौणपर्युदास इति ।

त्वत्कपितृको मत्कपितृक इत्यत्र त्वं पिता यस्य, अहं पिता यस्येति विग्रहे बहुव्रीहिसमासे सति समा-

[1] काशिका १.१.२९

[2] प्रक्रियाकौमुदी .पृ.२२५

[3] महाभाष्यम्.१.१.२७

सान्तःपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेन सर्वनामत्वादकच् शङ्कितो न्यासकारेण[१]। अत्रापि अन्वर्थसंज्ञाश्रयणेनैव संज्ञा वार्यते इति । तथा च न्यासकारोक्तिः- अन्वर्थसंज्ञाकारणादेव संज्ञानिरासे अकज् न भविष्यति, न ह्यत्र सर्वार्थता सम्भवति, विशेषविषयत्वात् ।नैतदस्ति, समुदायो हि विशेषे वर्तते, पूर्वपदन्तु सर्वार्थताया अनपेतमेवेति । इदमसङ्गतमेवेति दीक्षिताशयः । तथा हि - जहत्स्वार्थायां वृत्तौ समासावयवयोरर्थ एव नास्ति । अजहत्स्वार्थायामपि वृत्तौ स्वार्थविशिष्टान्यपदार्थवृत्तित्वेनोपसर्जनत्त्वं भवत्येव । उपसर्जनत्वञ्चेतर- विशेषणतयोपस्थितिविषयत्वम् । अतः पक्षद्वयेऽपि न्यासकारोक्तमयुक्तमेव । अन्यथा अतिसर्वायेत्यत्रापि स्मायाद्यादेशो दुर्वारः स्यात्, तद्रीत्या अवयवे सर्वार्थवाचकत्वस्य सत्वात्, पूर्वपदे एव सर्वार्थवाचकता न तूत्तरपदे इत्यत्र विनिगमकाभावाच्च । अतो भाष्याविरोधेन सूत्रं व्याख्येयम् । भाष्यकृता[२] हि आपाततः सर्वाद्यन्तस्य बहुव्रीहेः संज्ञानिषेधमुक्त्वा, प्रियविश्वायेति चोदाहृत्य न खल्वप्यवश्यं सर्वाद्यन्तस्यैव सर्वादेः प्रतिषेधेन भवितव्यम्, असर्वाद्यन्तस्यापि । किं प्रयोजनम् ? अकज्मा भूदिति । (बहुव्रीहौ यानि सर्वादीनि तेषां सर्वनामता नेति तदर्थः) । त्वत्कपितृकः मत्कपितृकः इति चेष्यते, त्वकत्पितृको मकत्पितृक इति स्यादित्यभिधाय उपसर्जनप्रतिषेधेनान्यथा सिद्धिमुपपाद्य सूत्रस्थबहुव्रीहिपदे लक्षणामाश्रित्य बहुव्रीह्यर्थानि पदानि बहुव्रीहिशब्देनोच्यन्ते इति समाधानान्तरमभ्यधायि । बहुव्रीह्यर्थानि यानि पदानि इति भाष्यस्य व्याख्यानं कुर्वता कैयटेन सूत्रोपारूढ एवायमर्थः । अप्रयोगसमवायि यत्प्रक्रियावाक्यं तत्रायं प्रतिषेधः, न लौकिके वाक्ये प्रयोगार्हे इत्युक्तम् । बहुव्रीह्यर्थानि पदानि अलौकिकविग्रहे एव भवन्ति, तत्रैव समासस्य प्रवृत्तेः । सन्दर्भविशेषमेतं मनसि निधाय दीक्षितैः[३] चिकीर्षिते इति पदमध्याहारि । बहुव्रीहेः चिकीर्षितत्वं च अलौकिके प्रक्रियावाक्ये एवेति तत्रैव संज्ञाप्रतिषेधः । लौकिकविग्रहे तु पदानां स्वार्थे परिनिष्ठितत्वेन स्वातन्त्र्येण प्रयोगार्हतया बहुव्रीहेः चिकीर्षितत्वाभावः । त्वत्कपितृको, मत्कपितृक इत्युदाहरणे । त्वकं पिता यस्य, अहकं पिता यस्येति लौकिकविग्रहवाक्यम् । युष्मद् सु पितृ सु, अस्मद् सु पितृ सु इति प्रक्रियावाक्ये एव सर्वनामसंज्ञानिषेधात् अज्ञाताद्यर्थे अकजभावे कप्रत्यय एव । चिकीर्षिते इति पदानध्याहारे तु लौकिकविग्रहवाक्य इव अलौकिकेऽपि अकचः प्रवृत्तौ समासे तस्य श्रवणापत्तिः ।

ननु अकृतव्यूहाः पाणिनीयाः इति परिभाषया अकजुपजीव्यसर्वनामसंज्ञाप्रयोजकानुपसर्जनत्वस्य समासे सति एकार्थीभावेन विनाशसम्भावनया प्रागेव संज्ञा न भविष्यतीति चेत् न । एतत्सूत्रारम्भादेव तस्या अनित्यत्वमध्यवसीयते । (न बहुव्रीहौ इति सूत्रस्य प्रत्याख्याने तु च्छ्वोः शूडनुनासिके च इति सूत्रे सतुग्ग्रहणम् ।तथा हि – प्रश्नः विश्नः इत्यादौ तुग्विशिष्टस्य शकारादेशार्थं च्छ्वोः शूडनुनासिके च इति सूत्रे सतुक्निर्देशः ।तत्र हि प्रच्छ् इत्यत्र छे च इति सूत्रेण तुगागमो विहितः ।नङ्प्रत्ययविवक्षायां भाविना शादेशेन तुको निमित्तं नङ्क्ष्यतीति अकृतव्यूहपरिभाषया तुगेव न प्रवर्तते ।तथा च तुको निवृत्त्यर्थं कृतः सतुक्निर्देशः व्यर्थः सन् अकृतव्यूहपरिभाषायाः अनित्यत्वं ज्ञापयति । अथवा आख्यानात् कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्त्यापत्तिः प्रकृतिवच्च कारकम् इति वार्तिके[४]

[१]काशिका.१.१.२९
[२]महाभाष्यम्.१.१.२७
[३]सिद्धान्तकौमुदी,न बहुव्रीहौ
[४]हेतुमति च ३.१.२६


ISSN : 2320-740X

प्रकृतिप्रत्यापत्तिवचनं तदनित्यत्वे ज्ञापकम् ।वृत्तकथाप्रबन्धवाचिनः कृदन्तात् कंसवधादिशब्दात् तदाचष्टे इत्यर्थे णिचि कृते णिच्प्रकृत्यवयवभूतस्य कृतो लुक्, तस्यैव कृतो या प्रकृतिः हनादिधातुरूपा तस्याः आदेशविकारपरित्यागेन स्वरूपेण अवस्थानं भवति इत्यर्थः । कंसवधमाचष्टे कंसं घातयति इत्युदाहरणम् । वधशब्दे हनश्च वधः[1] इति अप्प्रत्ययसंन्नियोगेन वधादेशः कृतः । तत्र कंसवधशब्दात् आचक्षाणणिज्विवक्षायां वार्तिकेन कृतो लुग्भवति इति भाविनिमित्तविनाशसम्भावनया वधादेशस्य अप्रसक्तौ अथवा कृतस्यापि तस्य स्वयं निवृत्तौ सिद्धायां प्रकृतिप्रत्त्यापत्तिवचनं व्यर्थं सत् अकृतव्यूहपरिभाषायाः अनित्यतां ज्ञापयति ।) अतः प्रक्रियावाक्ये प्रवृत्तः अकच् समासेऽपि श्रूयेतेति प्रक्रियावाक्ये एव सर्वनामतानिषेधायेदं सूत्रम् ।

भाष्यकारस्तु अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम्[2] इत्याश्रित्य त्वकत्पितृको मकत्पितृक इति रूपे इष्टापत्तिं कृत्वा एतत्सूत्रं प्रत्याचख्यौ । नन्वेवं द्वयोर्मतयोर्मिथो विरोधे कस्योपादेयतेति शङ्कायां यथोत्तरं मुनीनां प्रामाण्यमिति वैयाकरणसमयः । ऋषीणां (सूत्रवार्तिकभाष्यकृतां) परस्परं वचनविरोधे सति पूर्वपूर्वापेक्षया उत्तरोत्तरस्यैव मतं ज्याय इति तदर्थः । धिन्विकृण्व्योर च इत्यत्वविधानेनैतत् सूत्रकारस्यापि सम्मतमिति गम्यते । तथा च धिन्विकृण्योरिति सूत्रे भाष्यम्[3] - क्वायमकारः श्रूयते ? न क्वचिच्छ्रूयते । लोपोऽस्य भविष्यति अतो लोप इति । यदि न क्वचिच्छ्रूयते किमर्थमयमुच्यते । न लोप इत्येवोच्येत । नैवं शक्यम् । लोपे सति गुणः प्रसज्येत । अत्त्वे पुनः सति अकारलोपस्य स्थानिवद्भावात् गुणो न भविष्यति । ननु च लोपेऽपि सति न धातुलोप आर्धधातुके इति गुणप्रतिषेधो भविष्यति । प्रत्याख्यायते खलु स योगः । तस्मिन् प्रत्याख्याते गुणः स्यादेव । तस्मादत्त्वं वक्तव्यम् इति ।

**उपसंहारः-**

एतद्भाष्यसन्दर्भपर्यालोचनेन प्रत्याख्यातृमतमेव प्रबलमिति ध्वन्यते । तेन यथोत्तरं मुनीनां प्रामाण्यमिति सिद्ध्यति । सूत्रकारमताद् वार्तिकभाष्यकृन्मतस्य, तत्रापि च भाष्यकृन्मतस्य प्राबल्यमिति यावत् । उत्तरोत्तरमुनिवचने एव पूर्वपूर्वमुनीनां तात्पर्यमिति तात्पर्यम् । प्रकृते अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम् इति भाष्योक्तेरेव आश्रयणीयत्वात् त्वकत्पितृको मकत्पितृक इति रूपे साधू । एवञ्च न बहुव्रीहौ इति सूत्रमुपसर्जनप्रतिषेधानुवादकमेवेत्याशयः । इति शम् ॥

## सन्दर्भग्रन्थसूची


१. वैयाकरणसिद्धान्तकौमुदी

२. व्याकरणमहाभाष्यम्

३. प्रौढमनोरमा

४. प्रक्रियाकौमुदी

५. काशिका

६. वाक्यपदीयम्


[1] अष्टाध्यायी ३.३.७६
[2] महाभाष्यम्. १.१.२९
[3] महाभाष्यम्. ३.१.८०

# असिद्धवदत्राभात् सूत्रार्थविचारः

डा. प्रमोद भट्टः*
सहायकाचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– "असिद्धवदत्राभात्"*[१] *इति इदं सूत्रं कीदृशं सूत्रम्, अस्य सूत्रस्य उदाहरणं किं, सूत्रे विद्यमानानां पदानां प्रयोजनम्, इदं कार्यासिद्धत्वं बोधयति वा शास्त्रासिद्धत्वं वा, अस्य सूत्रस्य अनित्यत्वं कथम्, अनित्यत्वे ज्ञापकं च किमिति एते विषयाः अस्मिन् प्रबन्धे प्रतिपादिताः सन्ति ।*

***कूटशब्दाः*** *– असिद्धवत्, असिद्धम्, लोपः, झल्, सूत्रार्थः, अनित्यत्वम्*

**"असिद्धवदत्राभात्"**[२] इति इदं सूत्रं पाणिनीयाष्टके षष्ठाध्यायस्य चतुर्थपादे द्वाविंशतितमं सूत्रं विद्यते । षड्विधेषु सूत्रेषु इदम् अधिकारसूत्रम् । असिद्धवत्, अत्र, आभात् इति पदच्छेदः । त्रिपदमिदं सूत्रम् । असिद्धवत् इति अव्ययं पदम् । अत्र इत्यपि त्रलन्तमव्ययम् । आभात् इत्यत्र आ भात् इति विग्रहे **"आङ् मर्यादाभिविध्योः"**[३] इत्यनेन अव्ययीभावसमासे 'आभम्' इत्यस्य पञ्चमीविभक्त्येकवचनम् । 'आङ्' इति अभिविधौ । भाधिकारमभिव्याप्य इत्यर्थः । सूत्रे 'इति' पदं समानाश्रयप्रतिपत्त्यर्थम् । एवं च अस्य सूत्रस्य अर्थः फलति – **"इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् । समानाश्रये तस्मिन् कर्तव्ये तदसिद्धं स्यात्"** इति ।

अस्य सूत्रस्य उदाहरणं तावत् जङ्घहि इति । तथा हि **"हन हिंसागत्योः"**[४] इति धातोः **"धातोरेकाचो हलादेः क्रियासमभिहारे यङ्"**[५] इत्यनेन यङि **"सन्यङोः"**[६] इति द्वित्वे, **"यङोऽचि च"**[७] इति यङः लुकि अभ्यासादिकार्ये 'जङ्घन्' इति धातुः । अस्य लोट्लकारमध्यमपुरुषैकवचनविवक्षायां परस्मैपदे सति तस्य **"सेर्ह्यपिच्च"**[८] इति हि आदेशे 'जङ्घन् हि' इति जाते, **"अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति"**[९] इति धातोः नकारस्य लोपे, 'जङ्घ हि' इत्यवस्थायाम् **"अतो हेः"**[१०] इत्यनेन जङ्घ इति अतः परत्वात् हेः लुक् प्राप्तः । **"अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति"**[११] इति सूत्रप्रवृत्तौ निमित्तं झलादिकिन्ङित्प्रत्ययः हिः । **"अतो हेः"**[१२] इत्यस्य प्रवृत्यर्थमपि

---

***सम्पर्कसूत्रम्** - 09481394969, Email- pramodrgcs@gmail.com

[१]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[२]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[३]पाणिनीयाष्टाध्यायी सूत्रसंख्या २.१.१३
[४]पाणिनीयधातुपाठः अदादिगणः ०२
[५]पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.२२
[६]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.१.९
[७]पाणिनीयाष्टाध्यायी सूत्रसंख्या २.४.७४
[८]पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.४.८७
[९]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.३७
[१०]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०५
[११]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.३७
[१२]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०५

हिः निमित्तमित्यतः समानाश्रयत्वात् **"असिद्धवदत्राभात्"**[१] इत्यनेन **"अतो हेः"**[२] इति सूत्रदृष्ट्या नलोपस्य असिद्धत्वात् अदन्तत्वाभावात् हेः न लुक् ।

व्याकरणशास्त्रस्य षड्प्रकारेषु सूत्रेषु **"असिद्धदत्राभात्"**[३] इति अधिकारसूत्रेषु अन्यतमम् । अधिकारो द्विधा– एकः अर्थाधिकारः द्वितीयः शब्दाधिकारः इति । शब्दाधिकारः नाम यत्र सूत्रम् अथवा सूत्रे विद्यमानं पदं यद्देशे पठितं तद्देशे तस्य यः अर्थः स एव उत्तरत्र न स्वीक्रियते, किन्तु अर्थान्तरं स्वीक्रियते । यत्र सूत्रम् अथवा सूत्रे विद्यमानं पदं यद्देशे पठितं तद्देशे तस्य यः अर्थः स एव उत्तरत्र स्वीक्रियते सः अर्थाधिकारः इति ।

सूत्रमिदमर्थाधिकारः । अतः **"श्नसोरल्लोपः"**[४] इति यः अवधिः निर्णीतः स एव प्रतिसूत्रमुपतिष्ठते । तदेव कौमुद्यां भट्टोजीदीक्षितैः **"इत ऊर्ध्वमापादपरिसमाप्तेराभीयम्"** इत्यर्थः उपपादि । तेन 'एधि' इत्यादीनी रूपाणि सिध्यन्ति । तथा हि **"अस भुवि"**[५] इति धातोः लोट्लकारमध्यमपुरुषैकवचनविवक्षायां सिपः **"सेर्ह्यपिच्च"**[६] इत्यनेन 'हि' इति आदेशे, शपः **"अदिप्रभृतिभ्यः शपः"**[७] इति लुकि, हेः अपित्त्वात् **"सार्वधातुकमपित्"**[८] इति ङित्त्वात्, **"श्नसोरल्लोपः"**[९] इति असः अकारस्य लोपे, 'स् इ' इत्यवस्थायां **"घ्वसोरेद्धावभ्यासलोपश्च"**[१०] इति हे परे सस्य एत्वं प्राप्तम् । सकारः झल् अतः झल्त्वात् **"हुझल्भ्यो हेर्धिः"**[११] इति धित्वञ्च प्राप्तम् । **"विप्रतिषेधे परं कार्यम्"**[१२] इति परिभाषया परशास्त्रं **"घ्वसोरेद्धावभ्यासलोपश्च"**[१३] इति एत्त्वशास्त्रं प्रवर्तते । तत्र एत्त्वे कृते, पूर्वशास्त्रं प्रत्यपि सूत्रमिदम् **"असिद्धवदत्राभात्"**[१४] इत्यनेन असिद्धं भवतीत्यतः एत्वविधायकशास्त्रस्य असिद्धत्वात् धिभावविधायकशास्त्रदृष्ट्या सकारस्य सत्वात् झलन्तत्वात् ततः हेः धित्वे एधि इति रूपं सिध्यति ।

शब्दाधिकारस्वीकारे तु यत्र यत्र **"असिद्धवदत्राभात्"**[१५] इति सूत्रस्य उपस्थितिः ततः आरभ्यैव यदाभीयं तस्मिन्नेव कर्तव्ये असिद्धत्वं स्यात् न तु ततः पूर्वस्मिन् । तदा **"घ्वसोरेद्धावभ्यासलोपश्च"**[१६] इति एत्त्वं पूर्वस्मिन् **"हुझल्भ्यो हेर्धिः"**[१७] इति द्वित्वे कर्तव्ये नासिद्धं स्यात् । ततः हेः धिभावः न स्यात् ।

---

[१]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[२]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०५
[३]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[४]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१११
[५]पाणिनीयधातुपाठः अदादिगणः ६०
[६]पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.४.८७
[७]पाणिनीयाष्टाध्यायी सूत्रसंख्या २.४.७२
[८]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.२.४
[९]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१११
[१०]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.११९
[११]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०१
[१२]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.४.२
[१३]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.११९
[१४]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[१५]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[१६]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.११९
[१७]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०१

**कार्यासिद्धत्वं वा शास्त्रासिद्धत्वं वा इति विचारः –**

अयं विधिः शास्त्रासिद्धत्वमेव बोधयति न तु कार्यासिद्धत्वम्। अनेन शाधि,एधि इत्यादिषु **"हुझल्भ्यो हेर्धिः"**[१] इति धिभावः सिध्यति। तथा हि **"शासु अनुशिष्टौ"**[२] इति धातोः लोटि मध्यमपुरुषैकवचनविवक्षायां सिपः स्थाने हि इति आदेशे 'शास् हि' इति स्थिते, इदानीं **"शा हौ"**[३] इत्यनेन धातोः शा इत्यादेशः प्राप्नोति, झलन्तधातुत्वात् **"हुझल्भ्यो हेर्धिः"**[४] इति धिभावश्च प्राप्नोति। अत्र नित्यत्वात् शादेशे कृते 'शा हि' इति जाते, सिद्धान्ते शादेशस्यासिद्धत्वात् धातोः शासः झलन्तत्वात् हेः धिभावे शाधि इति रूपम्।

शास्त्रासिद्धत्वपक्षे 'शास् हि' इत्यवस्थायां प्राप्तयोः द्वयोः शास्त्रयोः नित्यत्वात् प्राप्तं शास्त्रं शादेशविधायकं **"शा हौ"**[५] इति शास्त्रम्। **"शा हौ"**[६] शास्त्रस्य लक्ष्ये कार्ये कर्तव्ये असिद्धत्वात् झलन्तत्वबुद्धेः अनिवर्तितत्वात् झलन्तनिबन्धने **"हुझल्भ्यो हेर्धिः"**[७] इति धित्वं सिध्यति। प्राचीनोक्तकार्यासिद्धत्वपक्षे तु अत्र शादेशरूपकार्ये कृते **"देवदत्तस्य हन्तरि हते देवदत्तस्य उज्जीवनं न"** इति देवदत्तहन्तृहतन्यायेन शादेशविधिना झल्बुद्धौ निवर्तितायां पश्चात् शाबुद्धिनिवर्तनेऽपि कृतकार्यं तु न निवर्तते। अतः अत्र शास्त्रासिद्धत्वपक्षः एव नवीनैः स्वीक्रियते।

**सूत्रार्थे 'समानाश्रये' इति पदाभावे दोषदर्शनम् –**

समानाश्रये तस्मिन् कर्तव्ये तदसिद्धं स्यात् इति अस्य सूत्रस्य अर्थः वर्णितः। अत्र 'समानाश्रये' इति पदाभावे सूत्रार्थः इत्थं फलति तस्मिन् कर्तव्ये तदसिद्धं स्यादिति। तदा पपुषः इत्यत्र दोषः। तथा हि **"पा पाने"**[८] इति धातोः **"परोक्षे लिट्"**[९] इत्यनेन लिट्लकारविवक्षायां तस्य **"लिटः कानज्वा"**[१०] इत्यतः लिटः इत्यनुवर्तमाने **"क्वसुश्च"**[११] इत्यनेन क्वसुरादेशे स्थानिवद्भावेन क्वसोः लिद्वात् धातोः द्वित्वे अभ्यासकार्ये च कृते 'प पा वस्' इत्यवस्थायां सुबन्तकार्ये पपिवान् इति रूपम्। अत्र पपिवस् इति प्रातिपदिकम्। तस्य द्वितीयाविभक्तिबहुवचनविवक्षायां प्रक्रियादशायां 'प पा वस् अस्' इत्यवस्थायां क्वसुप्रत्ययस्य कित्वमाश्रित्य अभ्यासात्परस्य पा इत्यस्य **"आतो लोप इटि च"**[१२] इति आल्लोपः प्रवर्तते। शस्प्रत्ययं च आश्रित्य **"वसोः संप्रसारणम्"**[१३] इति वसः संप्रसारणमपि प्रवर्तते। अत्र संप्रसारणे कृते

[१] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०
[२] पाणिनीयधातुपाठः अदादिगणः ७०
[३] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.३५
[४] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०
[५] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.३५
[६] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.३५
[७] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०
[८] पाणिनीयधातुपाठः भ्वादिगणः १०७४
[९] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.२.११५
[१०] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.२.१०६
[११] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.२.१०७
[१२] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.६४
[१३] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१३१

 ISSN : 2320-740X

ततः अजादिकित्प्रत्ययपरकत्वात् आतः लोपे 'प प् उस् अस्' इत्यवस्थायाम् **"आदेशप्रत्यययोः"**[१] इत्यनेन षत्वे पपुषः इति परिनिष्ठितं रूपम्। अत्र आल्लोपस्य निमित्तम् अजादिकित्प्रत्ययः। संप्रसारणे निमित्तं तावत् शस्प्रत्ययः। अतः आलोपे कर्तव्ये शसं निमित्तीकृत्य प्रवृत्तस्य सम्प्रसारणस्य असिद्धत्वात् अजादिकित्प्रत्ययपरकत्वाभावात् **"आतो लोप इटि च"**[२] इति आल्लोपाभावे पपुषः इति रूपं न सिध्येत्। अतः समानाश्रये इति वक्तव्यम्। समानाश्रये इति उच्यमाने तु आल्लोपस्य निमित्तं क्वसुप्रत्ययः, सम्प्रसारणस्य निमित्तं तावत् शसादिविभक्तिरिति अस्त्यत्र व्याश्रयः इति न कोऽपि दोषः।

ननु समानाश्रये इति उच्यमानेऽपि पपुषः इत्यत्र दोषः अस्त्येव। यतो हि आल्लोपः सम्प्रसारणमाश्रित्य प्रवर्तते। सम्प्रसारणं शसं निमित्तीकृत्य प्रवर्तते। अतः **"असिद्धं बहिरङ्गमन्तरङ्गे"**[३] इति परिभाषया अन्तरङ्गे आलोपे कर्तव्ये बहिर्भूतशसं निमित्तीकृत्य जायमानस्य सम्प्रसारणस्य असिद्धत्वात् अजादिकित्प्रत्ययः एव नास्तीत्यतः आल्लोपः कथमिति चेत् **"असिद्धं बहिरङ्गमन्तरङ्गे"**[४] इति परिभाषायाः अपवादभूता **"नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः"**[५] इति। अनया परिभाषया अज्निष्ठसम्प्रसारणजन्याजादिकित्प्रत्ययं निमित्तीकृत्य आल्लोपे कर्तव्ये जातस्य बहिरङ्गस्य सम्प्रसारणस्य असिद्धत्वमेव न। अतः अत्र आल्लोपे कर्तव्ये सम्प्रसारणं नासिद्धम्।

## सूत्रे आभात् इति पदस्य प्रयोजनम् –

सूत्रे आभात् इति पदं नास्ति चेत् सूत्रस्वरूपम् इत्थं फलति – **'असिद्धवदत्र'** इति। भाधिकारमभिव्याप्य अस्य सूत्रस्य प्रसक्तिः इति इदानीं वक्तुं न शक्यते। भाधिकारादूर्ध्वमपि कदाचिदस्य प्रवृत्तिः स्यात्। तदा अभाजि, रागः इत्यादौ दोषः। तथा हि **"भञ्जो आमर्दने"**[६] इति धातोः कर्मणि लुङि अडागमे, लुङः तङादेशे च्लिविकरणप्रत्यये, तस्य सिजपवादतया **"चिण्भावाकर्मणोः"**[७] इति चिण्प्रत्यये अनुबन्धलोपे च कृते, 'अभञ्ज् इ त' इत्यवस्थायां **"चिणो लुक्"**[८] इति तशब्दस्य लुकि **"भञ्जेश्च चिणि"**[९] इति अनुनासिकस्य लोपे **"अत उपधायाः"**[१०] इति भजः उपधायाः वृद्धौ सत्याम् अभाजि इति रूपम्। अत्र यदि भाधिकारादूर्ध्वमपि अस्य सूत्रस्य प्रसक्तिः स्यात् तदा अनुनासिकलोपेऽपि चिण्प्रत्ययः निमित्तभूतः उपधावृद्धिं प्रत्यपि चिण्प्रत्ययः निमित्तभूतः इति समानाश्रयत्वात् उपधावृद्धौ कर्तव्यायां नलोपस्य असिद्धत्वात् अदुपधत्वाभावात् वृद्ध्यभावे अभाजि इति रूपं न स्यात्। अत्र अदुपधत्वाभावात् आदौ नलोपः ततः वृद्धिः। अतः आभीयं प्रत्येव आभीयमसिद्धं नान्यं प्रति इति यथा स्यादित्येतदर्थं सूत्रे

[१] पाणिनीयाष्टाध्यायी सूत्रसंख्या ८.३.५९
[२] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.६४
[३] परिभाषेन्दुशेखरः ५०
[४] परिभाषेन्दुशेकरः ५०
[५] परिभाषेन्दुशेखरः ५१
[६] पाणिनीयधातुपाठः रुधादिगणः १६
[७] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.६६
[८] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१०४
[९] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.३३
[१०] पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.२.११६

आभाद्ग्रहणम्। आभाद्ग्रहणे सति "**अत उपधायाः**"[१] इति आभीयादूर्ध्वमस्तीति न काप्यनुपपत्तिः।

**अस्य सूत्रस्य अनित्यत्वप्रतिपादनम् –**

सूत्रमिदमनित्यम्। अस्य अनित्यत्वे ज्ञापकं तावत् "**श्नसोरल्लोपः**"[२] इति सूत्रस्थं तपरकरणमेव। तथा हि "**अस भुवि**"[३] इति धातोः लङ्लकारे प्रथमपुरुषे द्विवचने तसः तामित्यादेशः। तामः "**सार्वधातुकमपित्**"[४] इति सूत्रेण ङिद्वद्भावे 'अस् ताम्' इति स्थिते "**आडजादीनाम्**"[५] इति आडागमः प्राप्तः तामः ङित्त्वात् "**श्नसोरल्लोपः**"[६] इति अकारलोपश्च प्राप्तः। एतत्सूत्रद्वयमपि आभीयाधिकारे अस्ति। अतः "**जनसनखनां सञ्झलोः**"[७] इति सूत्रभाष्योक्तरीत्या आभीयेषु "**विप्रतिषेधे परं कार्यम्**"[८] इति परिभाषायाः प्रवृत्तिसत्वात् परत्वात् "**श्नसोरल्लोपः**"[९] इत्यनेन अकारस्य लोपे इदानीम् धातोः अजादित्वाभावात् "**आडजादीनाम्**"[१०] इति आडागमः नैव प्राप्नोति। अतः "**असिद्धवदत्राभात्**"[११] इति सूत्रेण अल्लोपस्य आभीयत्वेन असिद्धत्वात् "**पुनः प्रसङ्गविज्ञानात्सिद्धम्**"[१२] इति लक्ष्यभेदात् आटि आस्ताम् इति रूपं सिध्यति।

अत्र 'आ स् ताम्' इति स्थिते "**श्नसोरल्लोपः**"[१३] इति सूत्रे तपरकरणं नास्ति चेत् असः आटः लोपः प्राप्नोति। "**लक्ष्ये लक्षणं सकृदेव प्रवर्तते**" इति न्यायः अत्र न प्रवर्तते यतो हि पूर्वं अलोपः कृतः इदानीम् आलोपः क्रियते इति लक्ष्यभेदात्। "**असिद्धवदत्राभात्**"[१४] इति आटः असिद्धत्वादेव लोपः न भवतीति "**श्नसोरल्लोपः**"[१५] इत्यत्र तपरकरणं व्यर्थम्। तद्व्यर्थीभूय "**असिद्धवदत्राभात्**"[१६] सूत्रस्य अनित्यत्वं ज्ञापयति। अनित्यत्वे ज्ञापिते आटः असिद्धत्वाभावात् आलोपे प्राप्ते तद्वारणाय तपरकरणं चरितार्थम्। तपरकरणे तु अयमाकारः इति हेतोः पुनः तस्य लोपः न भवति। आस्ताम् इति रूपं सिध्यति।

अस्य असिद्धत्वात् देभतुः, ददम्भतुः इति रूपं सिध्यति। तथा हि "**दम्भु दम्भने**"[१७] धातोः लिटि

---

[१]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.२.११६
[२]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१११
[३]पाणिनीयधातुपाठः अदादिगणः ६०
[४]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.२.४
[५]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.७२
[६]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१११
[७]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.४२
[८]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.४.२
[९]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१११
[१०]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.७२
[११]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[१२]परिभाषेन्दुशेखरः ३९
[१३]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१११
[१४]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[१५]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१११
[१६]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[१७]पाणिनीयधातुपाठः स्वादिगणः २६


ISSN : 2320-740X

परस्मैपदे 'दम्भ् अतुस्' इति स्थिते **"असंयोगाल्लिट् कित्"**[१] इति दम्भः संयोगपरकत्वात् अतुसः कित्त्वाभावेऽपि **"श्रन्थिग्रन्थिदम्भीस्वञ्जीनां लिटः कित्वं वा"** इति वार्तिकेन विकल्पेन कित्त्वं विधीयते । कित्त्वपक्षे **"अनिदितां हल उपधायाः क्ङिति"**[२] इति दम्भः नकारस्य लोपे **"अत एकहल्मध्येऽनादेशादेर्लिटि"**[३] इत्यनेन एत्वाभ्यासलोपे देभतुः इति रूपं, कित्त्वाभावे ददम्भतुः इति रूपं च सिध्यति । यद्यपि **"अनिदितां हल उपधायाः क्ङिति"**[४] इति सूत्रम् एवं **"अत एकहल्मध्येऽनादेशादेर्लिटि"**[५] इति सूत्रं द्वयमपि आभीयाधिकारमस्ति । अतः **"अत एकहल्मध्येऽनादेशादेर्लिटि"**[६] इति एत्त्वे कर्तव्ये **"अनिदितां हल उपधायाः क्ङिति"**[७] इति नलोपस्य असिद्धत्वात् एत्वाभ्यासलोपयोः प्रसक्तिरेव नास्ति । किन्तु **"असिद्धवत्राभात्"**[८] इति शास्त्रस्य अनित्यत्वात् **"अनिदितां हल उपधायाः क्ङिति"**[९] इति नलोपः सिद्धः इत्यतः एत्वाभ्यासलोपौ भवतः एव ।

## सन्दर्भग्रन्थसूची


१. पाणिनीयाष्टाध्यायी ।

२. पाणिनीयधातुपाठः ।

३. कात्यायनवार्तिकम् ।

४. पतञ्जलिकृतवैयाकरणमहाभाष्यम् ।

५. वैयाकरणसिद्धान्तकौमुदी ।

६. नागेशभट्टविरचितः लघुशब्देन्दुशेकरः ।

७. भट्टोजीदीक्षीतकृतप्रौढमनोरमा ।

८. प्रदीपोद्योतसहितं महाभाष्यम् ।




[१]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.२.५
[२]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२४
[३]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१२०
[४]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२४
[५]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१२०
[६]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१२०
[७]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२४
[८]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२२
[९]पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.२४

# हलन्तेभ्यः स्त्रियां टाब्विधानविचारः

डा. शिवकुमारी काटूरि*
सहायकाचार्या (सं.),
भा.ती.शा.स.के., शृङ्गेरी

***लेखसारः*** *–*

1. *अजन्तेषु अदन्तेभ्यः इदन्तेभ्यः उदन्तेभ्यः ऋदन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां टाप्-आदयः प्रत्ययाः विहाताः ।*
2. *हलन्तेषु नान्तेभ्यः प्रातिपदिकेभ्यः ङीप्-आदयः प्रत्ययाः विहिताः ।*
3. *भागुरिमते हलन्तेभ्यः प्रातिपदिकेभ्यः आप् भवतीति वष्टिभागुरीति कारिकया बोध्यते, तेन दिशा, निशा इत्यादयः सिद्धाः ।*
4. *ङ्याप्प्रातिपदिकात् सूत्रे आप्-ग्रहणस्य प्रयोजनं बहुराजा इति डाबन्तं प्रदर्शयता भाष्यकृता हलन्तेभ्यः टाप् न भवतीति ज्ञाप्यते इति नागेशः ।*
5. *क्रुञ्चादीनां टाबन्तत्वं तु अदन्तत्वादेव इति निरूपणम् । एते अंशाः अत्र पत्रे प्रस्तूयन्ते ।*

***कूटशब्दाः*** *–स्त्रीयाम्, प्रत्ययः, हलन्तः, टाप्, आप्, ङीप्, डाप्, कौमुदी, भागुरिः, भाष्यम्, नागेशः, शेखरः, अजादिगणः ।*

**स्त्रियां अन्त्यवर्णमाश्रित्य प्रत्ययविधानम्** – स्त्रियां प्रत्ययविधाने पाणिनिना अनुसृतेषु मार्गेषु अन्यतमः अन्त्यवर्णमाश्रित्य प्रत्ययविधानम् । अजन्तेषु अदन्तेभ्यः टाप्[१] तदपवादत्वेन अर्थविशेषे पुंयोगादाख्यायाम् इत्यादिभिः ङीषादयः, मनुष्यजातिवाचिभ्यः इदन्तेभ्यः ङीष्[२], मनुष्यजातिवाचिभ्यः उदन्तेभ्यः ऊङ्[३], ऋकारान्तेभ्यः ङीप्[४] इति विधानं दृश्यते ।

हलन्तेषु नान्तेभ्यः प्रत्ययविधाने विभागःएवं दृश्यते, मन्नन्तः[५], वन्नन्तः[६], उपधालोपी अन्नन्तबहुव्रीहिः[७], अनुपधालोपी अन्नन्तबहुव्रीहिः[८] इति । नान्तेभ्यः अतिरिक्ताः क्रुञ्च्, उष्णिह्, देवविश् इत्येते अजादिषु पठिताः, तेभ्यः टाप्, बहुव्रीहौ ऊधस्-शब्दात् ङीष्[९] । सामान्येन सर्वेभ्यः हलन्तेभ्यः प्रत्ययविधानं न दृश्यते, तथापि भागुर्याचार्यस्य मते तु हलन्तेभ्यः आप्-भवतीति काचित् कारिका वैयाकरणसिद्धान्तकौमुद्यामुपलभ्यते[१०] –

**वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः । आपञ्चैव हलन्तानां यथा वाचा तथा निशा ॥इति ।**

---

***सम्पर्कसूत्रम्** - 8688989515, Email- sivakumarik@sanskrit.ac.in*

[१] अजाद्यतष्टाप् पा.सू. 4-1-4
[२] इतो मनुष्यजातेः पा.सू. 4-1-65
[३] ऊङुतः पा.सू. 4-1-66
[४] ऋन्नेभ्यो ङीप् पा.सू. 4-1-5
[५] मनः पा.सू. 4-1-11
[६] वनो र च पा.सू. 4-1-7
[७] अन उपधालोपिनोन्यतरस्याम् पा.सू. 4-1-28
[८] अनो बहुव्रीहेः पा.सू. 4-1-12
[९] बहुव्रीहेरुधसो ङीष पा.सू. 4-1-25
[१०] अव्ययादाप्सुपः पा.सू. 2-4-82

**अयमर्थः** – भागुरिमते अव अपि इत्यनयोः उपसर्गयोः अकारलोपो भवति यथा- अपिधानम् – पिधानम्। हलन्तेभ्यः स्त्रियां आप् प्रत्ययो भवति यथा दिश् आप् – दिशा, निश् आप् – निशा इति।

इदं च भाष्यासम्मतमिति नागेशः। तत्र **शेखरः**[१] – इदं च भाष्ये न दृश्यते। निश्दिशोः इगुपधलक्षणे के अदन्तत्वादेव टाप्। क्विनि दिगित्यपि। अत एव ङ्याप्प्रातिपदिकात् इति सूत्रे आब्ग्रहणं न कार्यम्, अकारान्ताट्टाप् तत्रान्तवद्भावात् प्रातिपदिकत्वेनैव सिद्धम्, यस्तर्ह्यनकारान्तात् क्रुञ्चा, उष्णिहा, देवविशेति अत्राप्यकारान्तादेव क्रुञ्चानालभेत, उष्णिहककुभौ, देवविशमिति, अन्त्ये कप्रत्ययः एवं विषयः इत्युक्त्वा बहुराजेति डाबन्तार्थमाब्ग्रहणम् इति भाष्ये उक्तं सङ्गच्छते। तस्माद्वाचेत्याद्यसाध्वेव।

**अयमभिप्रायः** – ङ्याप्प्रातिपदिकात् इति सूत्रे आब्ग्रहणं नापेक्षितम्, खट्वादीनां प्रत्ययान्तत्वात् प्रातिपदिकाभावे स्वाद्युत्पत्तिः न स्यात् तदर्थम् आब्ग्रहणमिति चेत् न। तत्र खट्व इति अदन्तात् टापि सवर्णदीर्घे पूर्वान्तवद्भावेन प्रातिपदिकत्वात् सूत्रे आब्ग्रहणं विनैव स्वाद्युत्पत्तिः भवति।

क्रुञ्च्, उष्णिह् इत्यादयः ये अनकारान्ताः, अजादित्वात् तेभ्यः टापि क्रुञ्चा उष्णिहा इत्यादीनि रूपाणि सिध्यन्ति, तेभ्यः स्वाद्युत्पत्त्यर्थं आब्ग्रहणमिति चेत् तदपि न, तत्रापि अदन्तेभ्य एव टाब्विधानात् पूर्ववत् पूर्वान्तवद्भावेनैव प्रातिपदिकत्वं स्वाद्युत्पत्तिश्च सिध्यति। एषां कथमदन्तत्वमिति चेत् प्रमाणमुच्यते – क्रुञ्चानालभते अत्र क्रुञ्चान् इति द्वितीयाबहुवनचनान्तः अदन्तात् शसि क्रुञ्चान् इति भवति न तु हलन्तात्। एवम् उष्णिहककुभौ इति प्रयोगे उष्णिह इति अकारान्तः दृश्यते। एवञ्च अदन्तेभ्यः एतेभ्यः टाप्, एतदर्थमपि सूत्रे आब्ग्रहणं नापेक्षितम्।

**अत्र कश्चन संशयः** - देविशम् इति तु अदन्तात् अमि रूपमिति कथं वक्तुं शक्यम्, हलन्तादपि अमि समानं रूपम्

**समाधानम्** - स्वरे भेदः। अदन्तात् अमि अन्तोदात्तः, हलन्तात् अमि स्वरितान्तम्। देवदिश इति मूलविभुजादित्वात् क-प्रत्यये[२] थाथादिस्वरेण[३] अन्तोदात्तः, तस्मात् अमि सुप्स्वरेण सः अनुदात्तः[४], देवविश अम् अकारयोः पूर्वरूपैकदेशे[५] उदात्तानुदात्तयोः एकादेशे अनुदात्तस्य उदात्ते[६] देवविशम् इति अन्तोदात्तः। देवविश् क्विबन्तः कृदुत्तरपदप्रकृतिस्वरेण[७] अन्तोदात्तः तस्मात् अमि तस्य अनुदात्तत्वात्, उदात्तादनुदात्तस्य स्वरितः इति स्वरितान्तः भवति। वेदे देवविशम् इति अन्तोदात्तः श्रूयते तस्मात् अदन्त एव।

एवञ्च आब्ग्रहणस्य प्रयोजनं बहुराजा इति डाबन्तं दर्शयति यदि हलन्तेभ्यः टाप्प्रत्ययः अभिमतस्स्यात् तर्हि आपः प्रयोजनत्वेन निशा दिशा इत्यादि एव दर्शयेत्, तथा अकणात् हलन्तेभ्यः टाप् भाष्यकृतः सर्वथा अनभिमतः इति ध्वन्यते।

**अत्र शङ्का** – तथा सति निशा दिशा अनयोः सिद्धिः कथं स्त्रियामिति

[१]अव्ययादाप्सुपः पा.सू. 2-4-82
[२]कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् (वा, पा.सू. 3-2-5)
[३]थाथघञ्क्ताजबित्रकाणाम् पा.सू. 6-2-144
[४]अनुदात्तौ सुप्पितौ पा.सू. 3-1-4
[५]अमि पूर्वः पा.सू. 6-1-107
[६]एकादेश उदात्तेनोदात्तः पा.सू. 8-2-5
[७]गतिकारकोपपदात् कृत् पा.सू. 6-2-139

**समाधानम्** – निश् दिश् इति आभ्याम् इगुधभ्यां कप्रत्यये[१] सिद्धाभ्याम् अदन्ताभ्यां टाप्[२]।

**पुनः शङ्का** – तर्हि वाचा इत्यादीनां कथं सिद्धिः

**समाधानम्** – तेषामसाधुत्वम् इति नागेशोपाध्यायाः ।

**दीक्षिताभिप्रायः** – हलन्तेभ्यः टापः विधाने दीक्षितानां मतमिदमित्थमिति यद्यपि स्फुटं वक्तुमशक्यं तथापि तद्व्यवहारेण तदभिप्रायो अनुमीयते तत्र च स्थलद्वयं वर्तते -

1. प्रौढमनोरमायां दीक्षितैः, कारिकायां वर्तमानानां वाचादीनां ग्रहणं परिगणमिति केचन, उदाहरणमात्रमिति केचन वदन्तीत्युक्त्वा एतेषां हलन्तात् टाब्विधानेन सिद्धिरेवाङ्गीक्रियते इति भाति ।
2. अव्ययं विभक्तीति सूत्रे अव्ययमिति योगविभागस्य फलं वदद्भिः दीक्षितैः दिशयोर्मध्ये अपदिशम्[३] इति व्याख्यातम् । अत्र च प्रौढमनोरमायां दिशोर्मध्ये इति विग्रहेपि अपदिशम् इत्येव रूपमिति व्याख्याद्भिः दीक्षितैः हलन्तादेव टाप् इति उररीकृतमिति भासते ।

गणरत्नमहोदधौ हलन्तेभ्यः टाब्विधाने परिगणनं किञ्चिल्लभ्यते, तदित्थम् –

**दिशा दृशा क्षुधा वाचा क्रुञ्चा देवविशोष्णिहा । विकल्पाडो बुधैर्लक्ष्या जातिः शूद्रोमहत्परः ॥**[४]

**अयं भावः** – दिशा–दिक्, दृशा–दृक्, क्षुधा–क्षुत्, वाचा–वाक्, क्रुञ्चा–क्रुङ्, देवविशा–देवविट्, उष्णिहा–उष्णिक्, एतेभ्यः हलन्तेभ्यः आट् विकल्पेन भवतीति जातौ अमहत्पूर्वात् शूद्रशब्दात् आट् भवतीति ।

तत्रैव पाणिनिस्तु क्रुञ्चा देवविशा उष्णिहा इत्येषां त्रयाणां विकल्पं नेच्छति, भाष्यकारस्तु हलन्तेभ्यःआप् न भवति अकारान्तादेव टाप् इत्याह इति च व्याख्यातम् ।

**निष्कर्षः** –

1. निशा, दिशा, क्रुञ्चा, उष्णिहा, देवविशा इत्येते अदन्तात् टापि सिद्ध्यन्ति, न तु हलन्तात् टापि ।
2. आब्ग्रहणस्य प्रयोजनं बहुराजा इति प्रदर्शयता भाष्यकृता हलन्तेभ्यः टाप् न भवतीति ज्ञाप्यते इति नागेशः ।
3. दीक्षितास्तु हलन्तात् टापं समर्थयन्तीति तद्व्यवहाराद् ज्ञायते ।

**सन्दर्भग्रन्थसूची** –


1. वैयाकरणसिद्धान्तकौमुदी, तत्त्वबोधिनीबालमनोरमालघुशब्देन्दुशेखरोपेता, चौखम्बासुरभारती-प्रकाशनम्
2. लघुशब्देन्दुशेखरः, चौखम्बासुरभारतीप्रकाशनम्
3. गणरत्नमहोदधिः, मोतीलालबेनारसीदासः


[१]इगुपधज्ञाप्रीकिरः कः पा.सू. 3-1-135

[२]अजायतष्टाप् पा.सू 4-1-4

[३]नाव्ययीभावादतोम्त्वपञ्चम्याः पा.सू. 2-4-83

[४]गणरत्नमहोदधिः, प्रञ्चमोध्यायाः, 40 श्लोकः


ISSN : 2320-740X

# वैयाकरणमतानुसारं धात्वर्थनिरूपणम्

श्री.उज्ज्वलः एस्*
सहायकाचार्यः, के.सं.वि.,
मुक्तस्वाध्यायपीठम्, शृङ्गेरी

***लेखसारः*** *– धातुः सर्वेषां क्रियापदानां मूलभूतः आधारः भवति, अतः तस्य अर्थनिर्णयः वाक्यार्थबोधे निर्णायकं स्थानं धारयति। धात्वर्थविषये वैयाकरण-नैयायिक-मीमांसकादीनां भिन्नभिन्नानि मतानि दृश्यन्ते। नैयायिकाः यत्नं धात्वर्थत्वेन स्वीकुर्वन्ति, मीमांसकाः फलं धात्वर्थः, व्यापारः प्रत्ययार्थः इति मन्यन्ते, वैयाकरणास्तु फलानुकूलव्यापारमेव धात्वर्थत्वेन प्रतिपादयन्ति। अस्मिन् अध्ययने धात्वर्थस्य स्वरूपं, फलव्यापारसम्बन्धः, सकर्मकत्वाकर्मकत्वविचारः, तथा ज्ञा, इष्, पत्, कृञ्, भू, अस् इत्यादि धातूनां विशिष्टार्थाः समीक्षिताः। अध्ययनात् ज्ञायते यत् धातोः केवलं फलवाचित्वं न युक्तम्, अपि तु फलानुकूलव्यापारस्यापि बोधकत्वं स्वीकार्यमिति। एतेन कर्तृकर्मव्यवस्था, क्रियाप्रधानता, तथा वाक्यार्थनिर्णयः सम्यगुपपद्यते। अध्ययनस्य निष्कर्षः अयं यत् धात्वर्थविचारे वैयाकरणमतमेव अधिकयुक्तियुक्तम्, भाषाशास्त्रसम्मतं च दृश्यते इति। धातोः व्यापारप्रधानता वाक्यबोधस्य आधारभूता अस्ति तथा संस्कृतभाषायाः तात्त्विकगाम्भीर्यं प्रकाशयति।*

***कूटशब्दाः*** *– अनुकूलत्वम्, विशेष्यता, प्रकारता, समभिव्याहारः, सकर्मकत्वम्, अकर्मकत्वम्, कर्तृस्थक्रिया, कर्मस्थक्रिया, कर्तृस्थभावकत्वम्, कर्मस्थभावकत्वम्, विषयता।*

तत्र व्याकरणस्मृतिः शब्दसाधुत्वपरा। शब्दाः अत्र धातुमूलकाः भवन्ति। तेभ्यः धातुभ्यः अनेके प्रत्ययाः विधीयन्ते। यथा तिङ्, कृत्, तद्धित, सनादयः। तत्र धातुप्रकृतिकतिङां कोऽर्थः इति जिज्ञासायां मीमांसकाः आहुः आख्यातार्थः भावना इति। नैयायकाश्च कृतिरिति। इत्येवं द्वाभ्यां मताभ्यां विप्रतिपत्तौ सत्यां तत्र सिद्धान्तत्वेन वैयाकरणभूषणकारोक्तदिशा एवं मञ्जूषाकारोक्तरीत्या च धात्वर्थः व्यापारः एव इति प्रतिपाद्यते। तत्रादौ लडाद्यन्ते भावनायाः अवाच्यत्वं वदतः प्राभाकरादीन् प्रति ग्रन्थकारः आह।

**व्यापारो भावना सैवोत्पादना सैव च क्रिया।**
**कृञोऽकर्मकतापत्तेः न हि यत्नोऽर्थ इष्यते**[1]**।**

तथा हि पचति पाकं करोति इति विवरणेन यः प्रकृत्यतिरिक्तः प्रयत्नः बुध्यते सोऽपि तिङन्तबोध्यः इत्येव अङ्गीकार्यः भवति। तथा च विवरणेन पाकमात्रस्य तद्वाच्यत्वं बोध्यते। तदनुकूलव्यापारस्य वाच्यत्वं नास्ति इति कथने विनिगमकाभावात्। एवञ्च उभावपि अत्र फलव्यापारौ धातुवाच्यौ एव। तथा च भावनाशब्देन मीमांसकैरभिधीयमाना या भावना सैव कृतिशब्देन नैयायिकैरभिधीयते। तत्र भावना एव व्यापारः, सैव कृतिः। सर्वोऽपि पदार्थः व्यापारः एव इति कृतिभावनादिशब्दैः यः प्रसिद्धः, स सर्वोऽपि अर्थः व्यापारः एव।

तथा च फलानुकूलतया भासमानस्य सर्वस्यापि व्यापारत्वं सिध्यति। एतेन फूत्करादीनाम् अयत्नादीनामपि व्यापारपदवाच्यत्वं सिध्यति। तत्र फलं धात्वर्थः, कृतिः आख्यातार्थः, व्यापारे लक्षणा

---

***सम्पर्कसूत्रम्** - 9902712761, Email- ujjvalsspiderujjvals@gmail.com

[1]वैयाकरणभूषणसारः

इति नैयायिकमतमपि निरस्तं भवति ।

## नैयायिकमतम्,तन्निरासश्च

ननु लाघवानुरोधेन कृतौ शक्तिः कल्प्यते । यतः कृतित्वजात्यपेक्षया फूत्करादीनां तद्वाच्यत्वस्वीकारे शक्यतावच्छेदकगौरवम् । तत्र अचेतने क्रियाप्रतीतिः न स्यादिति क्रियाप्रतीत्यर्थं व्यापारे शक्तिः कल्पनीया इति न वाच्यम् । लघ्वर्थे एव शक्तिग्रहः युक्तः । अतः लघुधर्मस्यैव शक्यतावच्छेदकौचित्यात् कृतित्वस्यैव शक्यतावच्छेदकत्वम् । रथो गच्छति, जानाति इत्यादौ लक्षणया व्यापारत्वादिप्रकारकबोधः इति चेत् न, यथा तन्मते लक्ष्यतावच्छेदकधर्मः स्वीक्रियते, तथा शक्यतावच्छेदकत्वस्य गुरुधर्मस्य स्वीकारेपि बाधकाभावात् । फूत्कारत्वादिकमेव शक्यतावच्छेदकम् । लोके फूत्कारादित्वप्रकारकबोधस्य अनुभवसिद्धत्वात् गौरवम् अकिञ्चित्करम् । ननु पचति पाकं करोति इति यत्नार्थककरोतिना विवरणात् यत्नः एव आख्यातार्थः, व्यापारबोधस्तु लक्षणया इति चेन्न, तन्तवः कुर्वन्ति इत्यत्र कृञः मुख्यार्थत्वाभावेऽपि **“बीजादिना अङ्कुरः कृतः”**[1] इत्यत्र तु मुख्यार्थत्वम् आश्रयणीयमेव । ततश्च अचेतनकर्तृकव्यापारस्थलेऽपि कृञः प्रयोगात् न केवलं चेतनव्यापारार्थकत्वं कृञः । अत एव **रथो गच्छति** इत्यस्य रथो गमनं करोति इति विवरणं दृश्यते । तत्रापि कृ इति धातोः प्रयोगात् न केवलं चेतनव्यापारार्थकत्वं कृञः इति भावः । तथा च उत्पत्तिरूपफलसहितः व्यापारः एव कृञर्थः इति सिध्यति । एवं च विवरणप्रामाण्येन तिङन्ते भावनायाः प्रतीतिम् उपपाद्य प्राभाकरैः नैयायिकैः च तस्य अवश्याभ्युपगन्तव्यत्वमुक्त्वा तथा नाङ्गीकारे दोषो भवति इति उक्तम् । सम्प्रति नैयायिक-मीमांसकादीनामपि समानः दोषः प्रदर्श्यते । ननु भावनायाः धातुवाच्यत्वाभावे घटं भावयति इत्यत्र इव घटो भवति इत्यत्रापि द्वितीया स्यात् । तथा च दृष्टान्तः साध्यते - भावयतीति णिजन्तम् । भूधातोः फलं च उत्पत्तिः । उत्पत्त्यनुकूलः व्यापारः प्रेरणारूपः णिजर्थः । णिजर्थव्यापारस्य फलम् उत्पत्तिः । एवं च उत्पत्त्यनुकूलव्यापारानुकूलव्यापारजन्यफलाश्रयत्वेन घटस्य कर्मत्वात् द्वितीयायां घटं भावयति इति प्रयोगः सिध्यति । एवमेव दार्ष्टान्तिके घटो भवति इत्यत्रापि धात्वर्थफलम् उत्पत्तिः । उभयोर्मते केवलफलस्यैव धात्वर्थत्वात् । व्यापारस्य धात्वर्थत्वाभावात् कर्तुरभावे कर्मसंज्ञायां बाधाभावात् द्वितीया स्यादिति चेत्, तत्र घटस्य आख्यातार्थकृत्याश्रयत्वेन कर्तृत्वम्, फलाश्रयत्वेन घटस्य कर्मत्वम् इति संज्ञाद्वयस्य प्राप्तौ आकडाराधिकारबलात् परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् न द्वितीयापत्तिः इति न वाच्यम् । तत्र चेतनाचेतनसाधारणव्यापाराश्रयस्यैव कर्तृत्वमिति तादृशस्य त्वन्मते दुर्वचत्वेन घटस्य अत्र अकर्तृत्वमेव ।

तथा सति अत्र नैयायिकमीमांसकयोः प्रश्नः भवति । कुतः अत्र आख्यातार्थव्यापाराश्रयत्वं कर्तृ-त्वं न वाच्यम् इति, तत्र उच्यते - आख्यातार्थव्यापाराश्रयस्य कर्तृत्वे **“पाचयति देवदत्तो विष्णुमित्रेण”** इत्यत्र विष्णुमित्रस्य अकर्तृतापत्तौ तृतीयानापत्तिः दोषः । अस्मिन् स्थले विष्णुमित्रः पचति इति अण्य-न्तावस्थायाम् आख्यातार्थव्यापाराश्रयत्वेन विष्णुमित्रस्य कर्तृत्वं सुलभम् । देवदत्तः विष्णुमित्रेण पाच-यति इत्यत्र पच्धात्वर्थः विक्लित्तिरूपफलमात्रम् । णिच्-प्रत्ययार्थः प्रेरणारूपव्यापारः । तिप्प्रत्ययार्थस्तु

[1]धात्वर्थनिर्णयःवैयाकरणभूषणासारः


ISSN : 2320-740X

णिजर्थः एव । तथा च आख्यातार्थप्रेरणानुकूलव्यापाराश्रयत्वात् देवदत्तस्य कर्तृत्वं सिद्धम् । प्रयोज्यस्य विष्णुमित्रस्य व्यापारस्तु न कस्याप्यर्थः इति कृत्वा विष्णुमित्रे आख्यातार्थव्यापाराश्रयत्वस्य अभावेन कर्तृत्वस्य निरूपयितुम् अशक्यत्वात् कर्तृत्वाभावे कर्तरि तृतीया न स्यात् । वैयाकरणानां मते तु पच्-धातुः एव अत्र विक्लित्तिरूपफलं, तदनुकूलव्यापारं च बोधयतीति धात्वर्थविक्लित्यनुकूलव्यापाराश्रयत्वेन कर्तृत्वं सुलभमिति तृतीया उपपद्यते । अपि च पाचयति इत्यत्र णिजेव दुर्लभः स्यात् । तथा हि **"तत्प्रयोजको हेतुश्च"**[१] इति सूत्रेण कर्तृप्रयोजकस्य हेतुसंज्ञा विधीयते । तादृशहेतुगतव्यापारे विवक्षिते धातोः **"हेतुमति च"**[२] इति सूत्रेण णिच्प्रत्ययः । तत्र देवदत्तस्य हेतुत्वं तावत् विष्णुमित्रनिष्ठकर्तृत्वाधीनम् । यतः विष्णुमित्ररूपकर्तुः प्रयोजकः देवदत्तः इति । तथा च यावत्पर्यन्तं विष्णुमित्रस्य कर्तृत्वं न सिध्यति तावत्पर्यन्तं देवदत्तस्य हेतुत्वमपि न सिध्यति इति हेतुगतव्यापारविवक्षायां विधीयमानः णिजपि दुर्लभः इति यावत् । अतः आख्यातार्थव्यापाराश्रयत्वं कर्तृत्वं इति न वाच्यम् ।

अत्र शब्दशास्त्रे **"प्रथमान्तार्थः एव मुख्यविशेष्यः"**[३] इति तार्किकमतस्य खण्डनम् अस्ति । नागेशः शाब्दिकमतं समर्थयन् दर्शयति यत् तिङन्तपदस्य अर्थः केवलं प्रथमान्तपदार्थप्रधानो न भवति, अपि तु क्रियाप्रधानो भवति इति ।

"पश्य मृगो धावति" इति वाक्यं गृह्णीमः । शाब्दिकमतानुसारं "मृगो धावति" इति वाक्येन मृगकर्तृकधावनक्रिया बोध्यते । ततः "पश्य" इति पदेन तस्य धावनस्य दर्शनं विधीयते । अतः अत्र बोधः भवति "त्वं मृगकर्तृकं धावनं पश्य" इति । अत्र प्रधानविषयः धावनक्रियैव, मृगः तु तस्याः कर्तृतया विशेषणमात्रम् । यतः "धावति" इति तिङन्तपदं न तु प्रातिपदिकम्, अतः तस्मात् द्वितीयाविभक्तिः न भवति । कर्मत्वं तु सम्पूर्णधावनक्रियायाः एव स्वीक्रियते ।

एवमेव "पचति भवति" इत्यत्र "पचिक्रियायुक्ता सत्ता" इति बोधः । अत्र "भवति" इति क्रिया प्रधानत्वेन वर्तते, "पचति" इति तस्याः विशेषणरूपेण वर्तते । एतदेव हरिणा उक्तम् - यथा सुबन्तं तिङन्तस्य विशेषणं भवति, तथा तिङन्तमपि अन्यस्य तिङन्तस्य विशेषणं भवितुमर्हति इति ।

परन्तु तार्किकमतानुसारं "मृगो धावति" इत्यत्र "मृगः" मुख्यविशेष्यः, "धावति" इति तस्य विशेषणम् । अतः "पश्य मृगो धावति" इत्यस्य अर्थः एवं स्यात्, "धावनक्रियायुक्तं मृगं पश्य" इति । नागेशः वदति यत् यदि एषः अर्थः स्वीकृतः, तर्हि "मृग" शब्दः कर्मत्वेन गृहीतः स्यात् । कर्मत्वे सति द्वितीयाविभक्तिः स्यात् । तर्हि "पश्य मृगं धावन्तम्" इति प्रयोगः नित्यं भवेत्, "पश्य मृगो धावति" इति प्रयोगस्तु न सिध्येत् । किन्तु व्यवहारे एषः प्रयोगः दृश्यते, अतः तार्किकमतं न युक्तम् ।

यदि "धावति मृगः" इति समग्रवाक्यमेव कर्मरूपेण स्वीक्रियते, तथापि "मृग" शब्दस्य कर्मत्वं निवारयितुं न शक्यते । महाभाष्ये **"अनभिहिते"**[४]इत्यधिकारस्य व्याख्याने यः सिद्धान्तः प्रतिपादितः, तदनुसारं विशेष्यस्य विशेषणस्य च उभयोरपि कारकान्वयः सम्भवति । यथा **"कटं भीष्मं करोति"** इत्यत्र "कट" तथा "भीष्म" उभयोरपि कर्मत्वं स्वीक्रियते । तथैव अत्रापि "मृग" शब्दस्य कर्मत्वं प्रसज्येत ।

---

[१]अष्टाध्यायी १.४.५५

[२]अष्टाध्यायी ३.१.२६

[३]व्युत्पत्तिवादः

[४]अष्टाध्यायी २.३.१

तेन द्वितीयाविभक्तेः अनिवार्यता स्यात्।

किन्तु शाब्दिकमते दोषो नास्ति। यतः "मृगो धावति" इत्यत्र मृगशब्दः स्वतन्त्रकर्म न भवति। सम्पूर्णा धावनक्रियैव "पश्य" इत्यस्य कर्म भवति। अतः "मृग" शब्दात् द्वितीयाविभक्तेः प्रसङ्गो न भवति, तथा लौकिकः प्रयोगः "पश्य मृगो धावति" इति स्वरसतया सिद्ध्यति।

अतः वैयाकरणानां निष्कर्षः अयम् - तार्किकानां **"प्रथमान्तार्थमुख्यविशेष्यकबोधः"** इति मतं व्याकरणदृष्ट्या नोपपद्यते। क्रियाप्रधानबोधरूपं शाब्दिकमतमेव युक्तम्। "मृगो धावति" इत्यत्र मृगः प्रधानो न। अपि तु धावनक्रियैव प्रधानार्थः। मृगः तस्याः कर्तृत्वेन विशेषणमात्रम्। एतेन विभक्तिव्यवस्था, वाक्यबोधः, पाणिनीयव्याकरणसिद्धान्ताश्च सर्वे सम्यगुपपद्यन्ते।

मञ्जूषायां नागेशः "ज्ञा" इति धातोः अर्थस्वरूपं सूक्ष्मतया विवेचयति। विशेषतः ज्ञानक्रियायाः स्वरूपं, तस्य फलम्, व्यापारः कः इत्यादि विषयं विवेचयति।

शाब्दिकानां मते "जानाति" इति धातोः प्रयोगे ज्ञानम् एव फलम् अस्ति, न तु व्यापारः। ज्ञानस्य उत्पत्तिः यत् परिणामरूपं कार्यम्, तत् फलत्वेन स्वीक्रियते। व्यापारस्तु आत्मनः मनसा सह संयोगः। ज्ञानोत्पत्तेः पूर्वं आत्मा मनसा, मनश्च विषयेण सम्बध्यते। एषः सम्बन्धविशेषः व्यापारः इति कथ्यते। अतः "जानाति" इत्यत्र ज्ञानं फलम्, आत्ममनसोः संयोगः व्यापारः इति सिद्धान्तः।

एतदेव मतं "मनो जानाति" इत्यादिप्रयोगेभ्यः समर्थ्यते। यद्यपि वस्तुतः आत्मा ज्ञाता अस्ति, तथापि मनः अन्तःकरणरूपेण आत्मनः उपकरणत्वात् ज्ञानक्रियायां प्रमुखसाधनं भवति। अतः उपचारेण "मनो जानाति" इति व्यवहारः दृश्यते। महाभाष्येऽपि **"आत्मा आत्मानं जानाति"** इत्यादौ अन्तःकरणावच्छिन्नः आत्मा कर्ता, शरीरावच्छिन्नः आत्मा कर्म इति निरूपितम्। अनेन ज्ञाने आत्मनः विभिन्नावच्छेदकभेदेन कर्तृत्वकर्मत्वव्यवस्था स्वीकृता।

अन्ये तु एवं ब्रुवन्ति यत् ज्ञानमेव व्यापारः, आवरणभङ्गः अथवा विषयता वा तस्य फलम् इति। अर्थात् विषयस्य अज्ञानरूपावरणनिवृत्तिः अथवा विषयस्य ज्ञेयत्वरूपावस्था वा फलम् इति, ज्ञानं तु व्यापारः। नागेशः एतन्मतं नाङ्गीकरोति। यतः तेषां मते यदि ज्ञानमेव व्यापारः इति स्वीक्रियेत, तर्हि "ज्ञा" इति धातुः कर्मस्थक्रियाकधातुः स्यात्। एषा व्यवस्था वैयाकरणमतानुसारं न युक्ता।

अत्र हरिणा उद्धृतः श्लोकः-

**विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।**
**क्रियाव्यवस्थात्वन्येषां शब्दैरेव प्रकल्पिता॥**[1]

अस्य तात्पर्यम् एतत् यत् यत्र क्रियया कर्तरि वा कर्मणि वा कश्चन विशेषः उत्पद्यते, तत्र क्रिया तस्मिन् एव व्यवस्थितेति उच्यते। उदाहरणार्थं **"भिनत्ति काष्ठम्"** इत्यत्र द्वैधीभावः कर्मणि एव दृश्यते, न तु कर्तरि। अतः भेदनक्रिया कर्मस्थक्रिया इति कथ्यते।

परन्तु "पश्यति घटम्", "ग्रामं गच्छति", "हसति", "जानाति" इत्यादिषु स्थितिः भिन्ना अस्ति। अत्र फलं केवलं कर्मणि न, अपितु कर्तृकर्मणोः उभयोरपि वर्तते॥ यथा ज्ञाने विषयता कर्मणि, ज्ञानसमवायः कर्तरि च भवति। तेन ज्ञानं कर्तृकर्मसाधारणं फलम् इति स्वीकर्तव्यम्। एवमेव

[1]वाक्यपदीयम् {३.७.६६}


ISSN : 2320-740X

दर्शनक्रियायामपि विषयस्य दृश्यत्वं, ज्ञातुः दर्शनानुभवश्च उभयत्र भवति ।

यदि आवरणभङ्गः अथवा विषयता एव फलम् इति स्वीक्रियेत, तर्हि तत् फलं केवलं कर्मणि एव स्थितं स्यात् । फलस्य कर्मनिष्ठत्वात् "ज्ञा" इति धातुः "भिनत्ति" इत्यादिवत् कर्मस्थक्रियाकधातुः स्यात् । किन्तु व्यवहारे तथा न दृश्यते । ज्ञानं केवलं विषयगतपरिवर्तनं न, अपितु ज्ञातुः अपि अवस्थाविशेषः । अतः ज्ञानस्य फलत्वं, आत्ममनःसंयोगस्य व्यापारत्वं च युक्तम् ।

अतः अस्य सम्पूर्णस्य चर्चायाः निष्कर्षः अयम् यत् "ज्ञा" धातोः फलं ज्ञानं, आत्ममनसोः संयोगः व्यापारः । ज्ञानमेव व्यापारः, विषयता, आवरणभङ्गः वा फलम् इति मतं न युक्तम् । एतेन ज्ञानक्रियायाः कर्तृकर्मसम्बन्धः, सकर्मकत्वम्, तथा वैयाकरणानां क्रियाव्यवस्था सम्यगुपपद्यते ।

सम्प्रति इष्, पत्, कृञ् इति धातूनामर्थविचारः क्रियते । एतेषां धातूनां स्वरूपं व्याकरणदृष्ट्या फल-व्यापार-विभागपूर्वकं निरूप्यते ।

प्रथमम् इष् इति धातोः अर्थः निरूप्यते । व्याकरणमते इष् धातोः अर्थः इच्छानुकूलं ज्ञानम् अस्ति । यदा कश्चित् पुरुषः किमपि वस्तु इच्छति, तदा तस्य विषये विशेषप्रकारकं ज्ञानं जायते । एतदेव ज्ञानं धात्वर्थत्वेन गृह्यते । अत्र प्रश्नः भवति, इच्छायाः विषयः यदि अतीतः अथवा अनागतः स्यात्, तर्हि कथं फलसम्बन्धः सम्भवति इति चेत् अतीतवस्तूनाम् अनागतवस्तूनां च बुद्धौ आरोपः सम्भवति । मनसि तेषां विषयाणां प्रत्ययः उत्पद्यते । एवम् इष् धातुः फलशालिधातुरिति स्वीकृतः ।

अनन्तरं पत् धातोः विचारः क्रियते । "पतति" इति धातुः "गच्छति" इत्यस्य सदृशः सकर्मकधातुः अस्ति । सामान्यतया पतनं अकर्मकक्रिया इव दृश्यते, परन्तु "नरकं पतितः", "भूमिं पतति" इत्यादिषु प्रयोगेषु कर्मपदस्य दर्शनात् अस्य सकर्मकत्वं ज्ञायते । पतनक्रियायाः फलम् अन्यदेशसंयोगः अथवा पूर्वदेशविभागः इति स्वीकृतम् । यदि केवलं विभागजन्यसंयोगमात्रमेव अर्थः इति स्वीक्रियेत, तर्हि धातुः अकर्मकः स्यात् । किन्तु व्यवहारे कर्मपदोपयोगः दृश्यते, अतः सकर्मकत्वमेव युक्तम् इति सिद्धान्तस्य अभिप्रायः ।

ततः कृञ् धातोः अर्थः निरूप्यते । नागेशस्य मते कृधातोः अर्थः उत्पत्तिमात्रं नास्ति, अपि तु उत्पत्यनुकूलः व्यापारः अपि वर्तते । यथा "घटं करोति" इत्यत्र घटस्य उत्पत्तिः फलम्, तस्य निष्पादनाय यः व्यापारः क्रियते स धात्वर्थः । यदि कृधातुः केवलं फलमात्रवाची स्यात्, तर्हि अस्य अकर्मकत्वापत्तिः स्यात्, यती-धातुवत् । किन्तु व्यवहारे "करोति" इति सकर्मकधातुः अस्ति । अतः व्यापारः अवश्यं स्वीकार्यः ।

सम्प्रति दोषं दर्शयति । यदि कृधातुः केवलं फलमात्रवाची स्यात्, तर्हि कर्मस्थभावकधातुत्वं न सिध्येत् । एतेन कर्मकर्तरि यगन्तप्रयोगाणामनुपपत्तिः स्यात् । अतः कृधातोः अर्थे व्यापारस्य अवश्यं स्वीकारः कर्तव्यः । पुनः "कृतिः", "यत्नः" इत्यादिषु शब्देषु कृधातोः प्रयोगः दृश्यते । तत्र धातूनां नानार्थत्वात् कृधातुः केवलं यत्नमात्रेऽपि वर्तते । नागेशस्तु वैकल्पिकतया वदति यत् "यत्न" तथा "कृति" इति शब्दौ व्यापारसामान्यवाचकौ स्तः । एतौ विशेषव्यापारं न बोधयतः, अपितु सामान्यक्रियारूपं व्यापारं बोधयतः ।

अस्य समर्थनार्थं महाभाष्यस्य प्रसिद्धोदाहरणं निर्दिश्यते "स्थाली पचति" इति । वस्तुतः

पचनव्यापारः पाककर्त्रा क्रियते, न तु स्थाल्या क्रियते। तथापि स्थालीस्थितव्यापारसम्बन्धेन "स्थाली पचति" इति व्यवहारः भवति। एतेन ज्ञायते यत् यत्नः, कृतिः, व्यापारः इत्येते शब्दाः सामान्यव्यापारवाचकत्वेन प्रयुज्यन्ते इति।

अतः अस्य प्रकरणस्य सारः अयम् इष्-धातोः अर्थः इच्छानुकूलज्ञानम्, पत् धातोः अर्थः गमनसदृशः पतनव्यापारः, कृधातोः अर्थः उत्पत्यनुकूलव्यापारः। एतेषां धातूनां फलमात्रवाचित्वं इति न स्वीकार्यं, किन्तु व्यापारवाचित्वमपि वक्तव्यम्।

## उपसंहारः

अस्मिन् धात्वर्थविचारे विविधदर्शनानां मतानि सम्यक्तया परीक्षितानि। नैयायिकानां यत्नार्थवादः, मीमांसकानां फलार्थवादः, वैयाकरणानां फलानुकूलव्यापारवादश्च तुलनात्मकदृष्ट्या विवेचितः। एतेषां मतानां परीक्षणेन ज्ञायते यत् धातोः अर्थनिर्णयः केवलं व्याकरणशास्त्रस्य विषयः न, अपितु भाषादर्शनस्यापि गम्भीरः विषयः अस्ति इति।

धातुः वाक्ये क्रियाप्रधानतां प्रकाशयति। फलम्, कर्ता, कर्म, संख्या, कालः - एते तस्य क्रियार्थस्य विभिन्नपक्षान् प्रकाशयन्ति। अतः धात्वर्थस्य केवलफलत्वं वा केवलयत्नत्वं वा सर्वत्र नोपपद्यते। फलानुकूलव्यापारस्वरूपो धात्वर्थः इति वक्तव्यम्। अतः वैयाकरणमतं भाषाप्रयोगे, वाक्यार्थबोधे, कारकव्यवस्थायां च अधिकं सुसङ्गतं दृश्यते।

ज्ञा, इष्, पत्, कृञ्, भू, अस् इत्यादि धातूनाम् अर्थविचारेण अपि एतदेव सिद्धं यत् धातूनां प्रयोगेषु व्यापारस्य प्राधान्यं दृश्यते। धात्वर्थस्य यथार्थज्ञानं वाक्यबोधस्य, कारकनिर्णयस्य, सकर्मक-अकर्मकभेदस्य तथा शब्दशक्तिविचारस्य च आधारभूतं भवति।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् धात्वर्थविमर्शः संस्कृतव्याकरणस्य एकः तात्त्विकः विषयः अस्ति। अस्य सम्यगध्ययनेन धातोः स्वरूपं, क्रियायाः तत्त्वं, भाषायाः अर्थव्यवस्था च स्पष्टतया अवगन्तुं शक्यते। एषः विचारः संस्कृतभाषायाः वैज्ञानिकतां, तथा दार्शनिकगाम्भीर्यं च प्रकाशयति।

## सन्दर्भग्रन्थसूची


१. अष्टाध्यायी - पाणिनिः

२. महाभाष्यम् - पतञ्जलिः

३. काशिकावृत्तिः - वामन-जयादित्यौ

४. वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षितः

५. वाक्यपदीयम् - भर्तृहरिः

६. परमलघुमञ्जूषा – नागेशभट्टः

७. वैयाकरणभूषणसारः- कौण्डभट्टः



ISSN : 2320-740X

# आख्यातार्थविचारसन्दर्भे गुणाधिकरणसिद्धान्तविमर्शः

प्रलय-नन्दी*
शोधच्छात्रः,रा.वि.शै.शो.सं.,
वेलुडमठः, पश्चिमबङ्गराज्यम्

***लेखसारः*** *– शाब्दिकैः आख्यातस्य कर्त्रर्थकत्वं स्वीकृतम्, तदनुसारञ्च चैत्रः पचतीत्यादौ चैत्रादेः तिङा सामानाधिकरण्यं सिध्यति । युष्मद्युपपद इत्यादिभिः सूत्रैः तिङ्सामानाधिकरण्यमाश्रित्य पुरुषव्यवस्था चोपपन्ना भवति । मीमांसकैस्तु प्राधान्याद् भावनाया एवाख्यातार्थत्वं सिद्धान्तितम् । तद्रीत्या कर्त्राद्यर्थस्य तिङर्थेन सामानाधिकरण्यं न सम्भवतीति पुरुषव्यवस्थोच्छेद आपद्यते । एवं दोषापत्तौ तिङर्थेन भावनया लक्षितेष्वेव कर्त्रादिष्वर्थेषु तिङ्सामानाधिकरण्यं प्रतिपाद्य मीमांसकैः समाधानं कृतम् । लक्षितेन विशिष्टार्थेन तिङ्सामानाधिकरण्यम् आदाय पुरुषव्यवस्था सम्भवतीति तदाशयः । अत्र लक्षितेनैव सम्बन्धिना सामानाधिकरण्यमित्यंशेन जैमिनीयसूत्रे गुणाधिकरणस्य उच्छेदापत्तिः दृश्यते । अस्मिन् विषये शाब्दिकमीमांसकयोः मतमाश्रित्य प्रकृतप्रबन्धे विस्तृतो विमर्शः प्रस्तुतः ।*

***कूटशब्दाः*** *– आख्यातम्, भावना, कर्ता, सामानाधिकरण्यम्, सम्बन्धः, तद्धितः ।*

**भूमिका** – कर्तृ-कर्म-सङ्ख्या-कालानां तिङर्थत्वमिति वैयाकरणानां सिद्धान्तः । कर्तृविहिताख्यातेन कर्तृ-सङ्ख्या-कालानां प्रतीतिः, कर्मविहिताख्यातेन कर्म-सङ्ख्या-कालानां प्रतीतिः भावविहिताख्यातेन च भाव-कालयोः[१] प्रतीतिर्भवतीति तत्र व्यवस्था कृता । इत्थं सार्वत्रिकत्वेन सङ्ख्या-कालयोः आख्यातसामान्यार्थत्वम्, असार्वत्रिकत्वेन च कर्तृकर्मणोः आख्यातविशेषार्थत्वमिति निर्वाहः क्रियते । तत्र आख्यातविशेषार्थविषये मीमांसकानां विरोधो दृश्यते । सङ्ख्या-कालवत् सार्वत्रिकरूपेण भावनाया एव आख्यातार्थत्वमिति तेषामाशयः । अतो भावना-सङ्ख्या-कालानां तिङर्थत्वमिति मीमांसकानां सिद्धान्तः । एवं मतविरोधाद् व्यवहारेषु समन्वयोऽपि भिद्यते । यथा चैत्रः पचतीत्यादौ शाब्दिकदिशा तिङः कर्त्रर्थकत्वात् चैत्ररूपार्थेन तिङर्थस्य साक्षादन्वयः सिध्यति । मीमांसकदिशा प्राधान्याद् भावनैव आख्यातार्थो भवति, आख्यातार्थेन भावनया कर्तृरूपार्थो लक्ष्यते, लक्षितेन च कर्तृरूपार्थेन चैत्रस्य सामानाधिकरण्यं सिध्यतीति निरूप्यते । परन्तु अनया रीत्या निर्वाहे जैमिनीयसूत्रे गुणाधिकरणसिद्धान्ते मीमांसकमतस्य विरोधो दृश्यते । तत्र हि आमिक्षाया विषये तद्धितान्तैकपदश्रुत्या सम्बन्धः श्रौतः, वाजिनस्य च विषये सम्बन्धो वाक्यप्रमाणलब्ध इति वैषम्येण प्रबलदुर्बलभावः प्रतिपादितः । तदनु आमिक्षाद्रव्यकं वैश्वदेवम् एकं कर्म[२], वाजिनद्रव्यकं वाजिदेवताकम् अपरं कर्म इति विषयवाक्येन भिन्नयोः कर्मणोः विधानं भवतीति सिद्धान्तितम् । अथ चैत्रः पचतीत्यादिवद् गुणाधिकरणेऽपि वैश्वदेवीशब्दे लाघवात् सम्बन्धस्यैव तद्धितार्थत्वम्, तद्देवताकद्रव्यस्य च लक्ष्यत्वं स्यात् । तदा वाजिनामिक्षयोः उभयोः स्थलेऽपि सम्बन्धस्य अश्रौतत्वम् आपद्यते । अतः प्रबल-दुर्बल-भावमादाय विषयवाक्येन कर्मान्तरविधानं न सम्भवतीति मीमांसकमते गुणाधिकरणसिद्धान्तस्य उच्छेद आपद्यते । इमाम् आपत्तिमाश्रित्यैव प्रकृतप्रबन्धे शाब्दिक-मीमांसक-मतदिशा विमर्शः प्रस्तूयते ।

***सम्पर्कसूत्रम्** - 8609348552, Email- prolay.nandi.vedvid@gmail.com

[१]अत्र धात्वर्थव्यापार एव भावः, भावतिङां धात्वर्थानुवादकत्वात् ।

[२]अत्र कर्मपदेन यागरूपं लौकिकं कर्म ग्राह्यं न तु शाब्दिकप्रतिपादितं पारिभाषिकं कर्मेति विशेषः ।

**गुणाधिकरणम्** - चातुर्मास्येषु वैश्वदेवाख्ये प्रथमे पर्वणि "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्[१]" इति विषयवाक्यं श्रूयते। अत्र दध्यानयनेन घनीभूतं तप्तं पय आमिक्षेति प्रसिद्धम्, तत्रावशिष्टं तक्रवद् द्रवीभूतं द्रव्यञ्च वाजिनमिति प्रसिद्धम्। अत्र वाजिभ्यो वाजिनमिति वाक्ये किम् आमिक्षायागानुवादेन वाजिनमिति वाजिनरूपगुणविधिः उत वाजिदेवताक-वाजिनद्रव्यक-यागान्तरविधिरिति संशय उदेति। तत्र पूर्वस्मिन् कर्मणि स्वस्य निवेशासम्भवे सति गुणः स्वनिवेशक्षमकर्मान्तरस्य उत्पत्तिपरताम् अवगमयन् कर्मभेदकः सम्पद्यत इति प्रकृताधिकरणस्य प्रतिपाद्यो विषयः। गुणस्य कर्मभेदकत्वप्रतिपादनाच्च अस्याधिकरणस्य गुणाधिकरणत्वेन प्रसिद्धिरिति बोध्यम्। कर्मणां मिथो भेदः षड्भिः प्रमाणैः सिध्यति। तानि च प्रमाणानि षट्, शब्दान्तराभ्यास-सञ्ज्ञा-सङ्ख्या-गुण-प्रकरणान्तररूपाणि।

**विशेषः** - महर्षिजैमिनेः गुणाधिकरणबोधकं सूत्रं वर्तते गुणाश्चापूर्वसंयोगे वाक्ययोः समत्वादिति[२]। अपूर्वसंयोगे अर्थात् पूर्वकर्मणि निवेशासम्भवे सति सङ्ख्यावद् गुणोऽपि कर्मणो भेदको भवति, तत्र पूर्वकर्मनिवेशश्च उभयोरपि वाक्ययोः समत्वाद् अर्थाद् मिथानपेक्षत्वादेव सम्भवतीति सूत्रस्यास्य अर्थः। अनुवादकतयैकस्य वाक्यस्य इतरापेक्षायां सत्यामेव पूर्वकर्मनिवेशः स्यात्। यथा प्रकृते वाजिभ्यो वाजिनमिति वाक्यस्य इतरापेक्षायां सत्यामेव पूर्वस्मिन् कर्मणि निवेशः सम्भाव्यते। परन्त्वत्र आमिक्षाद्रव्येण पूर्वकर्मणि गुणाकाङ्क्षाया उपशमनात् तत्र यागस्य निराकाङ्क्षत्वमेव सिद्धान्तितम्। अतो द्वितीयवाक्योपात्तस्य वाजिनद्रव्यस्य वैश्वदेवे कर्मणि अन्वयो न सम्भवतीति ज्ञायते। अत्र वाजिभ्यो वाजिनमिति वाक्यस्यैव उदाहरणत्वम्, वैश्वदेववाक्यं तु प्रकृतार्थोपयोगितया गृहीतमिति विशेषः।

**पूर्वपक्षः** - अत्राधिकरणे वाजेन आमिक्षारूपेण अन्नेन सम्बन्धाद् वाजिनो विश्वे देवाः,ताननूद्य वाजिनगुणो विधीयते। तेनोभयद्रव्यकं वैश्वदेवात्मकम् एकमेव कर्म विधीयत इति प्रथममतम्। एवञ्च द्रव्यद्वयकृतमेकमेव कर्म विधीयत इति गुणाधिकरणे पूर्वपक्षो बोध्यः। वाजमन्नम् आमिक्षारूपमेषां विद्यत इति व्युत्पत्त्या मत्वर्थीये इनिप्रत्यये निष्पन्नो वाजिशब्दो विश्वदेवपरः। तदुद्देशेन वाजिनं विधीयत इति पूर्वपक्षिणामभिमतम्। अत्र वाजयोगस्य देवताविशेषणत्वेन समुच्चयो भवति। ततश्च निरुक्तदेवताकम् उभयद्रव्यकम् एकमेव कर्म, नात्र कर्मभेद इति तत्त्वं लभ्यते।

**पूर्वपक्षिणां विचारः** – अस्मिन्नधिकरणे विषयवाक्यस्य द्विधा विभागः सम्भवति। तत्र वैश्वदेवी आमिक्षेति प्रथमोंऽशः, वाजिभ्यो वाजिनमिति द्वितीयोंऽशः। प्रथमांशे आमिक्षाद्रव्यस्य विधानम्, द्वितीयांशे च वाजिनद्रव्यस्य विधानं भवति। अथ वैश्वदेव्यामिक्षेति वाक्यश्रवणेन वैश्वदेवम् आमिक्षाविधानमिति बोधः सर्वसम्मतः। अतः प्रथमवाक्येन विश्वान् देवान् उद्दिश्य विधीयमाने कर्मणि आमिक्षाद्रव्यस्य सम्बन्धो भवति। सम्प्रति वाजिनद्रव्यस्य किंदेवताके कर्मणि विधानं स्यादिति संशयो जायते। तत्रोपस्थिततत्वात् वैश्वदेवात्मकस्य कर्मण एव वाजिनद्रव्येण अन्वयः क्रियते। तदा आमिक्षाद्रव्यसम्बन्धिनो ये विश्वे देवाः, तान् उद्दिश्यैव द्वितीयवाक्येन वाजिनद्रव्यस्य विधानं भवतीति आशयो ज्ञायते। ततः प्रकृतवाक्येन आमिक्षावाजिनोभयद्रव्यकस्य वैश्वदेवात्मकस्य एकस्यैव कर्मणो

[१]जै.सू. शा.भा-४.१.२२।
[२]जै.सू. ०२/०२/२३।

 ISSN : 2320-740X

विधानं भवतीति तत्त्वं लभ्यते ।

**सिद्धान्तपक्षः** – गुणाधिकरणे वाजिभ्यो वाजिनमिति वाक्योपात्तस्य वाजिशब्दस्य विश्वदेवानुवादकसामर्थ्यं न विद्यते । अतो वाजिभ्यो वाजिनमिति द्वितीयवाक्येन वाजिदेवताकं वाजिनगुणकं कर्मान्तरमेव विधीयत इति सिद्धान्तिनां मतम् । अत्र वैश्वदेव्यामिक्षेति प्रथमवाक्ये कर्मण आमिक्षया सम्बन्धे जाते निराकाङ्क्षस्य यागस्य पुनर्वाजिनं प्रति आकाङ्क्षा नोदेति । अतोऽत्र आमिक्षायागानुवादेन वाजिनद्रव्यात्मकगुणविधिर्न सम्भवति । तत्र वाजिदेवताको वाजिनद्रव्यकः पृथगेव यागो विधीयत इति सिद्धान्तः ।

**सिद्धान्तिनां विचारः** - वैश्वदेव्यामिक्षेति प्रथमवाक्ये कर्मणः श्रौतः सम्बन्धो वर्तते । अत्र विश्वे देवा देवता अस्येत्यर्थे अण्-प्रत्ययो विधीयते । एवमत्र तद्धितान्तैकपदश्रुतिमूलक एव आमिक्षायाः कर्मसम्बन्धः । वाजिभ्यो वाजिनमिति द्वितीयवाक्ये तु वाजिनगुणेन सह कर्मसम्बन्धो वाक्यप्रमाणद्वारा एव सम्भवति । अङ्गत्वबोधकश्रुतिराहित्येन अङ्गाङ्गिभावयोग्यार्थबोधकयोः पदयोः एकत्र सहोच्चारणरूपो यः पदसमभिव्याहारः तदेव वाक्यम् । एतच्च सहोच्चारणं लिङ्गश्रुती कल्पयित्वा विनियोजकं भवति । एवञ्च प्रकृते प्रथमवाक्ये एकपदश्रुत्या चोदितत्वाद् आमिक्षा प्रबला, द्वितीयवाक्ये पदान्तरगम्यत्वेन वाक्यप्रमाणगम्यत्वाद् वाजिनं दुर्बलमिति स्थितिः ।

अत्र प्रथमवाक्ये आमिक्षाया यागाङ्गत्वं श्रुतिप्रमाणेन, द्वितीयवाक्ये वाजिनस्य यागाङ्गत्वं वाक्यप्रमाणेनेति प्रमाणभेदः स्पष्टः । अतो वैश्वदेव्यामिक्षा इति प्रथमवाक्यविहितयागानुवादेन वाजिभ्यो वाजिनमिति द्वितीयवाक्ये वाजिनद्रव्यस्य विधानं न सम्भवतीति ध्येयम् । आमिक्षारूपेण श्रौतद्रव्येण द्वितीयवाक्यस्य निराकाङ्क्षत्वमेव अत्राനन्वये बीजं बोध्यम् । अनुवादकतयैकस्य वाक्यस्य इतरापेक्षायां सत्यां गुणस्य पूर्वस्मिन् कर्मणि निवेशः सम्भवति, परन्तु अत्र तथा स्थितिर्नास्ति । प्रकृते तद्धितान्तैकपदश्रुत्या आमिक्षायाः पूर्वस्मिन् कर्मणि सम्बन्धात्तत्र गुणान्तराकाङ्क्षा न दृश्यते । अत्र पूर्वकर्मणः श्रुतिप्रमाणलब्धेन प्रबलगुणेनावरुद्धत्वात् पुनः गुणान्तरविधाने अनुवादसामर्थ्यं न सम्भवतीति आशयः ।

**गुणाधिकरणसिद्धान्तभङ्गापत्तिः** - मीमांसकैः भावनारूपार्थे आख्यातस्य शक्तिः स्वीकृता, गुणाधिकरणे वैश्वदेवीत्यत्र च अस्य देवतेत्यर्थे तद्धितप्रत्ययो विहितः । तत्राख्यातस्थले लाघवाद् यथा भावनायामेव शक्तिः स्वीक्रियते तथा वैश्वदेवीत्यत्र लाघवात्सम्बन्धरूपार्थ एव तद्धितस्य शक्तिः स्यात् । मीमांसकमते चैत्रः पचतीत्यादौ लक्षितेन कर्त्रादिना तिङः सामानाधिकरण्यं भवति । तुल्यरीत्या गुणाधिकरणे लक्षितेन द्रव्येणैव आमिक्षादीनां सामानाधिकरण्यं सेत्स्यति । अस्यामवस्थायां तद्धितस्य द्रव्यानभिधायित्वे कर्मणा आमिक्षायाः श्रौतः सम्बन्धो न सम्भवेत् । तदा वाजिनामिक्षयोः उभयोरपि यागाङ्गत्वं वाक्यप्रमाणेनैव लभ्यते । एवमत्र उभयोरपि द्रव्ययोः वाक्यविनियोज्यत्वसाम्यात् प्रबलदुर्बलभाव एव नोपलभ्यत इति तदाश्रयणेन प्रवृत्तस्य सिद्धान्तस्य असङ्गत्यापत्तिः । अतो गुणाधिकरणसिद्धान्तोच्छेदापत्तेः मीमांसकैः प्रतिपादितं लक्षितेन सम्बन्धिना सामानाधिकरण्यम् अयुक्तमिति ज्ञायते ।

**सिद्धान्तभङ्गापत्तौ विचारः** - ननु तद्धितस्य शक्त्या द्रव्यानभिधायित्वेऽपि गुणाधिकरणसिद्धान्तस्य उच्छेदो नापद्यते । तथाहि, गुणाधिकरणे प्रथमवाक्ये तद्धितार्थसम्बन्धस्य उपस्थितिः विशेषः ।

तादृशसम्बन्धेन लक्षितं द्रव्यमादाय आमिक्षाया अन्वयः सिध्यति । सिद्धान्तपक्षे वाजिभ्यो वाजिनमिति द्वितीयवाक्ये तद्धितप्रत्ययो न विद्यते । अन्येनापि केनापि अर्थेन लक्षणायाः प्रवृत्तिर्न भवति । इत्थं वाजिनस्य विषये न लक्षणायाः प्रवृत्तिर्नापि लक्षितस्य द्रव्यान्तरस्य लाभः । अनेन च वैषम्येण वाजिनामिक्षयोः प्रबलदुर्बलभावसिद्धेः आमिक्षायाः प्रसङ्गे लक्षितस्यापि द्रव्यस्य श्रौतत्वं सिध्यति । तदा गुणाधिकरणे सिद्धान्तस्य न कापि असङ्गत्यापत्तिरिति वादिभिः प्रतिपाद्यते । परन्तु अनया रीत्या तद्धितस्य समासस्य वा उपस्थितिमादाय वैलक्षण्यप्रतिपादने किमपि प्रमाणं न विद्यते । एवं विनिगमनाभावाद् मीमांसकैः प्रतिपादितं मतमयुक्तमिति बोध्यम् ।

अपि च, पूर्वोक्तरीत्या यदि लक्षणया लब्धस्याप्यर्थस्य श्रौतत्वमङ्गीक्रियते तर्हि अनृतवर्जनाधिकरणे दोष आपद्यते । तत्राधिकरणे "नानृतं वदेदि"ति[1] वाक्येन बोधितस्य निषेधस्य क्रत्वङ्गत्वमुत पुरुषार्थत्वमिति विचार्यते । तत्र शाब्दिकरीत्या आख्यातस्य कर्त्रर्थकत्वे स्वीकृते निषेधवाक्यस्य पुरुषार्थत्वं सिध्येदिति दोष आशङ्कितः । आख्यातस्य कर्त्रर्थकत्वे श्रुतिप्रमाणेन निषेधस्य पुरुषार्थत्वं, प्रकरणप्रमाणेन च क्रत्वर्थत्वं सम्भाव्यते । ततः "श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षाद्[2]" इति सूत्रेण श्रुतिप्रमाणस्य बलवत्त्वाद् निषेधस्य पुरुषार्थत्वमेव सिध्येन्न तु क्रत्वर्थत्वमिति शाब्दिकमते दोष आशङ्कितः । अतो मीमांसारीत्या आख्यातस्य भावनार्थकत्वमेव स्वीकर्तव्यमिति अनृतवर्जनाधिकरणे विचारितम् ।

पूर्वोक्तरीत्या यदि लक्षितार्थस्यैव श्रौतत्वं स्वीक्रियते तर्हि अस्मिन् अनृतवर्जनाधिकरणे आख्यातार्थ-भावनया लक्षितस्यापि कर्तृरूपार्थस्य श्रौतत्वं सिध्येत् । ततः प्रकरणापेक्षया श्रुतिप्रमाणस्य बलवत्तरत्वेन निषेधवाक्यस्य पुरुषार्थत्वमेव सम्पद्येत । तदा अनृतवर्जनाधिकरणप्रामाण्येन मीमांसकोक्तं भावनाया आ-ख्यातवाच्यत्वं व्यर्थं स्यात् । निषेधस्य क्रत्वर्थत्वमिति सिद्धान्तस्यासङ्गत्या च अनृतवर्जनाधिकरणे प्रति-पादितस्य सिद्धान्तस्य उच्छेदापत्तिरपि स्यात् । एवं दोषापत्तेः लक्षणया लब्धस्यार्थस्य श्रौतत्वाभाव एव मन्तव्यः । तथा च मीमांसकमते वाजिनामिक्षयोर्विषये वैषम्याभावाद् वाजिनद्रव्यक-कर्मान्तरविधानपरस्य सिद्धान्तस्य उच्छेदापत्तिरूपो दोषस्तदवस्थ एवेति बोध्यम् ।

**विमर्शः**

१. अस्मिन् गुणाधिकरणे प्रथमवाक्ये कर्मणा आमिक्षासम्बन्धः श्रुतिप्रमाणलभ्यः, कर्मणा वाजिन-सम्बन्धश्च वाक्यप्रमाणलभ्यः । अस्माच्च वाक्यप्रमाणात् श्रुतिप्रमाणं बलवदिति कर्मणा प्रथमत आमिक्षासम्बन्ध एव सम्पद्यते । अस्यामवस्थायाम् आमिक्षाद्रव्यात्मकेन गुणेनावरुद्धत्वात् पूर्व-कर्मणो गुणान्तरविधाने सामर्थ्यं न भवति । एवञ्च पूर्वस्य वैश्वदेवात्मकस्य कर्मणः निराकाङ्क्षत्वात् तत्र द्वितीयवाक्योपात्तस्य वाजिनद्रव्यस्य सम्बन्धो न भवति । तदा विषयवाक्येन पृथगेव कर्मान्तरं विधीयत इति गुणाधिकरणे सिद्धान्तिनामाशयः ।

२. पूर्वकर्मणो गुणविषये निराकाङ्क्षत्वे तत्र पुनः कर्मान्तरस्य विधानं न सम्भवतीति आलोच्यते । ननु

[1]तै.सं.०२/३८४ ।
[2]जै.सू. ०३/०३/२४ ।


ISSN : 2320-740X

तद्रीत्या “व्रीहिभिर्यजेत[१]” इत्यत्रापि व्रीहीणां यागाङ्गत्वं न सम्भवति । तथाहि, “यदाग्नेयोऽष्टाकपालोऽमावस्यायां पौर्णमास्याञ्चाच्युतो भवती”ति[२] उत्पत्तिविधौ[३] अष्टाकपालसंस्कृतस्य पुरोडाशस्य यागाङ्गत्वं बोधितम् । तत्र उत्पत्तिवाक्ये पुरोडाशसम्बन्धस्य श्रौतत्वेन कर्मणो गुणान्तराकाङ्क्षा निरस्ता । तदा कर्मणो निराकाङ्क्षत्वेन तत्प्रति द्रव्यान्तरस्य व्रीहेः सम्बन्धो न स्यादिति शङ्कितुराशयः । अत्रोच्यते पुरोडाशपदार्थो न हि सिद्धः, व्रीहिपेषणेन तदुपलब्धिर्भवति । अतोऽस्मिन् विधिवाक्ये यागपुरोडाशयोः अङ्गाङ्गिभावे सिद्धेऽपि पुरोडाशप्रकृतिभूतं व्रीहिं प्रत्यपि यागस्य साकाङ्क्षत्वं भवत्येव । इत्थमत्र पुरोडाशप्रकृतित्वेन परम्परया व्रीहेः यागाङ्गत्वं सिध्यतीति बोध्यम् ।

३. अत्र वैश्वदेवीति तद्धितान्तपदेन आमिक्षाया अभिधानेऽपि विशेषरूपेण आमिक्षाया अभिधानाय आमिक्षेति पदान्तरस्यापेक्षा भवति । तत्रावस्थायाम् आमिक्षासम्बन्धस्य पदान्तरसमभिव्याहारकृतत्वात् तस्यापि श्रौतत्वाभाव एव दृश्यते । अतः शाब्दिकानां मतेऽपि दोष आपद्यत इति न शङ्क्यम्, सत्यपि पदान्तरापेक्षणे स्वाभिन्नार्थकपदान्तरापेक्षायामपि श्रौतत्वस्य सूपपन्नत्वात् । स्वेन अभिन्नो योऽर्थस्तदर्थकं यत्पदान्तरं तदपेक्षणे सत्यपि श्रौतत्वमक्षतमिति आशयः । प्रकृते वैश्वदेवीशब्देनामिक्षाया उपस्थितावपि आमिक्षेति पदान्तरस्यापेक्षा भवति । अत्र स्वेन वैश्वदेवीशब्दार्थेनाभिन्नो योऽर्थस्तदर्थकं यत्पदान्तरम् आमिक्षापदं तदपेक्षणे सत्यपि श्रौतत्वम् अक्षतमिति बोध्यम् । अस्येति सर्वनामार्थे विहितस्य तद्धितस्य द्रव्यसामान्यमेव वाच्यं भवति । सामान्यार्थे नियमेन विशेषाकाङ्क्षा दृश्यते, एतद्बलेन सामान्यविशेषयोः अभेदान्वयात् प्रकृते न श्रौतत्वहानिरिति आशयः । यत्र भिन्नार्थकपदान्तरापेक्षा भवति तत्र वाक्यं प्रमाणं भवति । यथा “खादिरो यूपो भवती”ति[४] वाक्ये कर्मत्वादिबोधकं द्वितीयादिकं न श्रूयते, यूपखादिरयोः सहोच्चारणमात्रं हि श्रूयते । अतोऽत्र यूपसम्पादनसामर्थ्यरूपं लिङ्गं, खादिरत्वेन यूपं भावयेदिति श्रुतिञ्च कल्पयित्वा वाक्यप्रमाणेन विनियोगः सम्पाद्यते ।

४. अत्र आमिक्षासम्बन्धाद् विनिष्कृष्य यागमात्रस्यैवानुवादेन वाजिनविधाने सिद्धान्तविरोधो वारयितुं न शक्यते, कर्मणो गुणान्तराकाङ्क्षाविरहात् । अत्र यागमात्रस्य अनुवादे क्रियमाणेऽपि तत्र पूर्ववादसापेक्षत्वं सततं विद्यते । अतोऽनुवादे क्रियमाणे पूर्ववादपर्यालोचनमपि अवश्यं कर्तव्यं भवतीति समायातम् । कृते तु तत्पर्यालोचने गुणयुक्तस्यैव कर्मणो बुद्धौ विपरिवर्तनं भवतीति स्थितिः । तद्दशायां निष्कृष्य अभिहितस्यापि कर्मणो गुणान्तराकाङ्क्षाया विरह एव दृश्यते । अत्रैकगुणयुक्ततया कर्मणो बुद्धौ विपरिवृत्तेः तस्मिन् गुणान्तराकाङ्क्षायाः प्रतिबन्धो जायत इति तत्त्वम् । अपि च, वाजिशब्देन विश्वदेवानां विश्वदेवत्वेन रूपेणोपस्थित्या आमिक्षासम्बन्धाद् निष्कृष्य स्वरूपेणाभिधानम्, ततः प्रकृतकर्मणि वाजिनविधिरिति स्वीकारे पूर्वपक्षिणां समुच्चयपक्षस्य दौर्बल्यमेव सिध्यतीति अवधेयम् ।

[१] आप.श्रौ ६/३१/२५ ।
[२] तै.ब्रा. २५.१४.४ ।
[३] कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । द्र. अ.सं. पृ-४८ ।
[४] श.ब्रा. ३/६/१/१२ ।

**निर्णयः** – वैश्वदेव्यामिक्षेति वाक्ये आमिक्षायाः सम्बन्धः तद्धितान्तैकपदश्रुत्या लभ्यते, अत आमिक्षासम्बन्धः श्रौतः। वाजिभ्यो वाजिनमिति वाक्ये अङ्गत्वबोधकश्रुत्यभावाद् वाजिनसम्बन्धः वाक्यप्रमाणेनैव लभ्यते। वाक्यापेक्षया श्रुतिप्रमाणस्य बलवत्त्वाद् वैश्वदेवद्रव्येण प्रथमत आमिक्षाया एवान्वयो भवति। जाते च तदन्वये गुणान्तराकाङ्क्षाविरहात् पूर्वस्मिन् कर्मणि वाजिनद्रव्यस्य अन्वयो न सम्भवतीति तदर्थं कर्मान्तरं कल्प्यते। अयं निर्वाहो मीमांसकानां न तु शाब्दिकानाम्। अथात्र यथा लाघवमनादृत्य सम्बन्धिरूपार्थ एव तद्धितप्रत्ययस्य शक्तिः प्रतिपादिता तथा कर्त्राद्यर्थ एव आख्यातस्य शक्तिः प्रतिपादनीया भवति। तथा स्वीकृते चैत्रः पचतीत्यादौ आख्यातेन कर्तृरूपार्थस्योपस्थितिरिति पूर्वोक्तस्य पुरुषव्यवस्थानापत्तिरूपस्य दोषस्य आपत्तिर्न भवति। एवं गुणाधिकरणसिद्धान्तानुरोधेन आख्यातस्य कर्त्राद्यर्थ एव शक्तिः स्वीकरणीयेति प्रकृते सिद्धान्तो बोध्यः।

**उपसंहारः** – आख्यातार्थनिरूपणप्रसङ्गे प्रधानतः शाब्दिकमीमांसकयोः मतविरोधो दृश्यते। मीमांसकरीत्या भावनाया आख्यातार्थत्वे चैत्रः पचतीत्यादिस्थलेषु तिङर्थेन चैत्रादिकर्तुः सामानाधिकरण्यं न सम्भवति। एतच्च तिङ्सामानाधिकरण्यं युष्मद्युपपदे इत्यादिसूत्राणां प्रवृत्तौ निमित्तभूतमिति तदभावे पुरुषव्यवस्थाया उच्छेदापत्तिः स्यात्। अतो भावनया लक्षितेन कर्त्रादिना तिङ्सामानाधिकरण्यं प्रतिपादनीयमिति मीमांसकानाम् अभिमतिः। परन्तु तथा निर्वाहे जैमिनीयसूत्रोपात्तेषु अरुणाधिकरणादिषु दोष आपद्यत इति नागेशप्रभृतिभिः शाब्दिकैः विचारितम्। तत्रैव प्रसङ्गतो गुणाधिकरणसिद्धान्तभङ्गापत्तिः निरूपिता। प्रकृतप्रबन्धे इमं विषयमाश्रित्यैव विमर्शः प्रस्तुतः। तत्र गुणाधिकरणसिद्धान्तभङ्गापत्तेः कर्त्रादिरेव आख्यातविशेषार्थ इति सिद्धान्त उपस्थापितः। अत्र प्रस्तुतस्य एकैकस्यापि विचारबिन्दोः युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्य अत्रैव विरम्यत इति शम्।

## सन्दर्भग्रन्थसूची


१. कौण्डभट्टः। (प्रथमप्रकाशनम्, 2019 ई.)। वैयाकरणसिद्धान्तभूषणम् (निरञ्जनीव्याख्यया प्रकाशटिप्पण्या च सहितम्, द्वितीयो भागः)। सम्पा. के.वि. रामकृष्णमाचार्यः।

२. कौण्डभट्टः। (पुनर्मुद्रितसंस्करणम्, २०७८ वि.सं.)। वैयाकरणभूषणसारः (प्रभा-दर्पण-व्याख्याद्वयोपेतः)। वाराणसी: चौखम्भा संस्कृत संस्थान।

३. कौण्डभट्टः। (२००९ ई.)। वैयाकरणभूषणसारः (काशिका-दर्पण-व्याख्याद्वयोपेतः)। वाराणसी: चौखम्बा सुरभारती प्रकाशन।

४. नागेशभट्टः। (प्रथमसंस्करणम्, 1990 ई.)। वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमो भागः)। सम्पा. आचार्यरामप्रसादत्रिपाठी। वाराणसी: सम्पूर्णानन्दसंस्कृविश्वविद्यालयः।

५. नागेशभट्टः। (प्रथमसंस्करणम्, 1997 ई.)। वैयाकरणसिद्धान्तलघुमञ्जूषा (द्वितीयो भागः)। सम्पा. आचार्यरामप्रसादत्रिपाठी। वाराणसी: सम्पूर्णानन्दसंस्कृविश्वविद्यालयः।

६. पेन्ना, मधुसूदनः। (२०२१ ई.)। मीमांसादर्शनम् (शाबरभाष्य-श्लोकवार्तिक-तन्त्रवार्तिक-टुप्टीका-प्रभाटीकासहितम्)। नवदेहली: न्यु भारतीय बुक कर्पोरेशन।

७. लौगाक्षिभास्करः। (२०१७ ई.)। अर्थसङ्ग्रहः (अर्थालोक-संस्कृत-टीकासंवलितः )। चौखम्भा पब्लिशर्स।



ISSN : 2320-740X

# सारमञ्जर्याम् एवशब्दार्थविचारः

वासुदेवगराइ*
शोधच्छात्रः,रा.वि.शै.शो.सं.,
वेलुड़मठः, पश्चिमबङ्गराज्यम्

***लेखसारः*** *– अस्मिल्लँघुशोधप्रबन्धे सारमञ्जरीग्रन्थदिशा एवकारविचारः उपस्थापितः। तेन सह वैयाकरणमतमपि पर्यालोचितं विद्यते। यथा आचार्यजयकृष्ण एवशब्दार्थं निरूपयितुमाह- "तस्य व्यवच्छेदत्वमेव शक्यतावच्छेदकमि"[१] ति शक्यः व्यवच्छेदः इति। शक्तिः वाच्यत्वसम्बन्धेन यत्र विद्यते सः शक्यः। एवम् एवशब्दस्य शक्तिः वाच्यत्वसम्बन्धेन व्यवच्छेदे वर्तते अतः शक्यः व्यवच्छेदः। शक्यता च व्यवच्छेदनिष्ठा। एवं शक्यता यत्र विद्यते तत्र भासमानः धर्मः शक्यतायाः अवच्छेदको भवति। शक्यता चात्र व्यवच्छेदे विद्यते। अतः शक्यतावच्छेदकं व्यवच्छेदत्वम्। व्यवच्छेदः इत्यस्य विरहः इतरव्यावृत्तिर्वार्थः। ततश्च स चायं व्यवच्छेदः त्रिधा विभक्तुं शक्यते इति तेषां भेदपुरःसरं व्याख्यानं कृतम् अस्ति। एवञ्च त्वदीयमतविमर्शश्च साधितो विद्यते। तथैव नागेशमते अपि एवकारविचारः परमलघुमञ्जूषाग्रन्थदिशा उपस्थापितः अस्ति। आचार्यः नागेशः परमलघुमञ्जूषायाः निपातार्थनिरूपणे एवशब्दार्थम् उपास्थापयत्। तत्र आचार्येण उक्तम् "एवशब्दस्यार्थोऽवधारणमसमम्भवश्च"[२] इति। अत्र आचार्येण निपातानां द्योतकत्वमेव स्वीक्रियते तेन अर्थः इत्यस्य द्योत्यः इत्यर्थः। तेन एवशब्दद्योत्यं भवति अवधारणम्, असम्भवश्च इति। अत्र "एवे चानियोगे"[३] इति वार्तिके "नियोगोऽवधारणं तदभावोऽसम्भव"[४] इति कैयटोक्तिः प्रमाणम्। एवञ्चात्र एते अर्थाः एवशब्दद्योत्याः न तु वाचकाः इत्यपि आचार्येण प्रत्यपादि।*

भूमिका- शास्त्रेषु अथ च साहित्येषु एकस्मिन् द्रव्ये एकस्यां क्रियायां वा स्वाशयं द्रढीकर्तुं तत्र तत्र आचार्यैः एवशब्दस्य प्रयोगः क्रियते। एवञ्च त्रिविधः अस्य एवशब्दस्य प्रयोगः दरीदृश्यते। क्वचिदयम् विशेष्योत्तरं प्रयुज्यते, क्वचिद् विशेषणोत्तरं प्रयुज्यते, क्वचिच्च क्रियोत्तरं प्रयुज्यते। तत्र त्रिषु अपि स्थलेषु अस्य आशयः भिन्नः एव भवति इति अस्मिन् शोधे आलोच्यते।

**नागेशमतम्**

आचार्यः नागेशः परमलघुमञ्जूषायाः निपातार्थनिरूपणे एवशब्दार्थम् उपास्थापयत्। तत्र आचार्येण उक्तम् "एवशब्दस्यार्थोऽवधारणमसमम्भवश्च"[५] इति। अत्र आचार्येण निपातानां द्योतकत्वमेव स्वीक्रियते तेन अर्थः इत्यस्य द्योत्यः इत्यर्थः। तेन एवशब्दद्योत्यं भवति अवधारणम्, असम्भवश्च इति। अत्र "एवे चानियोगे"[६] इति वार्तिके "नियोगोऽवधारणं तदभावोऽसम्भव"[७] इति कैयटोक्तिः प्रमाणम्। ननु

---

***सम्पर्कसूत्रम्** - 7501757388, , Email- basudev.garai.vedvid@gmail.com

[१]सारमञ्जर्याः एवकारविचारे, पत्रसंख्या-69

[२]परमलघुमञ्जूषा, बालप्रकाशिका, निपातार्थनिरुपणम्, पत्रसंख्या-175

[३]कात्यायनवार्तिकम्, एङि पररूपमिति सूत्रे।

[४]एङि पररूपमिति सूत्रस्य प्रदीपे।(पररूपाधिकरणम्)

[५]परमलघुमञ्जूषा, बालप्रकाशिका, निपातार्थनिरुपणम्, पत्रसंख्या-175

[६]कात्यायनवार्तिकम्, एङि पररूपमिति सूत्रे।

[७]एङि पररूपमिति सूत्रस्य प्रदीपे।(पररूपाधिकरणम्)

एतयोः अर्थयोः एवशब्दः वाचकः कुतो न उच्यते किमर्थं द्योतकत्वमुच्यते इति चेत् भगवता भाष्यकारेण पस्पशाह्निके "अथवा सन्त्येकपदान्यप्यवधारणानि"[१] इति उक्त्वा तदुदाहरणत्वेन "अब्भक्षो वायुभक्ष इति अप एव भक्षयति वायुमेव भक्षयति इति गम्यते"[२] इत्युक्तम् । अत्र एकपदानि इत्यस्य एवकाररहितानि इत्यर्थः । अत्र एवशब्दं विना अपि तदर्थप्रतीतेः तयोः अर्थयोः एवशब्दद्योत्यत्वं कल्प्यते लाघवात् । अत एव "सर्वं वाक्यं सावधारणमि"[३]ति वृद्धवचनं सङ्गच्छते । एतच्च अवधारणम् अन्ययोगव्यवच्छेदायोग-व्यवच्छेदात्यन्तायोगव्यवच्छेदभेदेन त्रिविधम् ।

**अन्ययोगव्यवच्छेदः**– तत्र विशेष्यसङ्गतैवकारेण अन्ययोगव्यवच्छेदः द्योत्यते । अर्थात् विशेष्यवा-चकपदसमभिव्याहृतः एवकारः विशेष्यादतिरिक्ते विशेषणीभूतपदार्थस्य सम्बन्धं वारयति । यथा पार्थ एव धनुर्धरः इत्यादौ पार्थाद् अतिरिक्ते पुरुषे धनुर्धरत्वस्य सम्बन्धं वारयन् पार्थे एव तन्नियमयति । तथा चाह मञ्जूषायां- "पार्थेतरावृत्ति यद्धनुर्धरत्वं तादृशधनुर्धरत्ववान् पार्थ इति बोधः इत्यन्यस्मिन् धनुर्धरत्वसम्ब-न्धव्यवच्छेदः"[४] इति ।

**अयोगव्यवच्छेदः**- विशेषणसङ्गतैवकारेण अयोगव्यवच्छेदः द्योत्यते । अर्थात् विशेषणवाचकपद-समभिव्याहृतः एवकारः विशेष्ये विशेषणस्य अयोगम् असम्बन्धं व्यवच्छिनत्ति निषेधयति इत्यर्थः । यथा शङ्खः पाण्डुर एव इत्यत्र विशेषणवाचकपाण्डुरपदसमभिव्याहृतः एवशब्दः विशेष्यभूते शङ्खे पाण्डुरत्वस्य असम्बन्धं निषेधयति अर्थात् सम्बन्धाभावाभावं द्योतयति ततः अन्ततो गत्वा द्वितीयाभावस्य भावरूप-त्वात् विशेष्ये विशेषणस्य अत्यन्तसत्त्वं नियमयति इति भावः । ततश्च शङ्खः पाण्डुरः एव भवति न तु नीलः इति अर्थः लभ्यते । तदुक्तं मञ्जूषायां- "अयोगः सम्बन्धाभावः तस्य व्यवच्छेदो निवृत्तिः द्वाभ्यां निषेधाभ्यां प्रकृतार्थदार्ढ्यबोधनेनाव्यभिचरितपाण्डुरत्वगुणवान् शङ्खः इति बोधः इत्ययोगव्यवच्छेदः न तु नील इति"[५]।

**अत्यन्तायोगव्यवच्छेदः**- क्रियासङ्गतैवकारेण अत्यन्तायोगव्यवच्छेदः द्योत्यते । अर्थात् क्रियासम-भिव्याहृतः एवशब्दः अत्यन्तस्य अतिशयितस्य असम्बन्धस्य सम्बन्धाभावस्य निषेधं करोति । यथा नीलं सरोजं भवत्येव इत्यत्र भवतिक्रियासमभिव्याहृतः एवशब्दः सरोजे नीलत्वस्य अतिशयितस्य सम्बन्धा-भावस्य निषेधं करोति । तेन नीलाभिन्नसरोजकर्तृका अतिशयितः यः सम्बन्धाभावः तदभाववती सत्ता इति बोधः । ततश्च न सकले कमले नीलत्वं विधीयते नापि निषिध्यते किन्तु यस्मिन् कस्मिन्नपि कमले नीलत्वं द्योत्यते । एतेन अन्यगुणसंयुक्तस्यापि कमलस्य प्रतीतिर्भवतीति अत्यन्तायोगव्यवच्छेदः ।

**नागेशमतविमर्शः**

नागेशमते एवशब्दः द्योतकः एव अब्भक्षः वायुभक्षः इत्यादिभाष्यज्ञापकात्। अपि च अन्ययोगव्यवच्छेदायोगव्यवच्छेदात्यन्तायोगव्यवच्छेदभेदेन त्रिविधम् एवकारद्योत्यम्। पार्थ एव धनुर्धरः, शङ्खः पाण्डर एव, नीलं सरोजं भवत्येव इति यथाक्रमम् उदाहरणानि । एतद्विहायापि एवशब्दः

[१] महाभाष्यस्य पश्पशाह्निके ।
[२] महाभाष्यस्य पश्पशाह्निके ।
[३] परमलघुमञ्जूषा, बालप्रकाशिका, निपातार्थनिरुपणम्, पत्रसंख्या-174
[४] परमलघुमञ्जूषा, बालप्रकाशिका, निपातार्थनिरुपणम्, पत्रसंख्या-174
[५] परमलघुमञ्जूषा, बालप्रकाशिका, निपातार्थनिरुपणम्, पत्रसंख्या-175

 ISSN : 2320-740X

असम्भवद्योत्यः अस्ति। यथा तवैव इत्यस्य तद्भिन्नस्य अन्यस्य न इत्यर्थः।

**जयकृष्णमतम्**

आचार्यजयकृष्ण एवशब्दार्थं निरूपयितुमाह- "तस्य व्यवच्छेदत्वमेव शक्यतावच्छेदकमि"[1]ति शक्यः व्यवच्छेदः इति। शक्तिः वाच्यत्वसम्बन्धेन यत्र विद्यते सः शक्यः। एवम् एवशब्दस्य शक्तिः वाच्यत्वसम्बन्धेन व्यवच्छेदे वर्तते अतः शक्यः व्यवच्छेदः। शक्यता च व्यवच्छेदनिष्ठा। एवं शक्यता यत्र विद्यते तत्र भासमानः धर्मः शक्यतायाः अवच्छेदको भवति। शक्यता चात्र व्यवच्छेदे विद्यतेऽतः शक्यतावच्छेदकं व्यवच्छेदत्वम्। व्यवच्छेदः इत्यस्य विरहः इतरव्यावृत्तिर्वार्थः। अयञ्च व्यवच्छेदः त्रिधा भवितुमर्हति अत्यन्तायोगव्यवच्छेदः, अयोगव्यवच्छेदः, अन्ययोगव्यवच्छेदश्चेति।

**अत्यन्तायोगव्यवच्छेदः**- तत्र एवशब्दस्य क्व अत्यन्तायोगव्यवच्छेदे शक्तिरिति जिज्ञासायामाह- "तत्र क्रियासमभिव्याहृतस्यैवकारस्य अत्यन्तायोगव्यवच्छेदे शक्तिः[2]" इति। योगः इत्यस्य अत्र सम्बन्धः अर्थः, अयोगः असम्बन्धः सम्बन्धाभावो वा। तेन आत्यन्तिकसम्बन्धाभावविरहे क्रियासमभिव्याहृतस्यैवकारस्य शक्तिः इति आयाति। यथा नीलं सरोजं भवत्येव इत्यादौ उद्देश्यविधेययोः सरोजत्वनीलत्वयोः आत्यन्तिकसम्बन्धाभावविरहत्वम् उच्यते। तथा चात्र क्रियान्वयितावच्छेदकसामानाधिकरण्येन नीलत्वान्वयः। तेन सरोजं क्वचित् नीलं क्वचिदनीलमपि भवतीत्यन्वयबोधः भवति। ननु अत्यन्तिकसम्बन्धाभावविरह इत्यस्य अत्यन्तिकसम्बन्धे पर्यवसानात् कथं नञ्द्वयोपादानमिति चेत्सत्यम् किन्तु तथा सति आत्यन्तिकसम्बन्धः एव एवकारशक्यः स्यात्तेन सरोजं सदैव नीलमेव भवति इति वाक्यार्थप्रतीतिः स्यादतः तथोक्तम्।

**अयोगव्यवच्छेदः**- तत्र एवशब्दस्य क्व अयोगव्यवच्छेदे शक्तिरिति जिज्ञासायामाह "विशेषणसंज्ञतैवकारस्यायोगव्यवच्छेदे शक्तिः[3]" इति। योगः इत्यस्य अत्र सम्बन्धः अर्थः, अयोगः असम्बन्धः सम्बन्धाभावो वा। तेन सम्बन्धाभावविरहे विशेषणसमभिव्याहृतस्यैवकारस्य शक्तिः इति आयाति। यथा शङ्खः पाण्डर एव इत्यत्र शङ्खे पाण्डरत्वायोगो व्यवच्छिद्यते। अत्र शङ्खत्वावच्छेदेन पाण्डरवत्त्वे तात्पर्यम्, वाक्यार्थस्तु शङ्खे पाण्डरसम्बन्धविरहव्यवच्छेदः, तेनैव यत्किञ्चित् शङ्खेऽपि पाण्डरसम्बन्धविरहो भवेत् तदपि शङ्खत्वावच्छेदेन पाण्डरवत्त्वं न भवेदिति क्वापि शङ्खे न पाण्डरविरह इति ज्ञेयम्। अत्र शङ्खेन सह पाण्डरत्वस्य सम्बन्धाभावं वारयित्वा शङ्खपाण्डरयोः नित्यसम्बन्धः प्रतिपादितः।

**अन्ययोगव्यवच्छेदः**- तत्र एवशब्दस्य क्व अन्ययोगव्यवच्छेदे शक्तिरिति जिज्ञासायामाह- "विशेष्यसंज्ञतैवकारस्यान्ययोगव्यवच्छेदे शक्तिः[4]" इति। अन्ययोगव्यवच्छेदः इत्यस्य इतरसम्बन्धविरह इत्यर्थः। यथा पार्थः एव धनुर्धर इत्यत्र पार्थभिन्ने धनुर्धरत्वसम्बन्धाभाव उच्यते। वस्तुतः पार्थभिन्नेऽपि धनुर्धरत्वं दृश्यतेऽतः धनुर्धरपदमत्र लक्षणया प्रकृष्टधनुर्धरबोधकम्। तेन पार्थ एव प्रकृष्टधनुर्धरः तद्भिन्ने प्रकृष्टधनुर्धरत्वसम्बन्धः निषिध्यते। अथवा धनुर्धरे पार्थतादात्म्ययोगः तद्भिन्ने तादात्म्ययोगव्यवच्छेदः गम्यते।

---

[1]सारमञ्जर्याः एवकारविचारे, पत्रसंख्या-69
[2]सारमञ्जर्याः एवकारविचारे, पत्रसंख्या-69
[3]सारमञ्जर्याः एवकारविचारे, पत्रसंख्या-69
[4]तत्रैव।

**जयकृष्णमतविमर्शः**

जयकृष्णस्य मते एवशब्दः वाचकः एव तस्य व्यवच्छेद्यत्वमेव शक्यतावच्छेदकमित्युक्तत्वात् । व्यवच्छेदो नाम विरहः । स च अन्ययोगव्यवच्छेदायोगव्यवच्छेदात्यन्तायोगव्यवच्छेदभेदेन त्रिविधः । पार्थ एव धनुर्धरः, शङ्खः पाण्डर एव, नीलं सरोजं भवत्येव इति क्रमेणोदाहरणानि । न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डे दिनकरीयव्याख्याने रामरुद्रीये अपि "एवकारस्त्रिविधः"[1] अन्ययोगव्यवच्छेदः, अयोगव्यवच्छेदः, अत्यन्तायोगव्यवच्छेदः इति स्वीकृतमस्ति । न्यायकौस्तुभकारेणापि एवकारः त्रिविधः स्वीकृतः । एवं तन्नये अत्यन्तायोगव्यवच्छेदो नाम "अन्वयितावच्छेदकव्यापकत्वाभावविशिष्टो योऽभावः प्रतियोगितासम्बन्धेन तत्प्रतियोगिताकोऽभावः" । एतादृशाभावप्रतीतिश्च क्रियासमभिव्याहृतैवकारस्थले भवति । अयोगव्यवच्छेदो नाम तादात्म्याभावव्यवच्छेदः । अस्य च विशेषणसमभिव्याहृतैवकारस्थले प्रतीतिः । अन्ययोगव्यवच्छेदः नाम अन्यतादात्म्यादिव्यवच्छेदः । अस्य बोधश्च विशेष्यसमभिव्याहृतैवकारस्थले भवति । उदाहरणानि समानानि ।

## सन्दर्भग्रन्थसूची


१. विद्वन्मनोरमाख्यव्यख्यया सहितः व्युत्पत्तिवादः । गदाधरभट्टाचार्यः । एन्. एस्. रामानुजताताचार्यः । आचार्यः हरेकृष्णशतपथी । राष्ट्रियसंस्कृतविद्यापीठम्, Institut François de Pondichery । 2011 ।

२. शाब्दबोधमीमांसा । एन्. एस्. ताताचार्यः । ड. सि. गिरिः । राष्ट्रियसंस्कृतविद्यापीठम्, Institut François de Pondichery । 2006 ।

३. सारदीव्यख्यासहिता सारमञ्जरी । जयकृष्णतर्कालङ्कारः । कालीपदतर्काचार्यः । टि. केशवनारायणः । संस्कृत अकाडेमि, राष्ट्रियसंस्कृतसंस्थानेन मानितशोधसंस्था । 2011 ।

४. प्रभादर्पणव्याख्याद्वयोपेतः वैयाकरणभूषणसारः । कौण्डभट्टः । श्रीहरिवल्लभशास्त्री, श्रीबालकृष्णपञ्चोली । श्रीहरिवल्लभशास्त्री, श्रीबालकृष्णपञ्चोली । चौखम्बा । 2006 ।

५. सावित्रीहिन्दीव्याख्योपेतः वैयाकरणभूषणसारः । कौण्डभट्टः । आद्याप्रसादमिश्रः । आद्याप्रसादमिश्रः ।

६. किरणावलीसंस्कृतव्याख्योपेता परमलघुमञ्जूषा । नागेशः । लोकमणिदाहालः । श्रीनिवासशर्मा । चौखम्बा । 2018 ।

७. बालमनोरमातत्त्वबोधिनीसहिता सिद्धान्तकौमुदी (प्रथमो भागः) । भट्टोजिदीक्षितः । वासुदेवदीक्षितः, ज्ञानेन्द्रसरस्वतिः । चौखम्बा । 2017 ।

८. व्याकरणमहाभाष्यम्(द्वितीयं खण्डम् । समर्थाह्निकम् ) । पतञ्जलिः । पण्डितशिवदत्तशर्मा । चौखम्बा संस्कृत प्रतिष्ठान । 2014 ।

९. वाक्यपदीम्(पदकाण्डस्य द्वितीयो भागः, वृत्तिसमुद्देशप्रकरणम्) । भर्तृहरिः ।, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः । 2000 ।

१०. सानुवादा सारमञ्जरी । तर्कालङ्कारजयकृष्णः । स्वामी लोकेश्वरानन्दः । कलिकाता : रामकृष्णमिशन्-इन्सटीट्युट्-आप-कालचार । 1997 ।


[1] शाब्दबोधमीमांसायाः तृतीयभागे, निपातार्थविचारे, पत्रसंख्या-279

 ISSN : 2320-740X

११. रवीन्द्रनाथशास्त्रिकृतटिप्पणीसहिता सारदीटीकया समलङ्कृता तर्कालङ्कारजयकृष्णः । शब्दार्थसारमञ्जरी सारमञ्जरी वा । कालीपदतर्काचार्यः । अशोककुमारवन्द्योपाध्यायः(सम्पा.) ॥ कलिकाता विवेकानन्दर-रोड्, बलरामप्रकाशनी । 1415 बङ्गाब्दः ।

१२. किरणावलीसमाख्यव्याख्योपेतान्यायसिद्धान्तमुक्तावली । भट्टाचार्यविश्वनाथपञ्चाननः । श्रीकृष्णवल्लभशा-स्त्री । श्रीकृष्णवल्लभशास्त्री । वाराणसी : चौखम्बासंस्कृतसंस्थानम् । 2018 ।

१३. कृष्णकान्तीटीकया प्रबोधिनीटीकया च समलङ्कृताशब्दशक्तिप्रकाशिका । भट्टाचार्यजगदीशः । कृष्णका-न्तविद्यवागीशः, रामभद्रसिद्धान्तवागीशः । ढुण्ढिराजशास्त्री । वाराणसी : चौखम्बासंस्कृतसंस्थानम् ।

१३. नागेशभावप्रकाशव्याख्यासहिता वैयाकरणसिद्धान्तलघुमञ्जूषा । नागेशः । महामहोपाध्यायः ब्रह्मश्री पेरिसूर्यनारायणशास्त्री । आचार्यः जानमद्दि रामकृष्णः । राष्ट्रियसंस्कृतविश्वविद्यालयः । 2021 ।



# वैयाकरणसिद्धान्तकौमुद्या अच्सन्धिप्रकरणे बाध्यबाधकसूत्रविमर्शः

डा. सि. एस्. आर्. लिङ्गा रेड्डी
सहायकाध्यापकः, संस्कृतविभागः,
वि.एन्.कालेज,

शुभजित्-फौजदारः*
शोधच्छात्रः,संस्कृतविभागः,
पटना-विश्वविद्यालयः

***लेखसारः*** *– भगवता पाणिनिना प्रकृतिप्रत्ययादिविभागकल्पनया उत्सर्गापवादन्यायेन समग्रा शब्दानुशिष्टिः प्रपञ्चिता । अपवादसूत्रेण उत्सर्गसूत्रं बाध्यते । निरवकाशत्वञ्चापवादबीजम् । येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति नियमः । सिद्धान्तकौमुद्याः अच्सन्धिप्रकरणे एतत्सम्बद्धानि बहूनि लक्षणानि परिलक्ष्यन्ते । यथा आद्गुणः वृद्धिरेचि इति । तथाहि - एचः अच्मध्यपतितत्वात् तस्यापि अच्त्वमस्त्येव । एवं स्थिते अवर्णाद् एचि परे यथा वृद्धिः प्राप्नोति तथैव गुणोऽपि प्राप्नोति । तर्हि अनयोः कतरो योगः सिद्धकार्यः स्यादिति संशयः । तदा तादृशस्थलेषु निरवकाशत्वात् वृद्धिरेचि इति सूत्रम् अपवादत्वेन प्रवर्तत इति सिद्धान्तः । तेन च वृद्धिरेचि इति सूत्रम् आद्गुण इति सूत्रस्य बाधकं भवति । इत्थं प्रकारेण वैयाकरणसिद्धान्तकौमुद्याः अच्सन्धिप्रकरणस्थसूत्राणां बाध्यबाधकताऽत्र विचार्यते ।*

***कूटशब्दाः*** *– बाध्यम्, बाधकम्, उत्सर्गः, अपवादः, निरवकाशत्वम्, सामान्यम्, विशेषः*

*"**काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्**"* इति वचनानुगुणं कणादप्रणीतं शास्त्रं पाणिनिप्रणीतं च शास्त्रं सर्वेषां शास्त्राणामुपकारकं भवतीति सुविदितमेव । तत्र पुनः पाणिनिप्रणीतं व्याकरणशास्त्रं संस्कृतवाङ्मये अतीव प्रसिद्धिं भजते । सर्वेषां च शास्त्राणां व्याकरणमूलत्वात् आद्यं हि तत्स्थानम् । तत्र कारणं हि शास्त्रेणानेन भाषायाः शुद्धता सम्पाद्यते । अत एव शास्त्रमिदं पदनिष्पत्तिविज्ञानमित्यपि कथ्यते । अस्यैव नामान्तरं शब्दानुशासनमिति । अनुशिष्यन्ते अपशब्देभ्यः विविच्य ज्ञाप्यन्ते साधुशब्दाः अनेनेति व्युत्पत्त्या अनु-पूर्वकात् शासु अनुशिष्टौ इति धातोः करणे ल्युट्-प्रत्यये अनुशासनमिति निष्पद्यते । शब्दानाम् अनुशासनमिति शब्दानुशासनम् । शब्दानुशासनं कथं कर्तव्यमिति चेत् तत्रायं संशयः उदेति किं साधुशब्दोपदेशः कर्तव्यः उत अपशब्दोपदेशः अथवा उभयशब्दोपदेशः इति । परन्तु शब्दानाम् आनन्त्यात् एतत्प्रकारकः उपदेशः सर्वथाप्यसम्भवः । तथाहि श्रूयते –

"**बृहस्पतिः किलेन्द्राय दिव्यं वर्षसहस्रं प्रतिपदविहितानां पारायणं प्रोवाच, न चान्तं जगाम । बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम, किं पुनरद्यत्वे यः सर्वथा चिरं जीवति स वर्षशतं जीवति**"[१] इति । तर्हि कथं शब्दानुशासनं कर्तव्यं येन अल्पीयसा प्रयत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् । अस्मिन् प्रसङ्गे काशिकाकारः तदुपायानन्तरं दर्शयति – "**प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन**"[२] इति । प्रत्ययात् पूर्वं क्रियते इति प्रकृतिः । आदिशब्देन प्रत्ययविकारागमादेशानां ग्रहणं कर्तव्यम् । एवञ्च प्रकृतिप्रत्ययविकारादीन् प्रकल्प्य शब्दानाम् अनुशासनं कर्तव्यम् । ननु प्रतिशब्दं प्रकृतिप्रत्ययादिविभाग इत्युच्यमाने गुरुतरम् आपद्येत, तद्यथा – भवति इत्यत्र भू-धातुः, तिप्प्रत्ययः, शब्विकरण इत्यादि, तर्हि कीदृशोऽयम्

---

***सम्पर्कसूत्रम्** - 7384294404 , Email- subhojit.fouzdar.vvv@gmail.com

[१] महाभाष्यम्, पस्पशाह्निकम्

[२] काशिका

अभ्युपायो दर्शितः। अत एव आह – सामान्यविशेषवता लक्षणेन इति। सामान्यं च विशेषश्च सामान्यविशेषौ, तौ यस्मिन् लक्षणे तिष्ठतस्तत् सामान्यविशेषवल्लक्षणम्। तेन सामान्यविशेषवता लक्षणेन या प्रकृत्यादिविभागकल्पना, तया हेतुभूतया शब्दानुशिष्टिः कर्तव्या। तत्र च उत्सर्गसूत्रं सामान्यवत्, तद्यथा – **"कर्मण्यण्"** इति। अस्मिन् सूत्रे धातोः, कर्मणि चेत्येतत् पदद्वयं सामान्यम्। अनेन च कुम्भकारः नगरकार इत्यादयः महान्तो महान्तः शब्दाः प्रतिपाद्यन्ते। अपवादसूत्रं च विशेषवत्, यथा – **"आतोऽनुपसर्गे कः"** इति। अत्र आत इत्येतद् अनुपसर्गे इत्येतच्च विशेषः। अनेन च गोदः कम्बलदश्चेत्यादयो भूरिशो भूरिशः शब्दाः प्रतिपाद्यन्ते। एवञ्च सामान्यसूत्रं बाध्यं भवति, विशेषसूत्रञ्च तस्य बाध्यस्य बाधकं भवति।

शास्त्रे बहुत्र लक्ष्यस्य संस्काराय एकाधिकं शास्त्रं सूत्रं वा युगपदेकत्र उपतिष्ठते। तदा द्वयोः मध्ये कस्य सूत्रस्य बलम् अधिकं कस्य वा न्यूनं भवतीति जिज्ञासा उदेति। इमामेव जिज्ञासां शमयितुं नागेशभट्टेन उच्यते –

**"पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः"**[1] इति।

तथाहि –

१. **पूर्वसूत्रम्** – पाणिनिप्रणीते अष्टाध्यायीग्रन्थे यच्छास्त्रं पूर्वं पठ्यते तद्भवति पूर्वसूत्रम्।

२. **परसूत्रम्** – यल्लक्षणमष्टाध्याय्यां परं पठ्यते तद्भवति परसूत्रम्। पूर्वपरशास्त्रयोः परशास्त्रं बलवद्भवति। परन्तु परशास्त्रं तदैव बलवद्भवति यदा शास्त्रद्वयम् अन्यत्रान्यत्र लब्धावकाशं भवति, पुनश्च लब्धावकाशयोः तयोः पूर्वपरयोरेकत्र युगपत्प्राप्तिः अस्ति। सूत्रितञ्च सूत्रकृता – **"विप्रतिषेधे परं कार्यम्"** इति। एवञ्च तुल्यबलविरोधे परशास्त्रस्य बलवत्त्वम्, अर्थात् पूर्वशास्त्रस्य परशास्त्रं बाधकं भवति।

३. **नित्यसूत्रम्** – कृताकृतप्रसङ्गी यो विधिः स नित्य इत्युच्यते। शास्त्रान्तरेण कार्यं कृतं, नापि कृतं चेद् यो विधिः प्रसज्यते स नित्यः कथ्यते।

४. **अन्तरङ्गसूत्रम्** – अन्तः मध्ये शास्त्रीयबहिरङ्गनिमित्तसमुदायमध्ये अन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्। एवं तदीयनिमित्तसमुदायाद् बहिर्भूताङ्गकं बहिरङ्गम्। अथवा स्वल्पापेक्षत्वम् अन्तरङ्गत्वम्। अधिकापेक्षत्वं बहिरङ्गत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे।

५. **अपवादसूत्रम्** – निरवकाशो विधिरपवादः। **"येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति"**[2]। न प्राप्तः इति अप्राप्तः। न अप्राप्तः इति नाप्राप्तः। नञ्द्वयं प्रकृतार्थस्य दार्ढ्यं बोधयति। यदि किमपि सूत्रं कुत्रापि अन्यत्र कार्यं नैव लभते, तदा तत् सूत्रं निरवकाशं कथ्यते। अत एव अपवाद इत्युच्यते। स च अपवादो यदा कस्यचित् लक्ष्यस्य संस्काराय उपतिष्ठते, तदा स सर्वप्रबल इति परिगण्यते। यदीदं सूत्रं कस्यापि लक्ष्यस्य संस्कारं न कुर्यात् तर्हि पाणिनेः

[1]परिभाषेन्दुशेखरः, परिभाषा - 38
[2]परिभाषेन्दुशेखरः, परिभाषा - 58

सूत्रप्रणयनमेव व्यर्थं स्यात्। परन्तु भगवतः पाणिनेः वचनं न कदापि व्यर्थं भवति, अत एव वचनप्रामाण्यात् स विधिः अपवाद इति गण्यते।

इदानीं वैयाकरणसिद्धान्तकौमुद्या अच्सन्धिप्रकरणे बाध्यबाधकसूत्राणां बाध्यबाधकता विचार्यते –

1. **आद्गुणः वृद्धिरेचि चानयोः बाध्यबाधकताविचारः –**

अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् संहितायाम् इति आद्गुणः इति सूत्रस्य अर्थः। पुनः वृद्धिरेचि सूत्रस्य अर्थस्तावत् आदेचि परे वृद्धिरेकादेशः स्यात् इति। एचः अच्मध्यपतितत्वात् एचः अच्त्वमस्त्येव। अतः वृद्धिरेचि इति सूत्रं यत्र यत्र प्रवर्तते, तत्र तत्र एचोऽपि अच्त्वात् तस्मिन् परे आद्गुणः इति सूत्रस्य प्राप्तिः स्यात्। अतः आद्गुणः इति सूत्रं सामान्यसूत्रम्, वृद्धिरेचि च विशेषसूत्रम्। सामान्यविशेषसूत्रयोः विशेषसूत्रं बलवत् भवति। अतः वृद्धिरेचि इति सूत्रम् आद्गुणः इति सूत्रस्य अपवादत्वेन प्रवर्तते। निरवकाशत्वम् अपवादस्य बीजं भवति। प्रकृते च आद्गुणः इति सूत्रम् अधिकलक्ष्यस्थलसत्त्वाद् बाध्यं भवति। पुनः वृद्धिरेचि इति सूत्रं न्यूनलक्ष्यस्थलसत्त्वाद् निरवकाशत्वाद् बाधकं भवति।

2. **वृद्धिरेचि एङि पररूपम् चानयोः बाध्यबाधकताविचारः**

आदेचि परे वृद्धिरेकादेशः स्यादिति वृद्धिरेचि इति सूत्रस्य अर्थः। पुनः एङि पररूपम् इति सूत्रस्य अर्थस्तावत् अवर्णान्ताद् उपसर्गाद् एङादौ धातौ पररूपमेकादेशः स्यात् इति। प्र+एजते इत्यादिस्थलेषु अवर्णाद् एचि एकारे परे वृद्धिरेचि इति सूत्रेण वृद्धिः प्राप्ता। पुनः एजते इति क्रियायोगात् प्र इत्यस्य उपसर्गसंज्ञकत्वात् अवर्णान्ताच्च, एङादौ धातौ परे पररूपं प्राप्नोति। एतादृशस्थलेषु केन योगेन कार्यं करणीयमिति प्रश्नः। यदि सर्वत्र वृद्धिरेचि इति सूत्रं प्रवर्तेत तदा एङि पररूपम् इति सूत्रस्य प्रवृत्त्यर्थं लक्ष्यस्थलं किमपि नावशिष्येत। तदा एङि पररूपम् इति सूत्रं व्यर्थताम् आपद्येत। परन्तु न किमपि वचनं व्यर्थं भवति भगवतः पाणिनेः। अतः येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इति वचनप्रामाण्यात् वृद्धौ अवश्यप्राप्तायाम् एङि पररूपम् इति विधिः आरभ्यते। निरवकाशत्वात् एङि पररूपम् इति सूत्रं वृद्धिरेचि इति सूत्रस्य अपवादो भवति। एवञ्च एङि पररूपम् इति सूत्रदृष्ट्या वृद्धिरेचि इति सूत्रं बाध्यं भवति, तस्य च बाध्यस्य एङि पररूपम् इति सूत्रं बाधकं भवति।

3. **आद्गुणः, एङि पररूपम्, एत्येधत्यूठ्सु चेत्येतेषु बाध्यबाधकताविचारः**

एङि पररूपम् इत्ययं योगः पररूपगुणापवादः। अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् संहितायाम् इति आद्गुणः इति सूत्रार्थः। पुनः एत्येधत्यूठ्सु इति सूत्रस्य अर्थस्तावत् अवर्णादेजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात् इति।

– उप+एति इत्यादिस्थलेषु अवर्णादचि एकारे परे आद्गुणः इति सूत्रेण पूर्वपरयोरेकगुणादेशे प्राप्ते तं प्रबाध्य एकारस्य एच्त्वात् तस्मिन् परे वृद्धिरेचि इति सूत्रेण वृद्धिः प्राप्ता। तां प्रबाध्य


ISSN : 2320-740X

एति इति क्रियायोगात् उप इत्यस्य उपसर्गसंज्ञायां एङादौ धातौ परे पररूपं प्राप्तम्। तमपि प्रबाध्य एजादौ इण्-धातौ परे वृद्धिरेकादेशो भवति। अत्र एत्येधत्यूठ्सु इति सूत्रं निरवकाशत्वात् एङि पररूपम् इति सूत्रस्य बाधकं भवति।

– प्रष्ठं वाहयति इत्यर्थे प्रष्ठवाह् इति प्रातिपदिकात् द्वितीयाबहुवचने जसि अनुबन्धलोपे प्रष्ठवाह्+अस् इति स्थिते, वाह ऊठ् इति सूत्रेण ऊठि अनुबन्धलोपे प्रष्ठ ऊ आह् अस् इति जाते, सम्प्रसारणाच्च इति सूत्रेण ऊकार-आकारयोः स्थाने पूर्वरूपे ऊकारे प्रष्ठ ऊह् अस् इति स्थिते, ठकारोत्तरवर्तिनः अकाराद् अचि ऊकारे परे पूर्वपरयोरेको गुणादेशः प्राप्नोति। पुनः ठकारोत्तरवर्तिनः अवर्णाद् ऊठि ऊकारे परे वृद्धिः प्राप्ता। एतादृशस्थलेषु निरवकाशत्वात् एत्येधत्यूठ्सु इति सूत्रमेव प्रवर्तते। अतः एत्येधत्यूठ्सु इति सूत्रम् आद्गुणः इति सूत्रस्य बाधकं भवति।

4. **आद्गुणः उपसर्गादृति धातौ चानयोः बाध्यबाधकताविचारः**

संहितायां सत्याम् अवर्णादचि परे पूर्वपरयोरेको गुण आदेशो भवतीति आद्गुणः इति सूत्रार्थः। पुनः अवर्णान्ताद् उपसर्गाद् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यादिति उपसर्गादृति धातौ इति सूत्रार्थः। प्र+ऋच्छति इत्यादिस्थलेषु अवर्णाद् अचि ऋकारे परे पूर्वपरयोरेको गुण आदेशः प्राप्नोति। पुनः उपसर्गाः क्रियायोगे इति सूत्रबलात् ऋच्छति इति क्रियायोगात् प्र इत्यस्य उपसर्गसंज्ञायाम् ऋकारादौ धातौ परे वृद्धिरेकादेशः प्राप्नोति। एतादृशस्थलेषु निरवकाशत्वात् उपसर्गादृति धातौ इति सूत्रम् आद्गुणः इति सूत्रस्य अपवादत्वेन प्रवर्तते। एवञ्च उपसर्गादृति धातौ इत्ययं योगः आद्गुणः इति योगस्य बाधको भवति।

5. **आद्गुणः, वा सुप्यापिशलेः चानयोः बाध्यबाधकताविचारः**

आद्गुणः इति सूत्रेण अवर्णादचि परे पूर्वपरयोरेको गुण आदेशो भवति। पुनः वा सुप्यापिशलेः इति सूत्रेण अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे विकल्पेन वृद्धिरेकादेशो भवति। प्र+ऋषभीयति इत्यादिस्थलेषु अवर्णादचि ऋकारे परे आद्गुणः इति सूत्रेण गुणः प्राप्नोति। तं प्रबाध्य वा सुप्यापिशलेः इति सूत्रेण विकल्पेन वृद्धौ प्रार्षभीयति इति रूपं सिध्यति। वृद्ध्यभावे तु प्रर्षभीयति इत्यपि रूपं सिध्यति। एवञ्च वा सुप्यापिशलेः इति सूत्रम् आद्गुणः इति सूत्रस्य विकल्पेन बाधकं भवति।

6. **आद्गुणः, इको यणचि, अकः सवर्णे दीर्घः चेत्येतेषु बाध्यबाधकताविचारः**

संहितायां सत्याम् अवर्णाद् अचि परे पूर्वपरयोरेको गुण आदेशो भवतीति आद्गुणः इति सूत्रार्थः। इकः स्थाने यण् स्यादचि संहितायां विषये इति इको यणचि इति सूत्रार्थः। पुनः अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यादिति अकः सवर्णे दीर्घः इति सूत्रार्थः।

– अकारस्य अक्त्वात् अकः अवर्णाद् सवर्णे अचि अकारे परे दैत्य+अरि इत्यादिस्थलेषु

आद्गुणः इति सूत्रेण गुणः प्राप्नोति, पुनः अकः सवर्णे दीर्घः इति सवर्णदीर्घः प्राप्नोति । अत्र च निरवकाशत्वात् अकः सवर्णे दीर्घः इति लक्षणं आद्गुणः इति लक्षणस्य बाधकं भवति ।

– इ, उ, ऋ, ऌ इत्येतेभ्यो वर्णेभ्यः सवर्णे अचि परे श्री+ईशः, विष्णु+उदयः इत्यादिस्थलेषु इको यणचि इति शास्त्रेण यणादेशः प्राप्नोति, अकः सवर्णे दीर्घः इति शास्त्रेण च सवर्णदीर्घः प्राप्नोति । एतादृशस्थलेषु निरवकाशत्वात् अकः सवर्णे दीर्घः इति शास्त्रम् इको यणचि इति शास्त्रस्य अपवादस्तथा बाधको भवति ।

7. **एचोऽयवायावः एङः पदान्तादति चेत्यनयोः बाध्यबाधकताविचारः**

एचः क्रमाद् अय्, अव्, आय्, आव् एते स्युरचि इति एचोऽयवायावः इति सूत्रार्थः । पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यादिति एङः पदान्तादति इति सूत्रार्थः । अतः(ह्रस्व-अकारस्य) अच्त्वात् तस्मिन् परे हरे अव, विष्णो अव इत्यादिस्थलेषु एचोऽयवायावः इति सूत्रेण एचः स्थाने क्रमाद् अयादिप्राप्तिः, पुनः एङः पदान्तादति इति सूत्रेण पूर्वरूपप्राप्तिः । एतादृशस्थलेषु निरवकाशत्वात् एङः पदान्तादति इति सूत्रम् अपवादत्वेन बलवद्भवति । एवञ्च एङः पदान्तादति इति सूत्रम् एचोऽयवायावः इति सूत्रस्य बाधकं भवति ।

8. **वृद्धिरेचि, अकः सवर्णे दीर्घः, ओमाङोश्च चेत्येतेषां बाध्यबाधकताविचारः**

वृद्धिरेचि इति सूत्रेण अवर्णाद् एचि परे वृद्धिरेकादेशो भवति । अकः सवर्णे दीर्घः इति सूत्रेण अकः सवर्णेऽचि परे पूर्वपरयोः दीर्घ एकादेशो भवति । पुनश्च ओमाङोश्च इति सूत्रेण अवर्णाद् ओमि आङि च परे पररूपमेकादेशो भवति ।

– शिवाय+ओम् इत्यादिस्थलेषु अकाराद् अचि ओकारे परे वृद्धिः प्राप्नोति, पुनः अकाराद् ओमि परे ओमाङोश्च इति पररूपं प्राप्नोति । एतादृशस्थलेषु निरवकाशत्वात् अपवादत्वेन ओमाङोश्च इति सूत्रेणैव पररूपैकादेशे शिवायोऽम् इति रूपं सिध्यति । तेन च ओमाङोश्च इति सूत्रं वृद्धिरेचि इति सूत्रस्य बाधकं भवति ।

– शिव+आ+इहि इत्यादिस्थलेषु अकार-आकारयोः स्थाने अकः सवर्णे दीर्घः इति सवर्णदीर्घः प्राप्तः । पुनः आकार-इकारयोः स्थाने आद्गुणः इति सूत्रेण एकाररूपः गुणः प्राप्तः । अत्र तु सवर्णदीर्घस्य बहिरङ्गत्वात् धातूपसर्गयोः कार्यस्य अन्तरङ्गत्वात् असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया आदौ आद्गुणः इति आकार-इकारयोः स्थाने एकारे शिव+एहि इति जाते, अन्तादिवच्च इति सूत्रेण एकारस्य पूर्वान्तवद्भावे आङ्, तस्मिन् परे प्राप्तां वृद्धिं प्रबाध्य पूर्वरूपैकादेशे शिवेहि इति रूपं सिध्यति ।

– अद्य+आ+ऋश्यात् इत्यादिस्थलेषु आकार-ऋकारयोः स्थाने गुणैकादेशे रपरत्वे अद्य + अर्श्यात् इति स्थिते, इदानीम् अकः अकाराद् सवर्णेऽचि अकारे परे अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घस्य प्राप्तिः, पुनः अवर्णात् अन्तादिवच्च इति सूत्रेण पूर्वान्तवद्भावमाश्रित्य

 ISSN : 2320-740X

अर् इत्यस्य आङि तस्मिन् परे ओमाङोश्च इति सूत्रेण पररूपस्य प्राप्तिः । एतादृशस्थलेषु ओमाङोश्च इति सूत्रम् अकः सवर्णे दीर्घः इति सूत्रस्य अपवादत्वेन प्रवर्तते, तेन अद्य + अर्श्यात् इत्यत्र पररूपे अद्यर्श्यात् इति रूपं सिध्यति । एवञ्च ओमाङोश्च इति सूत्रम् अकः सवर्णे दीर्घः इति सूत्रस्य बाधकं भवति ।

– देवालयः, विद्यालयः प्रभृत्युदाहरणेषु पररूपं वा सवर्णदीर्घो वेत्यत्र विदुषां विप्रतिपत्तिः । तथाहि आलीयते अस्मिन् इत्यर्थे आङ्-पूर्वकात् लीङ् श्लेषणे इति धातोः अच्-प्रत्यये आलयः इति रूपं, ततश्च देवानाम् आलयः इति समासे सन्धिकार्यस्य नित्यत्वात् देव+आलय इति स्थिते अकार-आकारयोः स्थाने अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घः प्राप्नोति, पुनः पूर्वान्तभावमाश्रित्य आकारस्य आङि ओमाङोश्च इति सूत्रेण पररूपं प्राप्नोति । ओमाङोश्च इति सूत्रम् अकः सवर्णे दीर्घः इति सूत्रस्य अपवादः, तेन चात्र पररूपं स्यात् । परन्तु दृश्यते यत् अत्र सवर्णदीर्घो भवति । एतादृशस्थलेषु एतद् वक्तुं शक्यते यत् विकृते आङि परे ओमाङोश्च इति सूत्रस्य प्रवृत्तिः पुनः अविकृते आङि तु अकः सवर्णे दीर्घः इति सूत्रस्य प्रवृत्तिः । तेन चात्र अविकृते आङि परे अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घे सति देवालयः, विद्यालयः प्रभृतिरूपाणि सिध्यन्ति ।

9. **एङः पदान्तादति, अवङ् स्फोटायनस्य, सर्वत्र विभाषा गोः चेत्येतेषां बाध्यबाधकताविचारः**

पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् इति एङः पदान्तादति इति सूत्रार्थः । पदान्ते एङन्तस्य गोरवङ् वाऽचि इति अवङ् स्फोटायनस्य इति सूत्रार्थः । लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः पदान्ते इति सर्वत्र विभाषा गोः इति सूत्रार्थः ।

– गो+अग्रम् इत्यादिस्थलेषु एङः ओकारात् अति अकारे परे एङः पदान्तादति इति सूत्रेण पूर्वरूपं प्राप्नोति ।

– तत्रैव गो+अग्रम् इत्यादिस्थलेषु अवङ् स्फोटायनस्य इति सूत्रेण एङन्तस्य गोः पदान्ते विकल्पेन अवङ्-आदेशः प्राप्नोति अचि अकारे परे ।

– पुनः तत्रैव गो+अग्रम् इत्यादिस्थलेषु सर्वत्र विभाषा गोः इति सूत्रेण एङन्तस्य गोः अति परे विकल्पेन प्रकृतिभावः प्राप्नोति ।

एतादृशस्थलेषु आदौ तावत् एङः पदान्तादति इति सूत्रेण प्राप्तं पूर्वरूपं प्रबाध्य अवङ् स्फोटायनस्य इति सूत्रेण विकल्पेन अवङ्-आदेशः प्राप्तः । तस्य च अवङ् स्फोटायनस्य इति सूत्रस्य अपवादत्वेन सर्वत्र विभाषा गोः इति सूत्रं प्रवर्तते । अनेन च विकल्पेन प्रकृतिभावः निर्दिश्यते । तेन च प्रकृतिभावपक्षे गोअग्रम् इति रूपं सिध्यति, प्रकृतिभावाभावपक्षे तु अवङ्-आदेशे गवाग्रम् इति रूपं सिध्यति । पुनः अवङ् स्फोटायनस्य इति सूत्रमपि वैकल्पिकम्, अतः अवङ्-अभावपक्षे एङः पदान्तादति इति सूत्रेण विकल्पेन पूर्वरूपे गोऽग्रम् इति रूपमपि सिध्यति ।

एवञ्च एङ् पदान्तादति इति सूत्रस्य अवङ् स्फोटायनस्य इति सूत्रं बाधकं भवति, पुनः सर्वत्र विभाषा गोः इति सूत्रम् अवङ् स्फोटायनस्य इति सूत्रस्य बाधकं भवतीति शम् ।

## सन्दर्भग्रन्थसूची


1. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीसहिता, प्रथमो भागः, सम्पादकः - गिरिधरशर्मा चतुर्वेदः, परमेश्वरानन्दशर्मा विद्याभास्करश्च, मोतीलाल बनारसीदास, दिल्ली, 2014
2. वैयाकरणसिद्धान्तकौमुदी, प्रथम भाग, श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता, व्याख्याकारः – श्रीगोविन्दाचार्यः, सम्पादिका – लक्ष्मी शर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2019
3. व्याकरणमहाभाष्यम्, पस्पशाह्निकम्, हिन्दीव्याख्याकारः सम्पादकश्च प्रो. जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2019
4. परिभाषेन्दुशेखरः सुबोधिनी-हिन्दीव्याख्योपेतः, हिन्दिव्याख्याकारः – आचार्य विश्वनाथ मिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2022
5. अष्टाध्यायी, सम्पादकः – श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2016
6. काशिका, सम्पादकौ – ड. जयशङ्कर लाल त्रिपाठी, ड. सुधाकर मालवीयश्च, तारा प्रिन्टिंग वर्क्स, वाराणसी, 1986





ISSN : 2320-740X

# पूर्वमीमांसान्यायसञ्चारपूर्वकम् अङ्गुष्ठमात्रपुरुषस्य ब्रह्मत्वसाधनम्

डा. विश्वनाथ हेगडे*
सहायकाचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– प्रकृते शोधपत्रे ब्रह्मसूत्रस्य प्रथमाध्यायस्य तृतीयपादगतस्य प्रमिताधिकरणस्य (१.३.२४–२५) दार्शनिकं समीक्षात्मकं च विश्लेषणं कृतम् अस्ति। अत्र कठोपनिषदः चतुर्थवल्ल्यां पठितस्य "अङ्गुष्ठमात्रः पुरुषः..." इति मन्त्रद्वयस्य तात्पर्यम् अधिकृत्य पूर्वपक्ष-सिद्धान्तयोः विषये चर्चा विहिता। पूर्वपक्षिणा प्राथम्यबलात् व्याकरण-काव्यशास्त्र-मीमांसान्यायैः अङ्गुष्ठमात्रत्वस्य जीवलिङ्गत्वं समर्थितम्, यस्य सिद्धान्तिना 'ईशानो भूतभव्यस्य' इति साक्षात् ब्रह्मश्रुत्या, रत्नप्रभोक्त-हृदयावच्छिन्न-उपाधिदृष्ट्या, उक्थ्याग्निष्टोमाधिकरणन्यायेन, मनुष्याधिकारत्वेन च सुष्ठु निरसनं कृतम्। अस्य प्रबन्धस्य मुख्यमुद्देश्यं कठोपनिषदि वर्णितस्य अङ्गुष्ठमात्रपुरुषस्य साक्षात् परमेश्वराभेदप्रतिपादनम्।*

***कूटशब्दाः*** *– कठोपनिषत्, प्रमिताधिकरणम्, न्यायरक्षामणिः, रत्नप्रभा, अप्पय्यदीक्षिताः, अङ्गुष्ठमात्रपुरुषः, उक्थ्याग्निष्टोमाधिकरणम्, अद्वैतवेदान्तः।रामायणम्, मातृका, रामः, स्तोत्रम्, काण्डम्, अयोध्या*

**विषयवाक्यम्**

ब्रह्मसूत्रस्य प्रथमाध्यायस्य तृतीयपादगतं सप्तमम् अधिकरणं "प्रमिताधिकरणम्" इति प्रसिद्धमस्ति, यस्य प्रथमं सूत्रं 'शब्दादेव प्रमितः'[१] इति। अधिकरणेऽस्मिन् कठोपनिषदः चतुर्थ्याः वल्ल्याः मन्त्रद्वयं विषयवाक्यत्वेन गृहीत्वा तस्य दार्शनिकं तात्पर्यं विचारितम्। तत्र विषयवाक्ये तावत् -

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सते॥ एतद्वै तत्॥"[२]

तथा -

"अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः॥ एतद्वै तत्॥"[३]

इति मन्त्रद्वयं समाम्नायते।

अत्र तयोः मन्त्रयोः प्रतिपाद्यमानः "पुरुषः" किं परिच्छिन्नत्वात् जीवः उत निरङ्कुश-सार्वकालिक-सामर्थ्यात् सर्वव्यापी परमेश्वरः इति संशयः। अस्य संशयस्य बीजं तावत् वाक्योपक्रमे समागतम् अङ्गुष्ठमात्रः इति अल्पपरिमाणलिङ्गं तथा उत्तरत्र श्रुता साक्षात् ब्रह्मणः बोधिका 'ईशानो भूतभव्यस्य' इति प्रत्यक्षश्रुतिश्च वर्तते।

## पूर्वपक्षः – प्रथमश्रुत-जीवलिङ्गस्य प्राबल्यम्

अत्र अस्य मन्त्रस्य मुख्यः प्रतिपाद्यः जीवः एव, न तु परमेश्वरः इति पूर्वपक्षः। तथा च वाक्यस्य प्रारम्भ एव श्रूयमाणं "अङ्गुष्ठमात्रः" इति अल्पपरिमाणं जीवस्य परिच्छिन्नताम् असन्दिग्धरूपेण प्रकाशयति। यद्यपि पश्चात् "ईशानः" इति साक्षात् ईश्वरवाचकः शब्दः श्रूयते, तथापि प्रथममवगतस्य लिङ्गस्य

---

***सम्पर्कसूत्रम्** - 9481075146, Email- vishwanathhegde@sanskrit.ac.in

[१] बादरायणः, ब्रह्मसूत्रम्, १.३.२४ — "शब्दादेव प्रमितः"।

[२] कठोपनिषत्, २.१.१२ — "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति..."।

[३] कठोपनिषत्, २.१.१३ — "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः..."।

प्राबल्यम् उपक्रमगतात् स्वभावबलात् अधिकं भवति। पूर्वमीमांसायाम् उपक्रमाधिकरणे[१] परगामिनः विधेः प्राधान्यं निरस्य यथा उपक्रमगतानाम् अर्थवादानां प्राथम्यबलमेव स्वीकृतम्, तथैवात्रापि प्रथमश्रुतं जीवलिङ्गमेव बलवत् तिष्ठति।

किञ्च "ईशानो भूतभव्यस्य" इत्यत्र 'ईशान'शब्दः न ब्रह्मणः अभिधानश्रुतिः, यतो हि तेन सह "भूतभव्यस्य" इति प्रतिसम्बन्धि पदं प्रयुक्तम्। पूर्वमीमांसान्यायानुसारं यत्र योगरूढः शब्दः प्रतिसम्बन्धिना सह प्रयुज्यते, तत्र समुदायशक्तिः अनुन्मिषिता भूत्वा केवलम् अवयवशक्तिरेव प्रकटीभवति। यथा "पद्मानि यस्याग्रसरोरुहाणि..."[२] इत्यत्र 'सरोरुह'शब्दस्य 'अग्र' इति सरःसम्बन्धिना सह योगात् यौगिकार्थे एव विश्रान्तिर्जाता, येन 'पद्म' इति मुख्यस्य रूढ्यर्थस्य बोधनाय पुनः "पद्मानि" इति पृथक् पदं प्रयोक्तव्यम् आपतितम्। यदि प्रतिसम्बन्ध्युपादानेऽपि रूढ्युन्मेषः अभविष्यत्, तर्हि भारवेः किरातार्जुनीये[३] "उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतस्सरसिरुहोद्भवः परागः" इत्यत्रेव पद्मशब्देन सह प्रयोगे पौनरुक्त्यदोषः आपन्नः अभविष्यत्। तस्मात् 'ईशानो भूतभव्यस्य' इति पदद्वयात् साक्षात् प्रत्यक्षश्रुतिः न लभ्यते, अपि तु केवलं ब्रह्मलिङ्गम् एव लभ्यते, यच्च लिङ्गं प्रथमश्रुतात् जीवलिङ्गात् निसर्गतः दुर्बलमेव।

अत्र शङ्क्यते यत् अल्पपरिमाणं न जीवस्य लिङ्गम्, अपि तु शाण्डिल्यविद्यायां दहरविद्यायां वा[४] इव अत्रापि अनन्तस्यापि ब्रह्मणः ध्यानार्थं हृदयायतनम् उपाधित्वेन अङ्गुष्ठमात्रत्वं स्वीकृतम् इति। अत्रोच्यते पूर्वपक्षिणा यत् छान्दोग्ये इव अत्रापि मन्त्रे "मध्य आत्मनि तिष्ठति" इति साक्षात् परिच्छिन्नस्थाननिर्देशो विद्यते। अत्र 'आत्मनि' इति शब्दस्य 'उदासीनः स्वभावः' इत्यर्थः न सम्भवति; यतो हि अनन्तरमन्त्रे[५] "ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति। मध्ये वामनमासीनम्..." इति श्रवणात् 'मध्य'शब्दः प्राणापानयोः मध्यवर्ति हृदयस्थानमेव लक्षयति। कोशेष्वपि 'आत्मा जीवे धृतौ देहे'[६] इति अनुशासनात् देहे आत्मशब्दप्रयोगः सिद्धः, यथा छान्दोग्ये विरोचनेन देहस्य आत्मत्वेन परिग्रहो दृश्यते[७]। कठश्रुतौ[८] "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः" इति मन्त्रान्तरेणापि अस्य अन्तःकरणोपाधिकस्य जीवस्य एव हृदयस्थानमुपदिश्यते।

किञ्च मात्रच्प्रत्ययः परिमाणवाची प्रत्ययो वर्तते यश्च 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः'[९] इति सूत्रेण विहितः। अत्र 'क्षीरमात्रम्' इतिवत् अन्यव्यावृत्तिपरः उत्तरपदलोपी समासः न गृहीतः, अपि तु अङ्गुष्ठपरिमाणमेव अस्य मुख्योऽर्थः। एतादृशं परिच्छिन्नं परिमाणं ब्रह्मणि कथञ्चिदपि न घटते, केवलं परिच्छिन्ने जीवे एव उपपद्यते। महाभारते सावित्र्युपाख्याने[१०] "अथ सत्यवतः कायात्पाशबन्धवशङ्गतम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्॥" इति यमेन सत्यवतः शरीरात्

[१] जैमिनिः, पूर्वमीमांसासूत्रम्, ३.१.१ — उपक्रमाधिकरणम् (एवम्पवकाधिकरणम्)।
[२] कालिदासः, कुमारसम्भवम्, १.१६ — "पद्मानि यस्याग्रसरोरुहाणि..."।
[३] भारविः, किरातार्जुनीयम्, ५.३९ — "उत्फुल्लस्थलनलिनीवनादमुष्मुदुद्धूतसरसिरुहोन्दवः परागः"।
[४] छान्दोग्योपनिषत, ८.१.१ (दहरविद्या) तथा ३.१४.३ (शाण्डिल्यविद्या)।
[५] कठोपनिषत्, २.२.३ — "ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति..."।
[६] अमरसिंहः, अमरकोशः, १.१.४९ — "आत्मा जीवे धृतौ देहे स्वभावब्रह्मणोरपि"।
[७] छान्दोग्योपनिषत, ८.८.१–३ (विरोचनोक्त-देहस्यात्मत्वपरिग्रहः)।
[८] कठोपनिषत्, २.३.१७ — "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा..."।
[९] पाणिनिः, अष्टाध्यायी, ५.२.३७ — "प्रमाणे द्वयसज्दघ्नञ्मात्रचः"।
[१०] पाणिनिः, अष्टाध्यायी, ५.२.३७ — "प्रमाणे द्वयसज्दघ्नञ्मात्रचः"।


ISSN : 2320-740X

पाशबद्धस्य अङ्गुष्ठमात्रस्य पुरुषस्य आकर्षणं वर्णितम्, येन अङ्गुष्ठपरिमाणत्वं नाम जीवस्यैव साधारणं लिङ्गम् इति स्मार्ती प्रत्यभिज्ञा दृढीभवति। एतेन हेतुना श्रुतावुल्लिख्यमानः अङ्गुष्ठमात्रः पुरुषः जीव एव भवितुमर्हतीति पूर्वपक्षः।

जीवे अङ्गुष्ठमात्रत्वस्य सत्त्वेऽपि तेन ब्रह्मणि अङ्गुष्ठमात्रत्वस्य प्रतिषेधः न भवति। उपासकस्य अङ्गुष्ठमात्रपरिमाणे दहरहृदये परमात्मनः अवस्थानस्य उपचारात् ब्रह्मण्यपि अङ्गुष्ठमात्रत्वं सर्वथा उपपद्यते। वस्तुतः अत्र मुख्यः विचारः प्रमाणबलविषये वर्तते। स्मार्तशब्दात् जायमानायाः जीवप्रत्यभिज्ञायाः अपेक्षायाम् उपनिषत्सु विद्यमाना श्रौतशब्दप्रत्यभिज्ञा साक्षात् बलवती भवति।

महानारायणोपनिषदि अङ्गुष्ठमात्रं पुरुषम् उपक्रम्य स एव सर्वस्य जगतः ईशः प्रभुश्चेति तथा श्वेताश्वतरोपनिषदि स एव जनानां हृदये सन्निविष्टः अन्तरात्मा इति च श्रूयते। एतेषु श्रुतिवाक्येषु स्पष्टानि सर्वजगन्नियन्तृत्व-अन्तरात्मत्वादीनि मुख्यब्रह्मलिङ्गानि प्रथमान्तपदैः निर्दिश्यन्ते। अतः बलवत्या श्रौतप्रत्यभिज्ञया दुर्बला स्मार्तप्रत्यभिज्ञा बाध्यते। एतेन कारणेन केवलम् अङ्गुष्ठमात्रत्वलिङ्गेन अयम् अङ्गुष्ठमात्रः पुरुषः जीव एवेति निर्णयः शास्त्रीयदृष्ट्या निरस्तो भवति, अपि तु दहरहृदये अवस्थितः सर्वं जगद् व्याप्य तिष्ठन् परमात्मा एव अङ्गुष्ठमात्रशब्देन प्रतिपाद्यते इति सुस्थितम्। तैत्तिरीयादिषु ब्रह्मणः ध्यानार्थं वह्निशिखादिवत् अणीयस्त्वम् एव विधीयते, न तु अङ्गुष्ठपरिमाणम्। श्वेताश्वतरादिषु यत् अङ्गुष्ठमात्रत्वं वर्णितम्, तत् जीवात्मना ब्रह्मणः अनुप्रवेशम् अपेक्ष्यैव युज्यते। जीवे तावत् अन्तःकरणोपाधिकतया हृदयावच्छेदेन अङ्गुष्ठमात्रत्वं साक्षात् घटते, यतो हि अन्तःकरणं प्रायेण अङ्गुष्ठपरिमाणस्य हृत्कमलकोशस्य अभ्यन्तरे वर्तते।

कठोपनिषद्येव[1] "तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण" इति श्लोकेन मुञ्जाद् इषीकावत् देहात् पृथक्करणोक्त्या अङ्गुष्ठमात्रस्य सञ्चारः उत्क्रान्तिश्च प्रतिपाद्यते, सा च परिच्छिन्नस्य जीवस्यैव सम्भवति। अपि च कठोपनिषदि प्रारम्भतः एव "येयं प्रेते विचिकित्सा मनुष्ये..." [2] इति जीवस्यैव परलोकसञ्चारविषयकः प्रश्नः उपस्थितः। तस्मात् पूर्वपक्षस्य सर्वथा अयमेव सिद्धान्तः निष्पद्यते यत् उपक्रमे श्रुतम् अङ्गुष्ठमात्रत्वलिङ्गम् जीवमेव समर्पयति। स च जीवः अत्र मन्त्रे सङ्कुचितदेहेन्द्रियवान् भूत्वा उत्तरत्र असङ्कुचित-भूतभव्येशितृत्वेन ध्येयत्वेन उपदिश्यते, अथवा 'तद्योऽहं सोऽसौ योऽसौ सोऽहम्' इति महावाक्यरीत्या तस्य परमेश्वराभेदेन उपासना विधीयते।

**सिद्धान्तः**

अत्र 'रत्नप्रभाकारैः'[3] प्रतिपाद्यते यत् "ईशान "शब्दः साक्षात् परमेश्वरस्य एव वाचकः शब्दः अस्ति। 'शब्दात् एव' इत्यत्र 'शब्दः' नाम साक्षात् श्रुत्यात्मकः अभिधानशब्दः। यद्यपि उपक्रमे "अङ्गुष्ठमात्रः" इति लिङ्गं श्रुतम्, तथापि उत्तरत्र आगतेन "ईशानो भूतभव्यस्य" इति साक्षात् ब्रह्मश्रुतिशब्देन तस्य लिङ्गस्य बाधः भवति। यतो हि 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये

[1]कठोपनिषत्, २.३.१७ — "तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकाम्..."।

[2]कठोपनिषत्, १.१.२० — "येयं प्रेते विचिकित्सा मनुष्ये..."।

[3]गोविन्दानन्दसरस्वती, रत्नप्रभा (शाङ्करभाष्यव्याख्या), ब्रह्मसूत्रम् १.३.२४ — "अङ्गुष्ठप्रमितः पुरुषः परमात्मा, 'ईशान' इति श्रुतिशब्दात्..."।

पारदौर्बल्यमर्थविप्रकर्षात्'[१] इति मीमांसान्यायेन श्रुतिः लिङ्गात् सर्वथा बलीयसी भवति ।

रत्नप्रभायाम्[२] एतदपि स्पष्टीकृतम् यत् 'ईशान'पदस्य रूढ्यर्थः यः परमेश्वरः, प्रतिसम्बन्धिपदसद्भावेऽपि न नश्यति । यौगिकार्थमात्रग्रहणे प्रमाणभावात् असङ्कुचितमरीच्यादि-भूतभव्येशितृत्वं केवलं परमेश्वरे एव घटते, न तु परिच्छिन्ने जीवे । पूर्वपक्षिणा यदुक्तम्—प्रतिसम्बन्ध्युपादाने योगरूढिशब्दानां रूढ्यर्थः तिरोहितो भूत्वा केवलं यौगिकार्थः एव प्रकाशते इति, तत् वेदान्तशास्त्रे न युज्यते । यतो हि प्रतिसम्बन्ध्युपादाने सत्यपि रूढशब्दश्रवणात् प्राप्तायाः अखण्ड-रूढ्युन्मेषबुद्धेः निवारणम् असम्भवमेव ।

काव्यशास्त्रेषु तु यत्र व्यङ्ग्यार्थस्य मुख्यत्वं विवक्षितं भवति, तत्र कविः अवयवशक्तिं व्यञ्जनाव्यापारेण उपयुज्य तस्याः उपक्षये सति, रूढ्या प्रतिपाद्यं मुख्यम् अर्थं प्रकाशयितुं पदान्तरं प्रयुङ्क्ते । यथा कुमारसम्भवस्य[३] "तव प्रसादात् कुसुमायुधोऽपि... कुर्यां हरस्यापि पिनाकपाणेः..." इत्यत्र "पिनाकपाणि" इति यौगिकशब्दस्य प्रयोगे सत्यपि तस्य रूढ्यर्थः 'शिवः' इत्येव गृह्यते । प्रकृते तु कठश्रुतौ "ईशानो भूतभव्यस्य" इत्यत्र कश्चिद् रूढ्यर्थसंकोचकः शब्दः नास्ति । 'भूतभव्यस्य' इति प्रतिसम्बन्धिपदं यौगिकमर्थम् अनुवदत् अपि रूढ्युन्मेषं न वारयति । अतः 'ईशान'पदं साक्षाद् ब्रह्मण एव वाचकम् ।

## उपक्रमगतजीवलिङ्गस्य बाधः मीमांसान्यायश्च (उक्थ्याग्निष्टोमाधिकरणम्)

अत्र जीवस्य यत् स्वाभाविकं वा कल्पितं वा अङ्गुष्ठमात्रत्वम् अस्ति, तस्य अङ्गुष्ठपरिमाणस्य जीवभावस्य उपमर्देन (बाधेन) 'तत्त्वमसि' इति महावाक्यवत् निरङ्कुश-ब्रह्मभावः एव अत्र उपदिश्यते । वेदान्तसिद्धान्ते यत्र उपक्रमगतम् अनुवादकं भवति, उत्तरगामि च वाक्यं विधेयं भवति, तत्र विधेयस्य उत्तरवाक्यस्य तात्पर्याधिक्यात् उपक्रमगतस्य सिद्धानुवादस्य बाधः एव न्याय्यः ।

पूर्वमीमांसायाः दशमाध्याये प्रसिद्धम् उक्थ्याग्निष्टोमाधिकरणं वर्तते । तत्र "उक्थ्याग्निष्टोमयोः संयोगादस्तु सङ्ख्या..." इति सूत्रे विचारितं यत् "अप्यग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्यः" इति वचनेन यदि क्षत्रियः यजमानः भवति, तर्हि अग्निष्टोमक्रतौ षोडशिग्रहणाख्यः यागाभ्यासः विधीयते । तत्र पूर्वपक्षे अग्निष्टोम-संस्थायाः अनुग्रहाय स्तोत्रशस्त्ररहितः अभ्यासः स्यात् इति प्राप्ते, सिद्धान्ते तु षोडशिग्रहणाभ्यासविधौ साङ्गस्य यागस्य विधानात् तदङ्गभूतयोः स्तोत्रशस्त्रयोः निवारणम् असम्भवम् इति अङ्गीकृतम् । अतः उत्तरगामिना षोडशिग्रहणेन पूर्वतनस्य उक्थ्याग्निष्टोम-संस्थास्वरूपस्य उपमर्दं कृत्वा स्तोत्रशस्त्रसहितः एव षोडशिप्रगाथात्मकः यागः अनुष्ठीयते ।

इममेव मीमांसान्यायं प्रकृते प्रमिताधिकरणे योजयन् सिद्धान्ती निष्कर्षं वदति यत् यथा मीमांसायाम् उत्तरभाविना षोडशिग्रहणेन पूर्वतनस्य अग्निष्टोमसंस्थास्वरूपस्य बाधः क्रियते, तथैवात्रापि उत्तरगामिन्या "ईशानो भूतभव्यस्य" इति प्रत्यक्ष-ब्रह्मश्रुत्या उपक्रमगतस्य अङ्गुष्ठमात्रत्व-जीवलिङ्गस्य बाधः क्रियते । अत्र कठोपनिषदः उत्तरमन्त्रे "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा..." इत्यत्र पूर्वार्द्धेन जीवस्य

---

[१]जैमिनिः, पूर्वमीमांसासूत्रम्, ३.३.१४ — "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" ।

[२]गोविन्दानन्दसरस्वती, रत्नप्रभा, सू० १.३.२४ — "रूढिशब्दस्य प्रतिसम्बन्ध्युपादानेऽपि न यौगिकार्थमात्रपरत्वम्, मुख्यार्थबाधाभावात्" ।

[३]कालिदासः, कुमारसम्भवम्, ३.१० — "कुर्यां हरस्यापि पिनाकपाणेः..." ।


ISSN : 2320-740X

अनुवादं कृत्वा, "तं स्वाच्छरीरात् प्रवृहेत्" इति देहाद् विवेचनं विधाय, "तं विद्याच्छुक्रममृतम्" इति शुद्धब्रह्मभावः विधीयते। तथैवात्रापि "अङ्गुष्ठमात्रः" इति जीवस्य अनुवादः, "ज्योतिरिवाधूमकः" इति देहाद् विवेचनम्, तथा "ईशानो भूतभव्यस्य" इत्यनेन असङ्कुचित-व्यापकब्रह्मभावः विधीयते।

ननु असङ्गस्य विभोः ब्रह्मणः कथम् अङ्गुष्ठमात्रत्वपरिमाणं सम्भवति? अत्र 'रत्नप्रभा'कारैः[1] प्रतिपादितं यत् परमेश्वरः वस्तुतः विभुः व्यापकश्च सन् अपि, उपासनायां ध्यातृणां मनुष्याणां हृदये अभिव्यज्यते। अङ्गुष्ठमात्रं हृत्कमलं प्राणिनाम् उपाधिः भवति। ननु जीवस्य हृदयस्थानमपेक्ष्य अङ्गुष्ठमात्रत्वम् उच्यते चेत्, हस्ति-मशकादीनां प्राणिनां हृदयपरिमाणस्य भिन्नत्वात् तथा खर-तुरगादीनां खुरयुक्तानां प्राणिनाम् अङ्गुष्ठस्य एवाभावात् तेषु कथं घटेत? अस्याः शङ्कायाः निरसनाय **"हृद्यपेक्षया तु मनुष्याधिकारत्वात्"**[2] इति सूत्रे मनुष्याधिकारत्वात् इत्युक्तम्। यतो हि वेदान्तादिशास्त्रं केवलं मनुष्यानेव अधिकरोति। मनुष्याणां च हृत्कमलं स्वाङ्गुष्ठपरिमाणं भवति। तस्मात् मनुष्याणां हृदयावच्छिन्नस्य जीवस्य अङ्गुष्ठमात्रत्वेन अनुवादः, तदुपलक्षितस्य ब्रह्मणः उपाधिद्वारा ध्यानं च सर्वथा उपपन्नं युक्तिसङ्गतञ्च।

भाष्यकारैः यद्यपि ध्यानार्थं ब्रह्मणः अङ्गुष्ठमात्रत्वं व्याख्यातम्, तथापि न्यायरक्षामणौ अप्पय्यदीक्षितपादैः रत्नप्रभाकारैश्च अस्य मन्त्रस्य 'तत्त्वमसि'वाक्यवत् जीव-ब्रह्मणोः अभेदप्रतिपादनपरावान्तरवाक्यत्वेन अपि योजनम् उपपादितम्। सूत्रे "तु"शब्दश्रवणेन एतद् स्पष्टं भवति यत् अनन्यगत्या कुत्रचित् सङ्कोचे कृतेऽपि सर्वत्रापि मन्त्रे सङ्कोचः न कर्तव्यः। जीवस्य अङ्गुष्ठमात्रत्वम् अनूद्य, तस्य परमेश्वराभेदेन उपदेशे सति ब्रह्मणः व्यापकत्वोपलक्षणत्वेन असङ्कुचित-भूतभव्येशितृत्वम् उपपद्यत एव।

### निष्कर्षः

तस्मात् कठोपनिषदि निर्दिष्टः "अङ्गुष्ठमात्रः पुरुषः" साक्षात् निरस्तसमस्तोपाधिकः सर्वव्यापी परमेश्वरः एव इति सर्वमनवद्यम्।

## सन्दर्भग्रन्थसूची


१. न्यायरक्षामणिः , अप्पय्यदीक्षिताः, (प्रथम-अध्याय-व्याख्यानम्), श्रीमदप्पय्यदीक्षितग्रन्थप्रकाशकसमितिः, वाराणसी.
२. रत्नप्रभा (ब्रह्मसूत्रशाङ्करभाष्यव्याख्या), गोविन्दानन्दसरस्वती, निर्णयसागर प्रेस / चौखम्बा संस्कृत संस्थान, वाराणसी।
३. ब्रह्मसूत्रशाङ्करभाष्यम् (भामती-वेदान्तकल्पतरु-परिमलोपबृंहितम्), शङ्कराचार्यः, चौखम्बा संस्कृत संस्थान, वाराणसी।
४. मीमांसादर्शनम् (शाबरभाष्यसहितम्), जैमिनिः, आनन्दाश्रम संस्कृत ग्रन्थावली, पुणे।
५. अष्टाध्यायी (काशिकावृत्तिसहिता), पाणिनिः, मोतीलाल बनारसीदास, दिल्ली।
६. उपनिषत्समग्रः (कठोपनिषद् भाष्यसहितम्), गीता प्रेस, गोरखपुर।


[1] गोविन्दानन्दसरस्वती, रत्नप्रभा, सू० १.३.२५ — "ननु विभोः कुतोऽङ्गुष्ठमात्रत्वम्? तत्राह—हृद्यपेक्षयेति। मनुष्याणां स्वाङ्गुष्ठमात्रं हृदयं तदवच्छेदात् ब्रह्मणः तथात्वम्..."।

[2] ब्र.सू.१.३.२५

# प्रत्यक्षस्य वर्तमानमात्रग्राहित्वम्

महेश चिदम्बर भट्टः*
सहायकाचार्यः, कुमारभास्करवर्म-सं.पु.वि.वि.
नलबारी, असमः

***लेखसारः*** *– भगवता जैमिनिना विरचिते मीमांसाशास्त्रे चतुर्थं सूत्रं भवति प्रत्यक्षसूत्रम्। इदं सूत्रं प्रत्यक्षलक्षणं वक्तुं नागतमिति प्रतिपाद्य योगिज्ञानं प्रत्यक्षं भवितुं नार्हति इति प्रतिपादनेन च सह प्रत्यक्षस्य वर्तमानमात्रग्राहित्वमिति विषयः श्लोकवार्तिकानुसारं प्रतिपिपादयिष्यते ।*

***कूटशब्दाः*** *– प्रत्यक्षम्, योगिप्रत्यक्षम्, सम्प्रयोगः, वर्तमानमात्रग्राहित्वम् ।*

**सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षं विद्यमानोपलम्भनत्वात् इति प्रत्यक्षसूत्रम्।**[१] इन्द्रियाणां सत्सम्प्रयोगे- सता सम्प्रयोगे- विद्यमानेन अर्थेन सम्प्रयोगे - सन्निकर्षे सति पुरुषस्य या बुद्धिः जायते, सा बुद्धिरेव प्रत्यक्षमित्युच्यते। तच्च प्रत्यक्षं धर्मे अनिमित्तम्- अप्रमाणम्। कुतः? – विद्यमानोपलम्भनत्वात्। विद्यमानस्य उपलम्भनं भवति प्रत्यक्षम्, धर्मस्तु साध्यः, कालान्तर्भावि वर्तते, अतः न विद्यमानः। तस्मात् अर्थस्य अविद्यमानत्वात् प्रत्यक्षं धर्मे प्रमाणं भवितुं नार्हतीति सूत्रार्थः।

**भवदासमतखण्डनम्** : अत्र भवदासः[२] - **सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्** इत्येतावत्पर्यन्तं एकः भागः, **अनिमित्तं विद्यमानोपलम्भनत्वात्** इति द्वितीयः भागः। तत्र प्रथमः भागः प्रत्यक्षलक्षणप्रतिपादकः, द्वितीयः प्रत्यक्षस्य धर्मे अप्रामाण्यकथनपरः इत्येवं सूत्रस्य द्वौ भागौ कृत्वा व्याख्यानमकार्षीत्। तत्र वार्तिककारैः इदं सूत्रं प्रत्यक्षलक्षणं वक्तुं नागतमिति भवदासमतं खण्ड्यते –

**चोदनालक्षणोऽर्थो धर्मः**[३] इति द्वितीये सूत्रे चोदना एव धर्मे प्रमाणं भवतीत्युक्त्वा, **तस्य निमित्तपरीष्टिः**[४] इति तृतीये सूत्रे तस्य धर्मप्रमाणस्य परीक्षा कर्तव्या इत्युक्तम्। तत्र चोदनैव धर्मे प्रमाणं भवतीति प्रतिज्ञायां द्वौ अंशौ वर्तेते[५]। १. चोदनातिरिक्तं प्रमाणं धर्मे प्रमाणं न भवति, २. चोदना च प्रमाणं भवतीति। एतद्वयसाधनार्थं च परीक्षा कर्तव्या वर्तते। अतः इदानीं यदि प्रत्यक्षलक्षणं कथ्यते तर्हि पूर्वोक्तप्रतिज्ञाद्वयं साधयितुं प्रत्यक्षलक्षणकथनमुपयुज्यते वा न वा इति आदौ विचार्यते – तत्र वार्तिककाराः प्रत्यक्षलक्षणकथनं एतत्प्रतिज्ञाद्वयसाधनार्थं नोपयुज्यते इति वदन्ति। अत्र प्रश्नः – प्रत्यक्षादिकं धर्मे प्रमाणं न भवतीति वक्तव्यं वर्तते। अतः प्रत्यक्षस्य ज्ञानार्थं प्रत्यक्षलक्षणं वक्तव्यम्, अतः पूर्वप्रतिज्ञासाधनार्थत्वमत्र सम्भवति खलु इति। तत्रोच्यते – यथा प्रत्यक्षलक्षणमुच्यते तथा अनुमानादीनामपि लक्षणं यद्युक्तं स्यात् तर्हि एवं वक्तुं शक्येत। सूत्रकारेण तु केवलं प्रत्यक्षप्रमाणस्यैव लक्षणमुक्तमस्ति इति। अनुमानादीनां यदि प्रमाणत्वमेव नेष्येत, अथवा अनुमानादीनां सर्वेषां प्रत्यक्षे एव अन्तर्भावः इष्येत, अथवा प्रत्यक्षलक्षणमुच्यते चेत् अनुमानादिलक्षणमपि सिद्धं भवति इति यदि स्यात् तर्हि प्रत्यक्षमात्रस्य लक्षणकथनं युज्येत। परन्तु एवं नास्ति। प्रत्यक्षात् अतिरिक्तं अनुमानादिकं यत्

---

***सम्पर्कसूत्रम्** - Mo :- 8762917602, Email- soolgarcmaheshbhat@gmail.com

[१] मीमांसासूत्रम्- १.१.४ भा.दी-पृ.सम्-

[२] श्लो.वा-प्रत्यक्षसूत्रम्-श्लोकः - १

[३] मीमांसासूत्रम् १.१.२/अ.मी.कु पृ.सम्- ४

[४] मीमांसासूत्रम् १.१.३/अ.मी.कु पृ.सम्- ४

[५] श्लोकवार्तिकम् श्लो.सम् - २

प्रमाणं तेषां प्रमाणत्वमङ्गीक्रियते । अतः प्रत्यक्षलक्षणकथनमनुपपन्नमेव इति । शङ्का – प्रत्यक्षलक्षणमुक्तं चेत् प्रत्यक्षपूर्वकमनुमानादिकमित्येवम् अनुमानादिलक्षणं सिद्धं भवति खलु इति। तत्रोच्यते – प्रत्यक्षलक्षणमिदं प्रमाणान्तरेणापि सम्बद्धं स्यात् इति कृत्वा यथा प्रत्यक्षपूर्वकम् अनुमानादिकमिति वक्तुं शक्यते तथा प्रत्यक्षापूर्वकमनुमानादिकमित्यपि वक्तुं शक्यते। अतः केवलं प्रयक्षलक्षणकथनेन प्रत्यक्षपूर्वकमनुमानादिकमित्येवं वक्तुं न शक्यते । अपि च प्रत्यक्षपूर्वकमनुमानादिकमित्येतादृशकथनेन प्रयोजनं किमपि न सिध्यति । अर्थात् अनुमानादिप्रमाणानां स्वरूपं वा, प्रत्यक्षं विहाय अन्यानि कति प्रमाणानि सन्तीति इयत्ता वा न ज्ञातुं शक्यते। यदि अनुमानादीनां स्वरूपादिकं तु प्रसिद्धमेव वर्तते अतः तत् वक्तव्यमिति नास्ति इति उच्येत तर्हि प्रत्यक्षमपि प्रसिद्धं तस्य स्वरूपकथनं किमर्थं क्रियते इति प्रश्नः स्यात्। एवं बहुषु प्रमाणेषु सत्सु जैमिनिना केवलं प्रत्यक्षप्रमाणमात्रमुक्तम् इत्युक्तौ अन्यानि प्रमाणानि धर्मे न भवन्तीति स्यात्। अथवा प्रमाणान्तराङ्गीकारेऽपि प्रत्यक्षलक्षणकथनं जल्पः इव, नाम किमपि अनालोच्य जैमिनिना उक्तमिति स्यात्। यदि बुद्धिपूर्वकं सूत्रप्रणयनं करोति तर्हि बहुषु प्रमाणेषु सत्सु प्रत्यक्षमेकं न लक्षयेत् इति। एवमेतावत् पर्यन्तमिदं सूत्रं यदि लक्षणपरं स्यात् तर्हि अनुमानादिप्रमाणानामपि लक्षणं सूत्रकारेण वक्तव्यं स्यात् परन्तु नोक्तमिति दोषकथनं कृतम् ।

**इदानीं प्रत्यक्षलक्षणमेव अनेन सूत्रेण सम्यक् वक्तुं न शक्यते इत्युच्यते-** यदि इदं लक्षणं स्यात् तर्हि प्रत्यक्षाभासे, अनुमाने, स्मृतौ इत्येवं स्वप्नज्ञानं विहाय- स्वप्नज्ञाने इन्द्रियसन्निकर्षजन्यत्वं नास्ति, इन्द्रियार्थसम्बन्दरूपव्यापारं विना स्वप्नज्ञानं भवतीत्यतः तदेकं विहाय अन्यत्र सर्वत्र अतिव्याप्तं भवति । शुक्तौ इदं रजतमिति यः प्रत्यक्षाभासः, तत्रापि इन्द्रियार्थसम्प्रयोगेणैव ज्ञानं जायते । शुक्तिसम्प्रयोगेणैव इदं रजतमिति ज्ञानं जायते । एवं विद्यमानस्य धूमस्य इन्द्रियसन्निकर्षेणैव वह्न्यनुमितिः जायते । अतः इदं सर्वं प्रत्यक्षमिति स्यात्। यतः सूत्रे यस्य विषयस्य ज्ञानं तस्य विषयस्य इन्द्रियेण सम्बन्धे सति जायमानं ज्ञानं प्रत्यक्षमिति तु नोक्तम्। सामान्यतः विद्यमानेन अर्थेन इन्द्रियसम्प्रयोगे सति जायमानं ज्ञानं प्रत्यक्षमित्युक्तमित्यतः अनुमानादीनामपि प्रत्यक्षत्वापत्तिः स्यात्। अतः इदं सूत्रं लक्षणकथनपरं नास्ति। तस्मात् प्रत्यक्षस्यैव अनुक्तत्वात् प्रत्यक्षलक्षणं एतादृशमिति अनेन सूत्रेण बोधयितुं वा, प्रत्यक्षस्य एतादृशं लक्षणं प्रसिद्धमस्तीति तदनूद्य एतादृशलक्षणयुक्तत्वात् प्रत्यक्षं न धर्मे प्रमाणमित्येवं प्रत्यक्षलक्षणविधानं वा अनुवादो वा अत्र सूत्रे कर्तुं न शक्यते । एवं च अस्य सूत्रस्य इन्द्रियार्थसम्प्रयोगे सति यत् ज्ञानं जायते तस्य प्रत्यक्षत्वमित्येवं प्रत्यक्षलक्षणकथने तात्पर्यं नास्तीति सिद्धम् ।

**तर्हि सूत्रस्य तात्पर्यं किमस्तीति जिज्ञासायामुच्यते-** विद्यमानेन अर्थेन इन्द्रियसम्प्रयोगे जायमानत्वमिति यः धर्मः सः लोके यत् प्रसिद्धं प्रत्यक्षं तत्र विद्यते इति । एवं प्रत्यक्षस्य विद्यमानोपलम्भनत्वात् धर्मे न प्रमाणमिति बोधयितुं इदं सूत्रमागतमिति । सूत्रव्याख्यानसन्दर्भे भाष्यकारैः **एवं लक्षणकं हि तत्**[1] इति किमर्थमुक्तमिति जिज्ञासायामुच्यते – भाष्यकारैः प्रत्यक्षस्वरूपविवक्षया नोक्तम् । किन्तु प्रत्यक्षं एतादृशलिङ्गकमित्यभिप्रायेणोक्तम्[2] । अर्थात् – प्रत्यक्षं विद्यमानोपलम्भनम्- विद्यमानेन इन्द्रियसम्प्रयोगे सति जायमानत्वरूपधर्मप्रयुक्तत्वात् इति प्रत्यक्षस्य विद्यमानोपलम्भनत्वं साध्यते । अतः तदर्थं- विद्यमा-

[1]शाबरभाष्यम्-पु.सम्- २१

[2]श्लोकवार्तिकम् श्लो.सम्-१९

नोपलम्भनत्वसाधनार्थं यः हेतुः सः एव भाष्यकारैः निर्दिष्टः । एवं प्रत्यक्षस्य विद्यमानोपलम्भनत्वात् धर्मे तन्न प्रमाणम् इति । सर्वस्यापि प्रत्यक्षस्य इन्द्रियसन्निकर्षजन्यत्वात् विद्यमानोपलम्भनत्वं स्वीकुर्वन्ति । एवं च सति इन्द्रियार्थसम्प्रयोगे यत् ज्ञानं भवति तत् प्रत्यक्षमिति, तस्य च विद्यमानोपलम्भनत्वं वर्तते इति उक्तं भवति । तर्हि विद्यमानोपलम्भनत्वात् धर्मे प्रत्यक्षं प्रमाणं न भवतीति सिद्धमेव खलु अतः पुनः किमर्थं वक्तव्यमिति प्रश्ने सति **उच्यते** –

अतीतानागते सूक्ष्मे व्यवहितेऽपि च अर्थे योगिनां मुक्तानां वा यत् ज्ञानं तत्प्रत्यक्षमिति केचन वदन्ति[१]। अतः योग्यादीनां प्रत्यक्षम् इन्द्रियसन्निकर्षं विनापि भवति अर्थात् विद्यमानोपलम्भनत्वं योगिप्रत्यक्षे नियतं नास्ति। अविद्यमानोपलम्भनत्वमपि योगिप्रत्यक्षे वर्तते इति केचन मन्यन्ते, तथा नास्ति। योगिनां प्रत्यक्षमपि इन्द्रियार्थसन्निकर्षजन्यमेव इति बोधयितुं, तत्पक्षखण्डनार्थम् इदं वक्तव्यमस्ति। अतः प्रत्यक्षं धर्मे न प्रमाणं विद्यमानोपलम्भनत्वात् इत्युच्यते चेत् योग्यादीनां भूतभविष्यदुपलम्भनत्वमपि अस्तीत्यतः हेतुरयं असिद्धः स्यात्। यस्य तु पक्षैकदेशे सम्बन्धो नास्ति, सः भागासिद्धः[२] इत्युच्यते। योगिप्रत्यक्षरूपपक्षैकदेशे विद्यमानोपलम्भनत्वं न स्यादिति अत्र हेतुः असिद्धः स्यादिति। अस्यैव व्याप्यसिद्धः इत्यपि नाम वर्तते इत्युक्तं मानमेयोदये। एवं प्रत्यक्षं पक्षीकृत्य धर्मे अप्रामाण्यं साध्यते चेत् हेतुः असिद्धः भवति । अथवा धर्ममेव पक्षीकृत्य प्रत्यक्षाग्राह्यत्वं साध्यते भविष्यत्वहेतुना – धर्मः प्रत्यक्षाग्राह्यः भविष्यत्वात् भविष्यत्कालिकवृष्ट्यादिवत् इति । अर्थात्- अग्रे वृष्ट्यादिकं भविष्यतीति इदानीं प्रत्यक्षेण यथा न ज्ञायते तथा धर्मोऽपि न प्रत्यक्षग्राह्यः इति। योगिनां प्रत्यक्षं भविष्यत्कार्यविषयकमपि भवतीतिस्वीकारे भविष्यत्वरूपहेतोः व्यभिचारः भवति । एतदेव साध्यविपरीतव्याप्तः साध्यस्वरूपविरुद्धः[३] इत्युक्तं मानमेयोदये । योगिप्रत्यक्षं प्रत्यक्षं इति यदा स्वीक्रियते तदा प्रत्यक्षग्राह्यत्वमेव भविष्यत्वरपहेतौ आगतमित्यतः भिष्यत्वरूपहेतुः साध्यविपरतव्याप्तः भवति । योगिप्रत्यक्षे भविष्यत्वरूपहेतुः वर्तते परन्तु साध्यं प्रत्यक्षग्राहत्वाभावः, तन्नास्ति, अपितु तदभावः एव वर्तते इति साध्याभाववद्वृत्तित्वरूपव्यभिचारः इति दोषः अत्र भवति । एवं च विद्यमानोपलम्भनत्वहेतोः असिद्धत्वम्, भविष्यत्वहेतोः व्याभिचारः इति एतद्दोषद्वयवारणार्थं सर्वमपि प्रत्यक्षं इन्द्रियसम्प्रयोगे सत्येव भवति इति बोधयितुं सत्सम्प्रयोगे इत्युक्तम्[४]। लोके यादृशं प्रत्यक्षं भवति तादृशमेव योगिनामपि प्रात्यक्षम्, तद्भिन्नं नास्ति। योगिप्रत्यक्षमपि प्रत्यक्षं तस्मात् तस्यापि विद्यमानोपलम्भनत्वं तथा सत्सम्प्रयोगजन्यत्वमपि भवेत् इति। योगिप्रत्यक्षं विद्यमानोपलम्भनं सत्संप्रयोगजन्यञ्च प्रत्यक्षत्वात् अस्मदादिप्रत्यक्षवत् इति ।

लोके भविष्यदर्थविषयिणी प्रत्यक्षबुद्धिः कापि प्रसिद्धा नास्ति। अपि च यत् ज्ञानं भविष्यदर्थकं भवति तत्र प्रत्यक्षत्वं वा प्रमात्वं वा लोके नैव दृश्यते। यथा प्रतिभायाम्। मनसि किञ्चित् भाति एवं भविष्यतीति एतदेव प्रतिभा इति कथ्यते। एतत् सत्यमेव भवेत् इति नास्ति। प्रत्यक्षादिना किमपि अज्ञात्वा चिन्तयति चेत् तस्याः प्रत्यक्षाद्यनपेक्षिण्याः प्रतिभायाः अर्थनिर्णयाय अपर्याप्तत्वं यथा तथा

[१] श्लोकवार्तिकम्, श्लो.सम्-२६
[२] मानमेयोदयः पृ.सम् ७३
[३] मानमेयोदयः पृ.सम् ७९
[४] मीमांसाश्लोकवार्तिकम्, श्लो.सम्-२७


ISSN : 2320-740X

योगिज्ञानस्यापि इति। योगिज्ञानमपि प्रत्यक्षादिमलकं चेदेव अर्थनिर्णयाय पर्याप्तं भवति। अन्यथा योगिज्ञानम् अविद्यमानधर्मविषयेऽपि प्रमाणमिति स्यात्। तथा तु नास्ति। एवं च योगिप्रत्यक्षमपि अविद्यमानार्थविषयकं न भवतीति जातम्। अतः यदि तेषां योग्यादीनां किञ्चित् ज्ञानम् अवर्तमाने विषये जायते तर्ह तत् ज्ञानं प्रत्यक्षमिति वक्तुं नैव शक्यते, स्मृतिः, अनुमानमित्येवं वक्तव्यम्। सामान्यमनुष्याणामपेक्षया विशेषसिद्धिसत्वात् पूर्वतनं स्मरन्ति, अथवा हेतुदर्शने तीक्ष्णा मतिरस्तीत्यतः अनुमीयते इत्येवमेव वक्तव्यम्। एवं च योगिनां प्रत्यक्षं विद्यमानोपलम्भनं प्रत्यक्षत्वात्, योगिनां प्रत्यक्षं धर्मे न प्रमाणं विद्यमानोपलम्भत्वात् इति सिद्धम्।

सत्सम्प्रयोगे इत्यत्र सद्ग्रहणं कुतः ? इति चेदुच्यते- सद्ग्रहणाभावे सम्प्रयोगे इति भवति। तदा विद्यमानेन वस्तुना सह सम्प्रयोगे एव प्रत्यक्षं भवेत् इति न भवति। योगिनां तावत् अवर्तमानेनापि सन्निकर्षेण अतीतानगतादिविषयकं प्रत्यक्षं भवतीत्युच्यते। एतत्खण्डनार्थमेव सद्ग्रहणमावश्यकमिति। इदानीं सर्वमपि प्रत्यक्षं सत्सम्प्रयोगजम्- वर्तमानसम्प्रयोगजन्यमिति वक्तव्यम्[१]। तथा च अविद्यमानसंयोगजन्यं यत् योगिप्रत्यक्षं तत् निराकृतं भवति, अतः तदर्थं सद्ग्रहणं सूत्रे कृतमिति।

## सन्दर्भग्रन्थसूची

१. शाबरभाष्यम्- शबरस्वामी-सम्पादकः-विनायक गणेश आपटे- प्रथमो भागः-Published by Anandashrama press , Poona , 1929.

२. श्लोकवार्तिकम् – कुमारिलभट्टपादाः , Published by Ratna publications , Varanasi in 2007.

३. अध्वरमीमांसाकुतूहलवृत्तिः – श्रीवासुदेवाध्वरी , published by L.B.S Sanskrit University NewDelhi. 1969

४. मानमेयोदयः – नारायणौ- published by चौखम्बा विद्याभवन. २००९

५. भाट्टदीपिका – खण्डदेवः – प्रथमं संपुटम्, published by राष्ट्रियसंस्कृतसंस्थानम्, नवदेहलि, 2010.



[१]मीमांसाश्लोकवार्तिकम्, श्लो.सम्-२८.५

# गौडीयवैष्णवदर्शने प्रतिपादितस्यानादितत्त्वस्य दार्शनिकनिरूपणम्

डा. राजेशः प्रामाणिकः*
सहायकाचार्यः,
कर्णाटक-आयुर्वेद-महाविद्यालयः, मङ्गलूरु

***लेखसारः*** *– प्रभुपादसत्यानन्दगोस्वामिना सम्पादितस्य तत्त्वसन्दर्भस्य चतुस्त्रिंशदनुच्छेदस्य टीकायां श्रीपादबलदेवविद्याभूषणेन पञ्चानामनादितत्त्वानाम् उल्लेखः कृतः । तानि च ब्रह्म जीवः प्रकृतिः (माया) कालः कर्म च । विष्णुपुराणस्य श्लोकान् उद्धृत्यापि तेनोक्तानां तत्त्वानामनादित्वं प्रदर्शितम् । विष्णुपुराणे एतानि पञ्च मूलभूतानि दार्शनिकतत्त्वानि ब्रह्म जीवः माया (प्रकृतिः) कालः कर्म जगतः सृष्टेः स्थितेः मुक्तेश्च आधारभूतत्वेन निरूपितानि सन्ति । समग्रसृष्टेः मूलं परब्रह्मणः स्वरूपं तस्य मायाशक्तिश्च त्रिभिर्गुणमयैर्भावैर्मोहितं नाभिजानाति, मामेव्यः परमव्ययम्*[१] *इति युक्ता वर्तते । यज्जीवं कर्मकालचक्रे निबध्नाति । एवं ज्ञायते यत्ब्रह्म जीवः प्रकृतिः (माया) कालश्च अनादयः सन्ति । एतेषु प्रथमचत्वारि तत्त्वानि नित्यानि । यतो हि तानि अविनाशीनि । ततः परं लिखति - तत्रेश्वरः स्वतन्त्रः स्वरूपशक्तिमान् प्रवेशनियमनाम्यां जगद्विदधत् क्षेत्रज्ञभोगापवर्गौ वितनोति ।*[२] *उक्तेषु चतुर्षु तत्त्वेषु ईश्वरः (ब्रह्म) स्वातन्त्र्येण स्थितः । जीवादयस्तु तस्य शक्तयः सन्ति । किन्तु ते अस्वतन्त्राः अर्थात् ईश्वराधीनाः । अस्य मतस्य समर्थनार्थं विष्णुपुराणाच्छ्रीमद्भागवताच्च प्रमाणानि अपि तेन उद्धृतानि । कर्मफलभोगार्थमेव अनादिबहिर्मुखो जीवः सृष्टब्रह्माण्डे आगच्छति । पुनश्च विभिन्नजीवाः यानि यानि भोग्यवस्तूनि भुञ्जते तानि सर्वाणि कर्मफलानुसारेणैव सृज्यन्ते । अतः जीवस्य भोग्यवस्तूनां सृष्टिव्यापारेऽपि कर्म वा अदृष्टम् अपेक्षणीयम् । एवं दृश्यते यज्जीवस्य कर्म वा अदृष्टमपि सृष्टिकार्यार्थे सहायकरूपेण प्रवर्तते । अत्र ये ये सहायाः उक्ताः तत्त्वतस्ते न परब्रह्मवासुदेवाद्भिन्नाः सन्ति । यतः एते सर्वे तस्यैव शक्तयः शक्तेः कार्याणि च सन्ति तस्माच्च भिन्नं किमपि नास्ति -*

*द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।*
*वासुदेवात् परो ब्रह्मन् न चान्योर्थ्योऽस्ति तत्त्वतः ॥*[३]

***कूटशब्दाः*** *– ईश्वरः, जीवः, प्रकृतिः, कालः, कर्म, माया, त्रिगुणाः ।*

## भूमिका

श्रीबलदेवविद्याभूषणेन ईश्वर-जीव-प्रकृति-काल-कर्माणि इति पञ्चानाम् अनादितत्त्वानां चर्चा कृता ।[४] तेषु परमात्मा ब्रह्म (ईश्वरः) पुरुषः (जीवः) प्रकृतिः (माया) कालश्च एते सर्वे नित्यत्वात् अनादयः सन्ति । श्रीविद्याभूषणः लिखितवान् - तत्र विभूविज्ञानमिश्वरः अणुविज्ञानं जीवः । उभयं नित्यज्ञानगुणकम् । सत्त्वादिगुणत्रयविशिष्टं जडं द्रव्यं माया । गुणत्रयशून्यं भूतवत्तमानादि-व्यवहारकारणं जडं द्रव्यं तु कालः ।

---

***सम्पर्कसूत्रम्** - 8101005500, Email- pramanikr071@gmail.com

१ श्रीमद्भगवत्गीता- 7/13

२ श्रीब्रह्मसूत्रगोविन्दभाष्यम्- 1/1, पृ.- 2

३ श्रीभाष्यम्- 2/5/14

४ ब्रह्मसूत्रगोविन्दभाष्यम्- 1/1, पृ.- 2

कर्म्याप्यनादिविनाशि चास्ति ॥[१] ईश्वरः विभुविज्ञानस्वरूपः जीवस्त्वणुविज्ञानस्वरूपः । उभावपि नित्य-ज्ञानगुणविशिष्टौ स्तः । सत्त्वादिगुणत्रयविशिष्टं जडद्रव्यं माया इति कथ्यते । सत्त्वादिगुणत्रयशून्यं भूत-भविष्यद्वर्तमानादिव्यवहारकारणभूतः जडद्रव्यविशेषः कालः । कर्मापि विद्यते कर्म अनादि खलु किन्तु विनाशि । कर्म अदृष्टरूपम् । सृष्टिः जगतः गौणोपादानकारणं गौणनिमित्तकारणं च माया एव । मा-यायाः द्वे वृत्ती स्तः, गुणमाया जीवमाया च[२] । परमब्रह्मशक्तिरूपेण गुणमाया स्वरूपामाया वा प्रकृतिः गौणोपादानकारणत्वेन सृष्टिकार्यस्य सहायिका भवति । पुनश्च परमब्रह्मशक्तिरूपेण जीवमाया स्वरूपा-माया वा प्रकृतिः गौणनिमित्तकारणत्वेन सृष्टिकार्यस्य सहाकारिणी भवति । सा अनादिबहिर्मुखजीवस्य स्वरूपज्ञानम् आवृत्य देहे आत्मबुद्धिं जनयति तथा प्राकृतभोग्यवस्तुषु जीवम् आसञ्जयति । प्राकृतब्र-ह्माण्डे जीवस्य देहादीनां जीवभोग्यवस्तूनां च सर्वेषां गौणोपादानकारणं गुणमाया एव । प्राकृतब्रह्माण्डे जीवस्य जीवभोग्यवस्तूनां च बाहुल्यं परिलक्ष्यते । पूर्वसञ्चितकर्मफलभोगार्थमेव अनादिबहिर्मुखो जीवः संसारे समागच्छति । जीवशक्त्या सह ब्रह्माण्डसृष्टेः सम्बन्धः सनातनः ।[३] ब्रह्माण्डे जीवस्य सत्ता भो-क्तृत्वं च दृश्यते । अत एव ज्ञायते यत् सृष्टिव्यापारे जीवस्यापि साहाय्यमस्ति । भोगोपयुक्तदेहं विना कर्मफलभोगो न सम्भवति । सृष्टब्रह्माण्डे कर्मफलभोगोपयुक्तं देहं प्राप्य एव जीवः कर्मफलानि भुङ्क्ते । विभिन्नजीवानां कर्माणि (अदृष्टानि वा) विभिन्नप्रकाराणि भवन्ति । अतः विभिन्नजीवाः विभिन्नप्रकाराणि देहानि प्राप्नुवन्ति । केचित् देवदेहं केचित् गन्धर्वदेहं केचित् मनुष्यदेहं केचिद्वा पशुपक्षितरुगुल्मादिदे-हान् लभन्ते । प्रत्येकं भोगायतनभूतः देहः तस्य कर्मफलानुसारम् अथवा अदृष्टानुसारमेव भवति । अतः जीवदेहसृष्टिव्यापारेऽपि कर्म वा अदृष्टम् अपेक्ष्यते ।

सृष्टिव्यापारेऽपरस्यापि कस्यचित् पदार्थस्य साहाय्यम् अपेक्षितं भवति । स च पदार्थः प्रकृतेः (मायाया वा) स्वभावः । दधिसंयोगेन दुग्धं दधिरूपतां प्रतिपद्यते न तु क्षीरत्वं मिष्टान्नत्वं वा । अयमेव दुग्धस्य स्वभावः । पुनराम्लसंयोगेन दुग्धं नवनीतरूपेण परिणमते न तु मिष्टान्नरूपताम् अधिगच्छति । अयमपि तस्यैव स्वभावः । विशेषपरिणामयोग्यता हि वस्तुनः स्वभाव उच्यते । न हि सर्वं वस्तु सर्वस्मिन् वस्तुनि परिणन्तुं प्रभवति । उष्णतासंयोगेन दुग्धमेव क्षीरभावमापद्यते न तु जलम् । जलं ह्युष्णतासंयोगेऽपि कदाचन क्षीरत्वं न अधिगच्छति । एवमेव प्रकृतेरपि स्वभावोऽस्ति यत् सा ब्रह्मणश्चिन्मयशक्तिसंयोगात् क्रमशः सृष्ट्युपयोगिविशिष्टपरिणामानधिगन्तुं समर्था भवति । एतादृशस्वभावाभावे प्रकृतेः सृष्टिकार्यमेव नोपपद्येत - कालाद् गुणव्यतिकरः परिणामः स्वभावः ।[४] सृष्टिलीलानिरूपणप्रसङ्गे ब्रह्मा नारदं प्रति कथितवान्-

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ॥[५]

अर्थात् हे ब्रह्मन् ! उपादानभूतानि महाभूतादिद्रव्याणि जन्मनिमित्तभूतं कर्मगुणक्षोभककालपरिणा-

---

[१] वेदान्तदर्शनम्- 1/1, गोविन्दभाष्यम्, अनुच्छेद- 35
[२] गौडीय-वैष्णव-दर्शनम् (पञ्चमखण्डः), अनुच्छेदः – 101/21
[३] गौडीय-वैष्णव-दर्शनम्(द्वितीयखण्डः), अनुच्छेदः – 3/12
[४] श्रीभाष्यम्- 2/5/22
[५] भागवत्पुराणम् - 2/14

महेतुस्वभावभोक्तृजीवानां मध्ये न किञ्चिदपि वस्तु तत्त्वतो वासुदेवात् पृथगस्ति । अपि चोक्तान्येतान्यनादितत्त्वानि विश्वब्रह्माण्डाधीनानि भवन्ति ।

### अनादितत्त्वस्यावश्यकता

प्राक् सृष्टेः एक एव अद्वितीय ईश्वरः समवर्तत । तस्मिन् काले विभागावधारणायाः सर्वथाभावात्कर्मापि नासीत् । किन्त्वीश्वरः कर्मनिरपेक्ष एव प्रवर्तते न तु कर्मापेक्षामवलम्बते । यदि सृष्टे : अनन्तरकाले शरीरादिविभागापेक्षाभूतं कर्म कर्मापेक्षितः शरीरादिविभागश्च परस्परमाश्रयभावमभ्युपगच्छेतां तर्हि परम्पराश्रयदोषस्य आपत्तिरनिवार्या स्यात् । अतः विभागप्राग्भावे कर्मापेक्षया ईश्वरप्रवृत्तिरभ्युपगन्तव्या भवति । विभागोत्पत्तेः पूर्वं वैचित्र्यविशिष्टकर्मणोऽभावात् आद्यसृष्टौ तुल्यतादोषो दुर्निवारः प्रसज्येत । तस्मादस्य दोषस्य परिहारायसंसारस्य अनादित्वमङ्गीक्रियते । रामानुजभाष्येऽपि इदमेव उक्तम् – 'प्राक्सृष्टेः क्षेत्रज्ञा नाम न सन्ति ; कुतः, अविभागश्रवणात्, 'सदेव सौम्येदमग्रासीदिति ।' अतस्तदानीं तदभावात् तत्कर्म न विद्यते ; कथं तदपेक्षं सृष्टिवैषम्यमित्युच्यत इति चेत् न, अनादित्वात् क्षेत्रज्ञानां तत्कर्मप्रवाहाणां च । तदनादित्वेऽप्यविभाग उपपद्यते च ; यतस्तत् क्षेत्रज्ञवस्तु परित्यक्तनामरूपं ब्रह्मशरीरतयापि पृथग्व्यपदेशानर्हमतिसूक्ष्ममवतिष्ठते । तथाऽनभ्युपगमोऽकृताभ्यागमः कृतविप्रणाशप्रसङ्गश्च, उपलभ्यते च तेषाम् अनादित्वम्[१] । प्रमाणविचारेण अचिन्त्यवस्तुनि प्रत्यक्षादिप्रमाणानामप्रवृत्तिं निरूप्य केवलस्यापौरुषेयशब्दस्य प्रामाण्यं विनिश्चित्य ईश्वरः जीवः प्रकृतिः कालः कर्मेति पञ्चानाम् अनादितत्त्वानां निरूपणं विहितम् । अनन्तरं स्वयंभगवतः श्रीकृष्णस्य अचिन्त्यभेदाभेदात्मकत्वं प्रतिपादितम् । तथाप्येतानि पञ्चानि अनादितत्त्वानि नित्यपदार्थत्वेनैव स्वीकृतानि । अस्मिन् विषये श्रुतौ पुरुषकर्मणी चेति नित्यपदार्थत्वेन प्रतिपादिते स्तः ।[२] पुनश्च बहुषु नित्येषु पदार्थेषु यः बहूनामभिलाषितार्थान् सम्पादयति इत्यादिवचनं प्रतिपादयति ।[३] प्रकृतेर्नित्यत्वविषये श्रुतिराह - अजामेकां लोहित शुक्लकृष्णाम् ।[४] अतएव त्रिगुणात्मिकायाः बहुप्रजासृष्टिविधायिन्याः प्रकृतेर्नित्यत्वं सिद्धं भवति । तस्माद्विविधधर्माश्रितानां पञ्चानामनादितत्त्वानां निरूपणमिदं सम्पद्यते ।

### 1. ईश्वरः

ब्रह्मसूत्रे प्रतिपादितं 'तत्तु समन्वयात्'[५] इति सूत्रम् ईश्वरस्य प्रामाण्यं साधयति । यस्य प्रमाणमपि श्रीरामानुजविरचिते श्रीभाष्ये 'तत् शास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवत्येव । कुतः ? समन्वयात् परमपुरुषार्थतयान्वय : समन्वय :, परमपुरुषार्थभूतस्यैव ब्रह्मणोऽभिधेयतयाऽन्वयात्[६] इति । भाष्यस्य विवरणानुसारमिदं वक्तुं शक्यते यत्तच्छब्दः ब्रह्मविषये शास्त्रस्य प्रामाण्यसम्भावनां निर्दिशति । सर्वाणि शास्त्राणि केवलमीश्वरमेव परमपुरुषार्थत्वेन प्रतिपादयन्ति । विधिसम्मतः अन्वयः अर्थात् यथोचितः सम्बन्धः एव

[१] श्रीभाष्यम्, पृ.- 181
[२] तदेव
[३] कठोपनिषद्, पृ.- 121
[४] श्वेताश्वतेरपनिषद्- 4/5
[५] ब्रह्मसूत्रम्- 1/1/4
[६] ब्रह्मसूत्रम्- 1/1/4, श्रीभाष्यम् ।

समन्वय इति कथ्यते। अर्थात्सर्वाणि शास्त्राणि ईश्वरं परमपुरुषार्थत्वेन स्वीकर्तुं मतैक्यं भजन्ते। अनेन कारणेन ब्रह्मविषये शास्त्रस्य प्रामाण्यं सिद्ध्यति। माया यस्य वश्यतामभ्युपगम्यावतिष्ठते स एव ईश्वरः - स ईशो यद्वशे माया।[1] नित्यः सर्वव्यापिचैतन्यस्वरूप ईश्वरः ज्ञानघनस्वभावोऽपि ज्ञातृत्वरूपेण व्यवह्रियते। स स्वातन्त्र्यसमन्वितः स्वरूपशक्तिसम्पन्नश्च। स प्रकृत्यादिष्वनुप्रविश्य तेषां नियमनपूर्वकं जगतः सृष्टिं सम्पादयति जीवानां च कर्मानुरोधेन संसारभोगमोक्षव्यवस्थां विधत्ते। स एक एव सन्नपि बहुधा भिन्नप्रकारेणावभासते। तथापि गुणगुणिभावेन देहदेहिभावेन च विदुषां प्रत्ययगोचरो भवति। अव्यक्तस्वरूपोऽपि भक्त्यैकगम्यः। एकरसपरमार्थस्वभावोऽपि स्वकीयस्वरूपभूतज्ञानानन्दादीन् प्रददाति। एवमयं षडैश्वर्यसमन्वितः श्रीभगवानिति कथ्यते। शाङ्करवेदान्ते प्रतिपाद्यते यत् - एकमेवाद्वितीयं ज्ञानानन्दघनं ब्रह्म तद्व्यतिरिक्तं किञ्चिदपि वस्तुतो नास्ति। केवलं निर्विशेषं चिन्मात्रात्मकं ब्रह्मैव परमार्थतः सतोऽसतोर्विलक्षणस्वरूपम्। तदेव च वस्तु अनिर्वचनीयविद्यावृत्त्यविद्यावृत्तिरूपाज्ञानसम्बन्धे विद्योपहितचैतन्यतया ईश्वररूपेण प्रतिभाति। अविद्योपहितं चैतन्यं पुनर्जीवसंज्ञां लभते। स्वरूपसाक्षात्कारजनितज्ञानोदयेनाज्ञाननिवृत्तौ जीवस्य ईश्वरभावस्तिरोभवति। ततश्च पुनः स निर्विशेषाद्वितीयचिन्मात्ररूपेणैवाधितिष्ठति।

ईश्वरः चैतन्यस्वरूपोऽपि चैतन्याश्रयः भवति। ईश्वरस्य पुनस्तेजःस्वरूपत्वाच्चैतन्यस्वरूपत्वाच्च प्रकाशाश्रयवत्तस्य स्वरूपस्य निर्णयः कर्तुं न शक्यते। प्रकाशात्मा सूर्यः यथा प्रकाशस्याश्रयो भवति तथा ज्ञानात्मापीश्वरोऽपि ज्ञानस्याश्रयो भवति। अत एव ब्रह्मसूत्रस्य 'प्रकाशाश्रयवद्वा तेजस्त्वा'[2] इत्यस्यावलम्बनेन बलदेवविद्याभूषणः लिखति - ब्रह्मणस्तेजस्त्वाच्चैतन्यस्वरूपत्वात् प्रकाशाश्रयवद्वा तस्य निर्णयः स्यात्। प्रकाशात्मा रविर्यथा प्रकाशाश्रयो भवत्येवं ज्ञानात्मा हरिर्ज्ञानाश्रय इत्यर्थः।[3]

यतो हि ब्रह्म निर्विशेषमद्वितीयं वस्त्विति निगदितम्। विशेषतश्च 'अद्वितीय' इति पदेन सजातीयविजातीयस्वगतभेदराहित्यं स्वीकृतम्। अतस्तादृशस्य ब्रह्मणो जगद्व्यवहारे कथं सम्भावना स्यात्? यदि मायैवास्य जगद्व्यापारस्य कारणतयाभ्युपगम्यते तर्हि जिज्ञासा समुत्पद्यते किं तज्ज्ञानमात्रनिर्विकारस्वरूपं ब्रह्म मायाया विद्यमानतामवगच्छति न वा ? यदि मायास्थितिविषये ईश्वरस्य ज्ञातृत्वमभ्युपगम्यते तर्हि ज्ञानस्वरूपस्य ब्रह्मणो ज्ञानाश्रयत्वरूपधर्मापत्तिरनिवार्या प्रसज्येत।

## 2. जीवः

गौडीयवैष्णवाचार्याणां सिद्धान्ते जीवः स्वरूपतोऽणुः, चित्कणः, नित्यश्च। मोक्षावस्थायामपि तस्य पृथगस्तित्वं न निवर्तते। देहस्तु जीवो न, यतः देहस्य स्वतो चेतना नास्ति, जीवस्य तु चेतनास्वरूपत्वात् चेतना विद्यते। तथापि व्यवहारदृष्ट्या जीवविशिष्टो देहः अपि 'जीवः' इत्युच्यते। यथा - मनुष्यः जीवः, सिंहः जीवः, वृक्षो जीव इत्यादि।

वास्तवचैतन्यस्वरूपस्य जीवस्य व्यवहारिकदेहभेदात् पृथक्करणार्थं तं 'जीवस्वरूपम्' अथवा 'जीवात्मानम्' इति वदन्ति। स एव स्वरूपतः जीवः; मनुष्यादिदेहस्तु केवलमुपचारेण जीव इति

[1]भागवतपुराणम्- 1/7/6, भावार्थदीपिका।
[2]ब्रह्मसूत्रम्- 3/2/29
[3]ब्रह्मसूत्रम्- 3/2/29, गोविन्दभाष्यम्।

व्यवह्रियते। मनुष्यत्वं, पशुत्वं, पक्षित्वं च न जीवात्मनः स्वाभाविकं स्वरूपम्, किन्तु देहसम्बन्धजनितो व्यवहारविशेषः। जीवात्मा यदा मनुष्यदेहसंयुक्तो भवति तदा मनुष्य इति प्रसिद्धो भवति; यदा पशुदेहसंयुक्तो भवति तदा पशुरिति कथ्यते। एवं स एव जीवात्मा कर्मवशात् कदाचित् मनुष्यः, कदाचित् पशुः, कदाचित् वृक्षः, गुल्मः, लता वा इति व्यवहारेण निर्दिश्यते।[१]

अतः सिद्धं यत् शक्तिविशिष्टस्य ब्रह्मणः शक्तिरूपः अंशो जीवः। अत एव उक्तम्— 'ब्रह्म खलु शक्तिमेदकं वस्तु।'[२] यथा मृगमदस्य गन्धः, यथाग्नेर्दाहिका शक्तिः, तथा ब्रह्मणः शक्तिरपि ब्रह्मणः पृथक् न भवति, किन्तु तेन सह अविनाभावसम्बन्धेन वर्तते। अतः ज्ञायते यत् शक्तिविशिष्टस्य ब्रह्मणः अंशो जीवः।[३]

जीवात्मनां संख्यानन्तता। जीवात्मनः स्वरूपतोऽणुत्वादेव तेषां संख्यानन्तता ज्ञायते। अस्मिन् ब्रह्माण्डे वयं अनन्तकोटीन् देहधारिणो जीवान् पश्यामः। तेषां प्रत्येकं हृदये अणुरूपः जीवात्मा वर्तते। अनन्तकोटिषु देहेषु अनन्तकोटयो जीवात्मानः सन्ति। अतः जीवात्मनां संख्या अप्यनन्ता इति सिद्धम्। अस्मिन् विषये शास्त्रीयं प्रमाणमपि विद्यते -

बालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते॥[४]

निरन्तरं यो मायया मोहितो भवति स एव जीवः। अतएव शास्त्रे उक्तम्- माया स जीवो यस्त्वयार्दितः।[५] अतः जीवस्योपरि मायाया आधिपत्यं स्वभावसिद्धमेव विद्यते। अनन्तजीवो भक्त्या ईश्वरमुपास्य तदीयप्रेमलाभेन मायाबन्धनाद्विमुच्यते। जीवः सेवकः परमेश्वरः सेव्यः जीवोऽणुः परमेश्वरो विभुः इत्येवं नित्यं धर्मगतः पार्थक्यविशेषः परिलक्ष्यते। दृष्टान्तरूपेण वक्तुं शक्यते यद्रोगिणः चिकित्सातः प्राक् रोगनिर्णयोऽपरिहार्यः अन्यथाचिकित्सा न सम्भवति। तथैव रोगिरूपस्य जीवस्य व्याधिरूपायाश्च मायायाः दर्शनमपेक्षितम्। अत एव जीवेऽपि जीवसम्मोहकारिणी माया च दृश्येते –

यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्।
परोऽपि मनुतेऽनार्थं तत्कृतं चाभिपद्यते॥[६]

जीवः स्वभावतः चित्स्वरूपः पदार्थः त्रिगुणात्मकात् जडपदार्थात् सर्वथा भिन्नोऽपि मायामोहवशात् स्वात्मानं त्रिगुणात्मकजडदेहादिसंघातरूपं जडस्वरूपमेव मन्यते। पुनः पुनश्च तन्मननजनितान् संसारवासनारूपाननर्थान् प्राप्नोति- अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।[७] एतोपि- कस्यचित् स्वसम्बन्धितया अभिमतस्य पुत्रादेः पापं दुःखं न आदत्ते, न अपनुदति, कस्यचित् प्रतिकुलतया अभिमतस्य सुकृतं सुखं च न आदत्ते न अपनुदति। यतः अयं विभुः, न क्वाचित् कः, न देवादिदेहाद्यसाधारणदेशः, अत एव न कस्यचित् सम्बन्धी, न कस्यचित् प्रतिकूलः च। सर्वमिदं वासना

---

[१] गौडीय-वैष्णव-दर्शनम् (द्वितीयखण्डः), पृ.- 1156 अनुच्छेद: 2/2
[२] तत्त्वसंग्रहः, गोविन्दभाष्यम्, पृ. 77
[३] श्रीचैतन्यचरितामृतम्- 1/4/84
[४] श्वेताश्वतरोपनिषद्- 5/9
[५] भागवत्पुराणम् - 1/7/6, भावार्थदीपिका।
[६] श्रीमद्भागवत्पुराणम्, 1/7/5
[७] श्रीगीताभाष्यम्, पृ.- 233


ISSN : 2320-740X

कृतम् ।

एवं स्वभावस्य कथम् इयं विपरीतवासना उत्पद्यते ? अज्ञानेन आवृतं ज्ञानम्, ज्ञानविरोधिना पूर्वपूर्वकर्मणा स्वफलानुभवयोग्यत्वाय अस्य ज्ञानम् आवृतं संकुचितम्, तेन ज्ञानावरणरूपेण कर्मणा देवादिदेहसंयोग : तत् तदात्माभिमानरूपमोह : च जायते । ततः च तथा विधात्माभिमानवासना तदुचितकर्मवासना च । वासनातो विपरीतात्माभिमानः, कर्मारम्भश्च उपपद्यते ।[१] जीवस्यास्यानादिसंसारवासनाया एकमेव कारणं माया । सत्त्वात् सञ्जायते ज्ञानम्[२], एवं परम्परया जाताद् अधिकसत्त्वात् आत्मायाथात्म्यापरोक्षरूपं ज्ञानं जायते[३] इति श्रुतिवाक्यानुसारेण सत्त्वे चैतन्यस्य यत्प्रतिबिम्बं प्रतिभाति तदेव सत्त्वोपहितजीवस्य ज्ञानम् ; अनेनैव ज्ञानेन जीवस्य मोहः मननं च प्रतीयते । धर्मभूतं नित्यं ज्ञानादिकं जीवे स्वतो विद्यमानमेव, तदेव प्रकाशते प्रकाशयति च । यथा तेजः प्रकाशस्वरूपमपि स्वात्मानमन्यांश्च पदार्थान् प्रकाशयति तथा तस्य प्रकाशशक्तिसम्पन्नता प्रत्यक्षसिद्धा । तथैव जीवो ज्ञानस्वरूपोऽपि स्वरूपभूतज्ञानधर्मसमन्वितः ।[४] रामानुजानुसारेण- अतो यथा तेजस्तेन प्रभातदाश्रायर्योभिन्नयोरपि तादात्म्यम् । पुनः च रामानुजाचार्य : श्रीभाष्ये उक्तं यत्- वाशब्दः पक्षव्यावृत्त्यर्थः, ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थाने भेदश्रुतयो ब्रह्मणोऽपरिणामित्ववादिन्योऽपि बाधिता भवेयुः, अतो यथा तेजस्तेन प्रभातदाश्रययोरपि तादात्म्यम्, एवमचित्प्रपञ्चस्य ब्रह्मणो रूपमित्यर्थः ।[५] ब्रह्म चैतन्यस्वरूपमपि चैतन्याश्रयरूपम् । अत एव बलदेवविद्याभूषणेनोक्तम्- ब्रह्मनतेजस्त्वाच्चैतन्यस्वरूपत्वात् प्रकाशाश्रयवद्वा तस्य निर्णयः स्यात् । प्रकाशात्मारविर्यथा प्रकाशश्रयो भवत्येवम् इत्यादय : ।[६] यथा प्रकाशात्मा रविः प्रकाशस्याश्रय इत्यभिधीयते, तथैवोपाधिजन्यं जीवत्वम्, उपाधिनाशश्च मोक्ष इति परिशोधितम् । अत्र मायया मोहित इत्यस्योक्तत्वात् जीवस्योपरि मायाया आधिपत्यं परमेश्वरस्य च औदासीन्यं सुस्पष्टतया प्रतीयते । यस्मात् परमात्मनोऽन्यो जीवोऽतः एव सूर्यकादिवदिति तस्योपमा क्रियते । न ह्यभेदे बिम्बप्रतिबिम्बभावः । तथा सति वह्निच्छायया दाहः खङ्गाभासेन छेदश्च स्यात् । न च तस्मिन् सादृश्यं तस्य भेदतन्त्रत्वात् । चकारोऽन्यान् भेदहेतून् समुच्चिनोति । तस्माज्जीवविलक्षणः परमात्मेति ।[७]

एतच्च अवतरणिकाभाष्ये - नन्वस्तु तयोपमया जीवपरयोर्भेदः । किन्तु चिदाभासत्वं जीवस्य ततः प्राप्तम् । यथाम्बुनि सूर्यस्याभासः सूर्यक उच्यते, तथाविद्यायां परस्याभासो जीव इति ।[८]

## 3. प्रकृतिः

प्रकृतेर्मानुषस्वभावस्य च निर्माणे त्रीणि मौलिकगुणतत्त्वानि विद्यन्ते सत्त्वं रजस्तमश्च । एतेषां त्रयाणां गुणानां समष्टिरूपता त्रिगुण इति व्यपदिश्यते । प्रकृतिस्तु एतेषां त्रयाणां गुणानां साम्यावस्थारूपेणाव-

[१] गीता- 5/16, रामानुजभाष्यम्, पृ.- 181-182
[२] गीता- 14/17
[३] गीता-14/17 रामानुजभाष्यम् पृ.- 472
[४] ब्रह्मसूत्रम्- 3/2/29, गोविन्दभाष्यम् ।
[५] ब्रह्मसूत्रम्- 3/2/27, रामानुजभाष्यम् ।
[६] गोविन्दभाष्यम्, पृ.- 156
[७] वेदान्तदर्शनम्- 3/2/28, गोविन्दभाष्यम्, पृ.- 155
[८] वेदान्तदर्शनम्, पृ.- 159

स्थितेति कथ्यते सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः ।[१] वेदोऽपि त्रैगुण्यविषयकत्वेन निगद्यते, किन्तु ब्राह्म्याः स्थितेः समधिगमाय- त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।[२] सत्त्वरजस्तमांसि एतानि त्रि-गुणतत्त्वानि देहिनं पुरुषं निबध्नन्ति ; अत एव श्रीकृष्णेनोक्तम्—

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥[३]

सत्त्वगुणो निर्मलस्वभावत्वात्प्रकाशकः, विकारवर्जितश्च भवति । स सुखेन ज्ञानेन च सम्बध्यते—

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥[४]

कामनासङ्गसमुत्थितो रागरूपो रजोगुणः प्रादुर्भवति । अयं गुणः जीवात्मानं कर्मणा तद्भोग्यकर्म-फलैश्च संनह्य बध्नाति—

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥[५]

तमोगुणस्तु देहाभिमानिनं मोहयति, अज्ञानसमुद्भूतश्च भवति । अयं जीवात्मानं प्रमादालस्यनिद्रा-भिः निबध्नाति—

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥[६]

गुणानां यथार्थस्वरूपं किमिति न वयं निर्णेतुं प्रभवामः । सृष्टिप्रपञ्चे तेषां कार्यमात्रमेवावलोकयामः, ततोऽधिकं किमपि ज्ञातुं न शक्नुमः । सत्त्वं रजस्तमश्चेति त्रयो गुणा नित्याः मौलिकाश्च । न तेषामुत्पत्तिः सम्भवति, न च विनाशः । एते त्रिगुणा अनाद्यनन्तस्वभावाः, नित्याश्च मौलिकाश्च । न तेषामाविर्भावः, न तेषां तिरोभावः । सत्त्वरजस्तमसां परमार्थरूपमस्माभिर्न प्रत्यक्षीकर्तुं शक्यते, तथापि तेषामस्तित्वमनुमानप्रमाणेनावगन्तुं शक्यते । जगतो मूलोपादानकारणत्वेन एते गुणाः व्यवस्थिताः सन्ति । जीवाः प्रकृतेस्त्रिगुणैर्वशीभूताः कर्मणि प्रवर्तन्ते-

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ।[७]

न किञ्चित्करोमि' इति व्यवसितः अपि सर्वः पुरुषः प्रकृतिममुद्भवैः सत्त्वरजस्तमोभिः प्राक्तनकर्मानुगुणं प्रवृद्धैः गुणैः स्वोचितं कर्म प्रति अवशः कार्यते प्रवर्त्यते । अत उक्तलक्षणेन कर्म-योगेन प्राचीनं पापसञ्चयं नाश यित्वा गुणांश्च सत्त्वादीन् वशे कृत्वा निर्मलान्तःकरणेन सम्पाद्यो ज्ञानयोगः ।[८]

---

[१] सांख्यदर्शनम्- 1/61, पृ.- 65
[२] गीता- 2/45
[३] गीता- 14/5
[४] गीता- 14/6
[५] गीता- 14/7
[६] गीता- 14/8
[७] गीता- 3/5
[८] गीता- 3/5, रामानुजभाष्यम्, पृ.- 96


ISSN : 2320-740X

एते त्रयो गुणाः लौकिकधर्मत्वेन प्रकृतेर्गुणत्वेन च प्रसिद्धाः। किन्तु जगत्सृष्टेः प्रागेव प्रकृतेरेते मौलिकास्त्रयो गुणाः अवस्थिताः आसन्। अद्वितीयस्वरूपे परमेश्वरेऽविभागावस्थायां कर्मणोऽभावात् स सत्त्वरजस्तमोगुणात्मकतया न व्यवह्रियते। ईश्वरो वा ब्रह्म सर्वदा सगुणरूपेणैव प्रतीयते। अत एव यथा प्रकृतिर्नित्या अनादिश्च, तथैव तस्याः सत्त्वरजस्तमोगुणाः अपि नित्याः अनादिस्वरूपाश्च भवन्ति।

## 4. कालः

अतीतवर्तमानभविष्यत्कालानां यौगपद्यचिरत्वक्षिप्रत्वादिशब्दव्यवहारहेतुभूतः क्षणादारभ्य परार्धपर्यन्तं चक्रवदावर्तमानेषु प्रलयस्वर्गादिव्यापारेषु निमित्ततां वहन् नित्यः जडद्रव्यविशेषश्च कालः - अथाह वाव नित्यानि पुरुषः प्रकृतिरात्मा कालः।[१] वस्तूनामुत्पादनव्यापारे कालस्यानुग्रहः साहाय्यं चावश्यकमपेक्ष्यते। यथादधिमन्थनसंयोगेन दुग्धस्य दधिरूपपरिणामः समुपजायते तथापि दुग्धस्य दधिमन्थनेन सह संयोगमात्रेण न तत्क्षणमेव दध्नः समुत्पत्तिर्भवति किन्तु किञ्चित्कालपर्यवस्थानमपेक्षते। अतः समयो वा कालोऽपि दधिरूपपरिणामसाधने दुग्धस्य साहाय्यं सम्पादयति। तथैव परब्रह्मशक्त्याधिष्ठिता माया वा प्रकृतिः सृष्ट्युपयोगिविविधवैचित्र्यपरिणामप्राप्तौ कालानुकूल्यं विना न प्रवर्तते। अतः कालोऽपि सृष्टिकार्यादीनां सहायकरूपेणावस्थितः - कालागुणाव्यतिकरः।[२]

वेदान्ते परमसत्यं ब्रह्म त्रिकालाबाधितमिति निरूपितम्। तस्यायमभिप्रायः - ब्रह्म अतीत-वर्तमान-भविष्यदाख्यत्रिकालपरिच्छेदातीतम्, अपरिणामि च। कालस्तु मुख्यतया मायामयभ्रमविशेषत्वेन व्यवह्रियते। स चैतन्यस्य परिसीमनकार्यं निर्वहति। तथापि व्यावहारिकदृष्ट्या कालः सत्यमिव प्रतिभाति, किन्त्वात्मतत्त्वसाक्षात्कारानन्तरं तस्य यथार्थस्वरूपं स्फुटतरमवगम्यते। पुनश्च यदि उच्येत - 'स न जानाति स्म' इति तर्ह्यज्ञात्वे सति 'स न जानाति स्म' इत्यस्य वाक्यस्य कथमङ्गीकारसम्भावना स्यात्? तद्वाक्यं व्यावहारिकस्तरे त्रिकालव्याप्ततया सर्वदैव सत्यमिति प्रतीयते। यतः ज्ञाता यदि कस्यचिद्विषयस्य अतीतकाले ज्ञाता नाभूत्, तर्हि वर्तमाने भविष्यति च तस्य तद्विषयकज्ञानस्याभाव एव स्यात्। विषयोऽयमनेन प्रकारेणावगन्तव्यः मायावादे ब्रह्मव्यतिरिक्तपदार्थनिराकरणात् निर्विशेषब्रह्ममात्रस्वीकारे च यदा जगन्मिथ्येति साध्यते तदा शिष्यः आचार्यः आचार्योपदिष्टं ज्ञानं च मिथ्यात्वमेवापद्यते। यदि शिष्यानुशासननिमित्तमेतन्मिथ्यात्वकल्पनमङ्गीक्रियते तर्हि जगन्मिथ्यात्वस्वीकारजन्यो दोषो न परिहर्तुं शक्यते। यतः कल्पिताचार्येणोपदिष्टात् कल्पितज्ञानात् कल्पितशिष्यस्य कस्यचिदर्थस्य सिद्धिसम्भावना नोपलभ्यते। निर्विशेषचिन्मात्रब्रह्मव्यतिरिक्तस्य समस्तपदार्थजातस्य मिथ्यात्वेऽभ्युपगते मोक्षप्राप्तये श्रवण-मनन-निदिध्यासनादिषु यः प्रयत्नः सोऽपि निष्फलतामेवाधिगच्छति। यथा शुक्तौ रजतभ्रमसमुत्पत्तौ शुक्त्युपादानभूते रजते रजतज्ञानजनितो रजतप्राप्तिप्रयत्नः कदाचन रजतस्वरूपलाभं न सम्पादयति अपि तु अविद्याकल्पितकार्यत्वान्मिथ्यात्वमेवाधिगच्छति; तथैव अविद्याकल्पिताचार्योपदिष्टतत्त्वमस्यादिवाक्यजनितं ज्ञानं संसारबन्धनिवर्तकं भवितुं न क्षमते यतोऽविद्याकल्पितवाक्यमेव तस्य हेतुतया विनियुक्तम्। भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायामुवाद - 'कालोऽस्मि।[३] उक्तपदस्य व्याख्यायां गी-

[१]ब्रह्मसूत्रभाष्यम्, पृ.- 261
[२]श्रीभाष्यम्- 2/5/22
[३]गीता- 11/32

तायाः श्रीभाष्ये श्रीरामानुजाचार्यः उवाच – ‘कलयति गणयति इति कालः, सर्वेषां धार्तराष्ट्रप्रमुखानां राजलोकानाम् आयुरवसानं गणयन् अहं तत्क्षयकृत् घोररूपेण प्रवृद्धो राज-लोकान् समाहर्तुम् आभि-मुख्येन संहर्तुम् इह प्रवृत्तः अस्मि । अतो मत्संकल्पाद् एव त्वाम् ऋते अपि त्वदुद्योगम् ऋतेऽपि एते धार्तराष्ट्रप्रमुखाः तव प्रत्यनीकेषु ये अवस्थिता योधाः, ते सर्वे न भविष्यन्ति विनङ्क्ष्यन्ति ।[१]

तथा च मैत्रेयीपराशरसंवादे श्रीपराशरः भगवन्तं विष्णुं कालस्वरूपत्वेन प्रोवाच- हे अनघ! मया यद्भगवतः विष्णोः कालस्वरूपम् उक्तम्, तेनैव ब्रह्मणः, पृथिव्याः, पर्वतानां, समुद्रादीनां चराचरजीवानां च आयुषः परिणामः सम्भवति-

कालस्वरूपं विष्णोश्च यन्मयोक्तं तवानघ ।
तेन तस्य निबोध त्वं परिमाणोपपादनम् ॥
अन्वेषां चैव जन्तुनां चराणामचराश्च ये ।
भूभूभृत्सागरादीनामशेषाणां च सत्तम् ॥[२]

## 5. कर्म

अदृष्टादिशब्दैर्व्यपदिश्यमानम् अनादि विनश्वरं जडात्मकमेव कर्म भवति । कर्मणः स्वरूपं चलनात्मक-मेव ।[३] कर्मणोऽनादित्वविषये श्रीबलदेवविद्याभूषणेनोक्तम् न कर्मविभागात् इति चेन्नानादित्वात् ।[४] अ-नादिकर्मपरम्पराया अभ्युपगमोऽवश्यमङ्गीकरणीयः । यतो न युक्तमिदं वक्तुं यदीश्वरः कर्मनिरपेक्षतया फलवितरणं करोति । सृष्टेः प्राक् ईश्वरव्यतिरिक्तस्य कस्याप्यद्वितीयस्य कर्मणोऽभावात् । यदि पुनः पू-र्वकर्मणां विद्यमानता स्वीक्रियते, तर्हि सा भगवदधीनतामवलम्ब्यैव स्वीकर्तव्या । एवं च पूर्वपूर्वकर्मप-रम्परायाः स्वीकृतौ यत्र तस्याः पर्यवसानं कल्प्यते, तत्रैवारम्भदोषस्यापत्तिरनिवार्या भवति- कर्मापेक्षया फलदातृत्वमाक्षिप्य समादधत् सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे न कर्मेति । कर्मापेक्षया फलं ददातीश्वर इति न युक्तं यदपेक्षया फलं दद्यात्तस्यापेक्षस्य कर्मण एवाभावात् । अस्ति च पूर्वकर्मेति चेत् सत्यं ‘त-स्याप्येष ह्येवेति’ श्रुतौ भगवदधीनत्वश्रवणात् । स्वकृतापेक्षया फलदानेन वैषम्यादेर्निस्तारात् । अतो न कर्मापेक्षासम्भवतीति भावः । उन्निनीषते ऊर्ध्वं नेतुमिच्छति परिहारांशं व्याचष्टे नेति । नापेक्ष्य कर्माभावो वक्तव्यः पूर्वकर्मणः सत्त्वात् । न च वक्तव्यं तस्यापि भगवन्निमित्तत्वेनानपेक्षतेति । भवेदेतद् यदि पूर्वतनं कर्मेश्वरेण निरपेक्षेण क्रियेत नैतदस्ति पूर्वतर कर्मापेक्षया तस्य कारितत्वात् । तादृशस्य चापेक्ष्यतोपप-त्तेः । न च पूर्वतरस्यापीश्वरनिमित्तत्वादनपेक्षता तस्यापि पूर्वतमकर्मापेक्षया कारितत्वात् । न च मन्तव्यं यत्रैव पर्यवसानं तदारभ्य दोष इति । अनादित्वात् कर्मपरम्पराया इति भावः ।[५]

अपि च आनन्दतीर्थः मध्वभाष्ये आह यत्— यदपेक्षयासौ फलं ददाति न तत् कर्म “एष ह्येव साधु कर्म कारयति तथा यमेभ्यो लोकेभ्य उन्निनीषते ।” एष उ वा साधु कर्म कारयति तं यमधो निनीषते”

[१]गीता- 11/32, रामानुजभाष्यम् ।
[२]विष्णुपुराणम् – 1/3/6-7
[३]तर्कसंग्रहः, दीपिकाटीका, पृ.- 225
[४]ब्रह्मसूत्रम्- 2/1/35
[५]ब्रह्मसूत्रभाश्यम्, तत्त्वप्रकाशिका, पृ- 211


ISSN : 2320-740X

इति श्रुतेः । कर्मणोऽपि तन्निमित्तत्वादिति चेत् न तस्यापि पूर्वकर्मकारणमित्यनादित्वात् कर्मणः ।[१]

सृष्टिसमयेऽविभागावस्थाया अवधानात् कर्म नासीत्, अतः कर्मणोऽविभागवशात् कर्मवैषम्यदोषस्य परिहारो न सम्भवतीति न वक्तुं शक्यते । अतएव सदेव इति श्रुत्या यद्यपि सृष्टेः पूर्वं ब्रह्मणः पृथग्भूतकर्मप्रतीतिर्नोपलभ्यते, तथापि कर्मणां जीवानां चानादित्वाभ्युपगमे पूर्वपूर्वकर्मानुरोधेनोत्तरउत्तरकर्मप्रवृत्तौ कस्यापि दोषस्य सम्भावना नोपजायते- ननु कर्मणो वैषम्यादि परिहारो न स्यात् । कुतः कर्माविभागात् । सदेव सौम्येदमित्यादिषु प्राक्सृष्टेर्ब्रह्मविभक्तस्य कर्मणोऽप्रतीतेरिति चेन्न । कुतः कर्मणः क्षेत्रज्ञानाञ्च ब्रह्मवदनादित्वस्वीकारात् । पूर्वपूर्वकर्मानुसारेणोत्तरोत्तरकर्मणि प्रवर्तनात् न किञ्चिद् दूषणम् ।[२] अयं तर्कः अनवस्थादोषपरिहारिणा बीजाङ्कुरन्यायेन सम्यक् प्रतिष्ठापितः - स्मृतिश्च पुण्यपापादिकं विष्णुः कारयेत् पूर्वकर्मणा । अनादित्वात् कर्मणश्च न विरोधः कथञ्चनेति, कर्मणोऽनादित्वेनानवस्था तु न दोषः प्रामाणिकत्वात् ।[३] कर्मादीनाम् ईश्वराधीनत्वनिबन्धनकर्मसापेक्षता ईश्वरस्य स्वातन्त्र्यस्य काञ्चिदपि हानिं न जनयतीति विषये स्मृतौ निगदितम् — न च कर्मसापेक्षत्वेनेश्वरस्यास्वातन्त्र्यम् । द्रव्यं कर्म च कालश्चेत्यादिना कर्मादिसत्तायांस्तदधीनत्वस्मरणात् ।[४] अनादिर्जीवः स्वभावानुरोधेन कर्माणि समाचरति ईश्वरस्तु तमेव तत्तत्कर्मसु प्रवर्तयति । अचिन्त्यशक्तिसम्पन्नोऽपि श्रीभगवान् स्वभावस्य अन्यथाकरणे समर्थः सन् कस्यापि स्वभावमन्यथाकर्तुं न प्रवर्तते । अत एव वैषम्यदोषस्य सम्यक् परिहारः सम्पद्यते— न च घट्टकुड्यां प्रभातमिति वाच्यां अनादिजीवस्वभावानुसारेण हि कर्म कारयति स्वभावमन्यथा कर्त्तुं समर्थोऽपि कस्यापि न करोतीत्यविषयो भण्यते ।[५]

## उपसंहारः

गौडीयवैष्णवधर्मस्य मूलाधारभूतं दार्शनिकतत्त्वं वेदान्तदर्शनस्य प्रमुखशाखासु चान्यतम अचिन्त्यभेदाभेदवादः । श्रीचैतन्यमहाप्रभुणा प्रवर्तितेऽस्मिन् सिद्धान्ते प्रतिपाद्यते यत् जीवः (सत्ता) जगच्च परमेश्वरेण सह युगपद्भिन्नाभिन्नरूपेण भवतः । तथा च तयोः सम्बन्धः मानसभावनाविषयातिक्रान्तत्वाद् अचिन्त्य इत्यभिधीयते । अचिन्त्यभेदाभेदवादानुसारेण एतेषु पञ्चसु अनादितत्त्वेषु ईश्वरः स्वातन्त्र्यसमन्वितं तत्त्वं जीवः प्रकृतिः कालः कर्म चेति तस्य शक्तिरूपेण शक्तिविकाररूपेण वा व्यवस्थितानि । अत एव एतानि तस्माद् भिन्नान्यपि, तेन सहाविनाभावसम्बन्धनिबद्धान्यपि भवन्ति । तथाप्येषु पञ्चस्वनादितत्त्वेषु ईश्वरः (ब्रह्म), जीवः, प्रकृतिः (माया), कालः, कर्म चेति तत्त्वानि विभिन्नैर्दार्शनिकभाष्यकारैः स्थले स्थले वैकल्पिकशब्दप्रयोगेन निरूपितानि । यथा वैदिकं दर्शनं भवतु अवैदिकं वा सर्वेषां दर्शनशास्त्राणां चरमपुरुषार्थो मोक्ष एव । स च विभिन्नेषु दर्शनेषु वैकल्पिकाभिधानैः प्रतिपादितोऽपि वस्तुतः ईश्वरप्राप्तिद्वारा निर्वाणलाभ एव परमलक्ष्यत्वेनावस्थितः । तथैव अस्य वैष्णवदर्शनस्य भाष्यकाराः कुत्रचिद् ईश्वरशब्देन, कुत्रचिद् ब्रह्मशब्देन तदेव तत्त्वं व्याख्यान्ति । पुनः कुत्रचित्प्रकृतिः कुत्रचिद् माया इत्येवं नामभेदेन व्यवहृतवन्तः । एतदेव सृष्टिस्थितिप्रलयानां परमतत्त्वरूपं सत्यमिति प्रसिद्धम् । सृष्टेः प्रागेकमेवाद्वितीयम्

[१] ब्रह्मसूत्रभाश्यम्, माध्वभाष्यम्,पृ.- 314

[२] ब्रह्मसूत्रम्, गोविन्दभाष्यम्, पृ.- 78

[३] तदेव

[४] तदेव

[५] ब्रह्मसूत्रम्, गोविन्दभाष्यम्, पृ.- 78

ईश्वरतत्त्वमेव विरराज । यदि जीवकर्मसंसाराणामनादित्वं नाङ्गीक्रियेत, तर्हि सृष्ट्यादौ जीवानां मध्ये यदिदं वैचित्र्यमवलोक्यते कश्चित् सुखभाक्, कश्चिद्दुःखभाग्, कश्चिद्देवः, कश्चिद् मनुष्यः, कश्चित् पशुरिति तस्य युक्तिसङ्गता व्याख्या नोपपद्येत । यतः तदा कर्मणः पूर्वं देहः, देहस्य पूर्वं कर्मेति परस्पराश्रयदोषस्य प्रसङ्गः समुत्पद्येत । पुनरपि यदि पूर्वकर्म नाभ्युपगम्येत तर्ह्यादिसृष्टौ सर्वेषां जीवानामवस्था समरूपैव भवेत्; तेन तुल्यतादोषो दुरपनीयतामधिगच्छेत् । अस्य दोषस्य निराकरणाय वैदिकदर्शने जीवकर्मसंसाराणामनादित्वमभ्युपगतम् । ईश्वरः सृष्टेः स्वतन्त्रः प्रवर्तकोऽपि सन् जीवानामनादिकर्मानुरोधेनैव जगतो वैचित्र्यमाविर्भावयति ।

अत एव संसारस्य अनादित्वेऽभ्युपगते एकस्मिन् पक्षे ईश्वरस्य सर्वशक्तिमत्त्वं स्वातन्त्र्यं च निरवद्यतया संरक्ष्यते अपरस्मिन्तु पक्षे जीवानां विविधावस्था कर्मफलभोगश्च न्यायोपपन्नतया प्रतिष्ठामधिगच्छतः । एतस्मादेव हेतोः शास्त्रसम्मतः सिद्धान्तोऽयं यत् सृष्टिप्रलयचक्रम्, जीवः, कर्म चेति सर्वमेतदनादि; एतेषां परमः नियन्ता परमाश्रयश्च केवलं परमेश्वर एव ।

## सन्दर्भग्रन्थसूची


१. अडिगः, शङ्करनारायणः, तथा कट्टिः, रुद्रनाथः (सम्पा.), छान्दोग्योपनिषद् (श्रीराघवेन्द्रविरचितखण्डार्थसहिता), बेङ्गलूरुः : पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, संवत् - 2004 ।

२. कठोपनिषद्, शाङ्करभाष्य-हिन्द्यानुवाद-सहिता, गोरक्षपुरम्, गीताप्रेसः - 005 ।

३. गोस्वामी, श्रीसत्यानन्दः (सम्पा.), तत्त्वसन्दर्भः, प्रथमभागः, श्रीजीवगोस्वामिविरचितः, विश्वकोषप्रेसः, कलिकाता : - 003 ।

४. गोस्वामी, श्रीमद्भक्तिश्रीरूपसिद्धान्तीसरस्वती (सम्पा.), वेदान्तसूत्रम् (श्रीमद्बलदेवविद्याभूषणकृतगोविन्दभाष्य-सूक्ष्मटीकासहितम्), द्वितीयसंस्करणम्, कलिकाता : श्रीसारस्वतगौडीयासनमिशनम्, संवत्- 1993 ।

५. गोयेन्दका, कृष्णदासः (सम्पा.), श्रीमद्भगवद्गीता (श्रीरामानुजभाष्य-हिन्द्यानुवाद-सहिता), गोरक्षपुरम्:, गीताप्रेसः - 005 ।

६. नाथः, श्रीराधागोविन्दः, गौडीयवैष्णवदर्शनम् (अचिन्त्यभेदाभेदवादः), द्वितीयः खण्डः, कलिकाता : महेश-लाइब्रेरी, शकाब्दः 1879 ।

७. भट्टाचार्यः, रामशङ्करः (सम्पा.), सांख्यसूत्रम् (विज्ञानभिक्षुभाष्यान्वितं सटीकतत्त्वसमाससूत्र-सांख्यसारसमेतम्), वाराणसी : भारतीयविद्याप्रकाशनम्, संवत् 2022 ।

८. मिश्रः, आद्याप्रसादः, तर्कसङ्ग्रहः (अन्नम्भट्टकृतदीपिकासहितः), इलाहाबाद : अक्षयवटप्रकाशनम् ।

९. माध्वाचार्यः, ब्रह्मसूत्रभाष्यम् (श्रीमद्जयतीर्थकृततत्त्वप्रकाशिकया तथा श्रीरघुनाथतीर्थकृतशेषतात्पर्यचन्द्रिकया समलङ्कृतम्), प्रथमसम्पुटम् ।

१०. रामभद्राचार्यः, एन्. एस्. (सम्पा.), श्रीभाष्यम् (भगवद्रामानुजविरचितं शारीरमीमांसाभाष्यम्), प्रथममुद्रणम्, मेलुकोटे : संस्कृतसंशोधनसंसत्, 1985 ।

११. रामानुजाचार्यः, श्रीभाष्यम् (प्रथमखण्डः), प्रयाग : श्रीनिम्बार्कपीठम् - 005 ।



ISSN : 2320-740X

१२. श्रीमद्भागवतमहापुराणम् (प्रथमखण्डः, स्कन्ध 1–8), महर्षिवेदव्यासप्रणीतम्, गोरक्षपुरम्: गीताप्रेस - 005, संवत् 2071 ।

१३. श्रीविष्णुपुराणम् (मूलश्लोकः तथा हिन्दी-अनुवादसहितम्), गोरक्षपुरम्: गीताप्रेस – 005 ।

१४. शास्त्री, रामतेजः (सम्पा.), श्रीमद्भागवतपुराणम् (श्रीधरटीका-भावार्थसहितम्), काशी : राजाराममोहनः पाण्डेयः, पण्डितपुस्तकालयः - 001 ।

१५. श्रीमद्भागवतपुराणम् (सचित्रसरलहिन्दीव्याख्यासहितम्, प्रथमखण्डः), गोरक्षपुरम्: गीताप्रेस – 05 ।

१६. श्रीमद्ब्रह्मसूत्रानुभाष्यम् (प्रथमभागः), श्रीमद्वल्लभाचार्यप्रणीतम्, श्रीनाथद्वारा : टेम्पलबोर्ड, संवत् 1992–93 ।

१७. श्वेताश्वतरोपनिषद्, वाराणसी : श्रीदक्षिणामूर्तिमठप्रकाशनम् - 001 ।

१८. Hume, Robert Ernest. *The Thirteen Principal Upanishads : Translated from the Sanskrit*. London : Humphrey Milford, Oxford University Press, 1921.

१९. Wikipedia Contributors. "Wikipedia." Accessed 15 June 2026, 11 :44 AM. Bengali Wikipedia.



# तेजोबिन्दूपनिषदि प्रतिपादितपञ्चदशाङ्गयोगेन परब्रह्मावगतिः

विभाकरकुमारदीक्षितः*
सहायकप्राध्यापकः,
एमिटी वि.वि., नोयडा,

***लेखसारः*** *– विभाकरकुमारदीक्षितिःभारतीयदर्शनपरम्परायाम् उपनिषदः ब्रह्मविद्यायाः, आत्मविद्यायाः तथा मोक्षमार्गस्य परमप्रामाणिकग्रन्थाः मन्यन्ते । तेषु मानवीयजीवनस्य परमलक्ष्यं ब्रह्मसाक्षात्कारः इति प्रतिपादितम् अस्ति । योगोपनिषदां मध्ये तेजोबिन्दूपनिषद् महत्त्वयुक्ता अस्ति, यतः अस्याम् उपनिषदि योगस्य वेदान्तीयस्वरूपं विशदतया निरूपितम् अस्ति । अत्र प्रतिपादितः पञ्चदशाङ्गयोगः पतञ्जलिप्रणीताष्टाङ्गयोगस्य विस्तारितं तथा अद्वैतवेदान्तानुकूलं स्वरूपं प्रदर्शयति । अस्य योगस्य पञ्चदशाङ्गानि—यमः, नियमः, त्यागः, मौनम्, देशः, कालः, आसनम्, मूलबन्धः, देहसाम्यम्, दृष्टिस्थितिः, प्राणसंयमनम्, प्रत्याहारः, धारणा, ध्यानम् तथा समाधिः—साधकस्य नैतिकविकासाय, अन्तःकरणशुद्धये, चित्तैकाग्रतायै तथा आत्मसाक्षात्काराय क्रमशः साधनरूपेण निर्दिष्टानि सन्ति । एतेषां समन्विताभ्यासेन साधकः विषयासक्तिं परित्यज्य अन्तर्मुखतां प्राप्नोति, मनः संयच्छति तथा ब्रह्मज्ञानस्य योग्यतां सम्पादयति । समाध्यवस्थायां जीवब्रह्मणोः अभेदानुभवः अस्य योगस्य परमफलम् इति प्रतिपाद्यते ।*

*प्रस्तुतशोधपत्रे तेजोबिन्दूपनिषदि प्रतिपादितस्य पञ्चदशाङ्गयोगस्य दार्शनिकाधारः, तस्य साधना-मूलकस्वरूपम्, अद्वैतवेदान्तेन सह सम्बन्धः तथा परब्रह्मसाक्षात्कारे तस्य योगदानं समीचीनतया वि-श्लेषितम् अस्ति । एतदध्ययनं स्पष्टयति यत् पञ्चदशाङ्गयोगः केवलं योगाभ्यासस्य पद्धतिः न, अपितु आत्मज्ञानप्राप्तेः, मोक्षसिद्धेः तथा आध्यात्मिकपरिपूर्णतायाः प्रभावी साधनामार्गः अस्ति ।*

***कूटशब्दाः*** *– तेजोबिन्दूपनिषद्, पञ्चदशाङ्गयोगः, परब्रह्म, अद्वैतवेदान्तः, आत्मसाक्षात्कारः, मोक्षः ।*

**प्रस्तावना**

भारतीयसंस्कृतेः आध्यात्मिकाधारभूताः वेदाः सन्ति । वेदानां ज्ञानकाण्डरूपाः उपनिषदः मानवजीवनस्य परमलक्ष्यं प्रतिपादयन्ति । उपनिषदां मूलप्रतिपाद्यविषयः आत्मा, ब्रह्म तथा तयोः अभेदसम्बन्धः वर्तते । उपनिषदः केवलं दार्शनिकग्रन्थाः न, अपितु जीवनदर्शनस्य व्यावहारिकमार्गदर्शकाः अपि सन्ति । अत्र मानवस्य दुःखनिवृत्तिः, आत्मस्वरूपज्ञानम् तथा मोक्षप्राप्तिः एतेषां विषयाणां गम्भीरः विचारः दृश्यते ।

योगोपनिषत्सु तेजोबिन्दूपनिषद् विशिष्टं स्थानं वहति । कृष्णयजुर्वेदसम्बद्धायाम् अस्याम् उपनिषदि योगस्य तथा अद्वैतवेदान्तस्य सुन्दरः समन्वयः दृश्यते । अन्यासु योगपरम्परासु यत्र चित्तवृत्तिनिरोधः प्रधानः मन्यते, तत्र तेजोबिन्दूपनिषदि योगस्य अन्तिमलक्ष्यं परब्रह्मसाक्षात्कारः इति प्रतिपादितम् वर्तते । मानवजीवनस्य समस्तदुःखानां मूलकारणम् अज्ञानं वर्तते । अज्ञानात् जीवः देहात्मबुद्ध्या संसारबन्धने पतति । यदा तस्य आत्मस्वरूपस्य बोधः जायते तदा सः बन्धनात् मुक्तो भवति । अस्य ज्ञानस्य प्राप्तये असौ उपनिषद् पञ्चदशाङ्गयोगस्य मार्गं निर्दिशति ।

---

*सम्पर्कसूत्रम् - 8826236051, Email- vibhakardixit20166@gmail.com

**तेजोबिन्दूपनिषदः – स्वरूपं महत्त्वञ्च**

तेजोबिन्दूपनिषद् कृष्णयजुर्वेदेन सम्बद्धा मन्यते। उपनिषदः नाम्ना एव ज्ञायते यत् अस्याः मुख्य-प्रतिपाद्यविषयः "तेजोबिन्दुः" अर्थात् हृदयस्थितं दिव्यचैतन्यं वा ब्रह्मस्वरूपं वर्तते। अस्यामुपनिषदि जीवस्य आत्मबोधः तथा ब्रह्मैक्यस्य अनुभूतिः मुख्यरूपेण प्रतिपादिता वर्तते। उपनिषद् उद्घोषयति यत् परब्रह्म न बाह्यजगति अन्वेष्टव्यम्, अपितु स्वहृदयगुहायामेव अवस्थितम् वर्तते। तस्य अनुभूतये योगः अनिवार्यसाधनम् वर्तते। तेजोबिन्दूपनिषद् केवलं सैद्धान्तिकदर्शनं न प्रतिपादयति, अपितु साधकस्य कृते व्यवहारिकमार्गमपि प्रदर्शयति। अत्र प्रतिपादितः पञ्चदशाङ्गयोगः मनःशुद्धेः आरभ्य ब्रह्मसाक्षात्कारपर्यन्तं सम्पूर्णसाधनामार्गं निर्दिशति। उपनिषद् प्रतिपादयति यत् ब्रह्म सर्वत्र विद्यमानम् वर्तते। तथापि मनुष्यः अज्ञानवशात् तस्य अनुभवं न करोति। योगाभ्यासेन चित्तस्य शुद्धिः भवति, चित्तशुद्ध्या आत्मज्ञानम्, आत्मज्ञानेन च मोक्षः इति अस्याः उपनिषदः मूलसन्देशः वर्तते।

**तेजोबिन्दूपनिषदि प्रतिपादितपञ्चदशाङ्गयोगस्य विस्तृतविवेचनम्**

तेजोबिन्दूपनिषदि परब्रह्मसाक्षात्कारस्य साधनरूपेण पञ्चदशाङ्गयोगः प्रतिपादितः। अयं योगः केवलं शरीराभ्यासपरकः न, अपितु चित्तपरिष्कारस्य, आत्मानुभूतेः तथा ब्रह्मैक्यसाक्षात्कारस्य क्रमिकसाधनामार्गः वर्तते। उपनिषद् स्पष्टतया वदति—

"यमो हि नियमस्त्यागो मौनं देशश्च कालतः। आसनं मूलबन्धश्च देहसाम्यं च दृष्टिता॥
प्राणसंयमनं चैव प्रत्याहारश्च धारणा।
आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात्॥[1]

एतेषां पञ्चदशाङ्गानां स्वरूपं निम्नलिखितरूपेण विवेच्यते—

**यमः**-पतञ्जलियोगदर्शने यमः अहिंसा, सत्यम्, अस्तेयः, ब्रह्मचर्यं तथा अपरिग्रह इति पञ्चविधः कथितः। किन्तु तेजोबिन्दूपनिषदि यमस्य स्वरूपम् अधिकम् आध्यात्मिकं दृश्यते। उपनिषद् वदति—

"सर्वं ब्रह्मेति वै ज्ञानादिन्द्रियग्रामसंयमः।
यमोऽयमिति संप्रोक्तोऽभ्यसनीयः मुहुर्मुहुः॥[2]

अर्थात् यदा साधकः "सर्वं ब्रह्म" इति भावेन जगत् पश्यति तदा तस्य इन्द्रियाणि स्वयमेव निगृहीतानि भवन्ति। अत्र यमः केवलं नैतिकनियमः न, प्रत्युत ब्रह्मदृष्ट्या इन्द्रियनिग्रहः वर्तते।

**नियमः**-उपनिषद् नियमस्य स्वरूपं मनोनिग्रहस्य आधाररूपेण प्रतिपादयति—

"सजातीयप्रवाहश्च विजातीयतिरस्कृतिः।
नियमो हि परानन्दो नियमात्क्रियते बुधैः॥[3]

अर्थात् ब्रह्मविषयकवृत्तीनां निरन्तरप्रवाहः तथा विषयवासनानां निरसनं नियमः इति कथ्यते। अयं नियमः साधकस्य अन्तःकरणं परमानन्दस्य अनुभवे समर्थं करोति।

**त्यागः**- सामान्यतया त्यागः वस्तुपरित्यागरूपेण ज्ञायते। किन्तु उपनिषद् तस्य गम्भीरतरं स्वरूपं

[1]तेजोबिन्दूपनिषद् १.१५–१६
[2]तेजोबिन्दूपनिषद् १.१७
[3]तेजोबिन्दूपनिषद् १.१८

प्रतिपादयति—

त्यागः प्रपञ्चरूपस्य सच्चिदात्मावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षप्रदायकः ॥[१]

जगतः मिथ्यात्वबोधपूर्वकं सच्चिदानन्दस्वरूपे आत्मनि स्थितिः एव वास्तविकः त्यागः वर्तते । अयं त्यागः मोक्षस्य प्रत्यक्षसाधनं भवति ।

**मौनम्** - मौनं सामान्यतया वाक्संयमः इति मन्यते । किन्तु उपनिषद् वदति—

यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा जडैः ॥[२]

यत् तत्त्वं वाणीं मनश्च न प्राप्नुतः, तदेव वास्तविकमौनम् । केवलम् अनुच्चारणं मौनं नास्ति । ब्रह्मनिष्ठा एव मौनस्य परमस्वरूपम् । अतः उपनिषद् बाह्यमौनस्य अपेक्षया अन्तर्मौनस्य महत्त्वं प्रतिपादयति ।

**देश**- उपनिषद् देशस्य व्याख्यां लौकिकभौगोलिकसीमाभ्यः परं नयति—

आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥[३]

यः सर्वव्यापकः ब्रह्मदेशः, यत्र द्वैतस्य लेशोऽपि नास्ति, स एव साधकस्य वास्तविकः ध्यानदेशः ।

**कालः**- कालस्य विषये उपनिषद् अद्वैतदृष्टिं प्रतिपादयति—

कल्पना सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टं ह्यखण्डानन्दमद्वयम् ॥[४]

अर्थात् अखण्डानन्दरूपं ब्रह्म एव वास्तविकः कालः । भूत-भविष्य-वर्तमानभेदः अज्ञानजन्यः कल्पितः भेदः वर्तते ।

**आसनम्**- पतञ्जलिना "स्थिरसुखमासनम्" इति परिभाषा प्रदत्ता । किन्तु तेजोबिन्दूपनिषदि आसनस्य आध्यात्मिकव्याख्या दृश्यते—

सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम् ।
आसनं तद्विजानीयादन्यत्सुखविनाशनम् ॥[५]

अर्थात् यस्मिन् स्थितौ निरन्तरं ब्रह्मचिन्तनं सम्भवति, तदेव वास्तविकमासनम् ।

**मूलबन्धः** -उपनिषद् वदति-

यन्मूलं सर्वलोकानां यन्मूलं चित्तबन्धनम् ।
मूलबन्धः सदा सेव्यो योग्यः स राजयोगिनाम् ॥[६]

---

[१]तेजोबिन्दूपनिषद् १.१९
[२]तेजोबिन्दूपनिषद् १.२०, तैत्तिरीयोपनिषद् २.९
[३]तेजोबिन्दूपनिषद् १.२३
[४]तेजोबिन्दूपनिषद् १.२४
[५]तेजोबिन्दूपनिषद् १.२५
[६]तेजोबिन्दूपनिषद् १.२७


ISSN : 2320-740X

चित्तबन्धस्य मूलकारणम् अविद्या वर्तते । तस्य निवारणमेव वास्तविकः मूलबन्धः । अयं साधकं संसारबन्धनात् विमोचयति ।

**देहसाम्यम्** देहसाम्यं केवलं शारीरिकसमत्वं नास्ति । उपनिषद् वदति—

अङ्गानां समता विद्यात्समे ब्रह्मणि लीयते ।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥[1]

यदा शरीरं तथा मनः स्थिरं भवति तदा साधकस्य चित्तं ब्रह्मणि लीयते। अतः देहसाम्यम् आध्यात्मिकस्थैर्यस्य आधारः वर्तते ।

**दृष्टिस्थितिः** - दृष्टेः विषये उपनिषद् अभिनवं दृष्टिकोणं प्रतिपादयति—

दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत् ।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥[2]

अर्थात् नासिकाग्रदर्शनमेव योगः नास्ति। अपितु सर्वत्र ब्रह्मदर्शनमेव श्रेष्ठा दृष्टिः। अयं अद्वैतवेदान्तस्य सारभूतः सिद्धान्तः वर्तते ।

**प्राणसंयमनम्**

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥[3]

चित्तस्य समस्तवृत्तीनां ब्रह्मभावेन नियमनमेव प्राणसंयमनम् । यदा प्राणाः शान्ताः भवन्ति तदा मनः अपि स्थिरं भवति । अतः प्राणसंयमनं मनोनिग्रहस्य प्रमुखोपायः वर्तते । प्राणाः मनसा सह अत्यन्तं सम्बद्धः वर्तते । प्राणानां नियमनं मनोनिग्रहस्य प्रमुखं साधनम् । यदा प्राणः शान्तः भवति तदा चित्तं स्थिरं भवति । अतः प्राणसंयमनं ध्यानस्य पूर्वभूमिका वर्तते ।

**प्रत्याहारः**

विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम् ।
प्रत्याहारः स विज्ञेयः अभ्यासनीयः मुहुर्मुहुः ॥[4]

विषयेषु अपि आत्मस्वरूपस्य दर्शनं कृत्वा मनसः चैतन्ये लयनमेव प्रत्याहारः । एतेन इन्द्रियाणि विषयभ्यः निवर्तन्ते तथा साधकः अन्तर्मुखो भवति। प्रत्याहारः इन्द्रियाणां विषयभ्यः निवर्तनम्। विषयेषु प्रवृत्तानि इन्द्रियाणि यदा आत्मनि प्रतिष्ठाप्यन्ते तदा साधकस्य अन्तर्मुखता वर्धते । ब्रह्मज्ञानस्य प्राप्त्यर्थं अयं चरणः अत्यन्तमहत्त्वपूर्णः वर्तते ।

**धारणा**

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
मनसो धारणं चैव धारणा सा परा मता ॥[5]

---

[1]तेजोबिन्दूपनिषद् १.२८
[2]तेजोबिन्दूपनिषद् १.२९
[3]तेजोबिन्दूपनिषद् १.३१
[4]तेजोबिन्दूपनिषद् १.३४
[5]तेजोबिन्दूपनिषद् १.३५

मनः यत्र कुत्रापि गच्छति, तत्र सर्वत्र ब्रह्मदर्शनं कृत्वा तस्य ब्रह्मणि स्थिरीकरणं धारणा इति कथ्यते। एषा ध्यानस्य पूर्वावस्था वर्तते। चित्तस्य ब्रह्मविषये स्थिरीकरणं धारणा इति कथ्यते। विषयभ्रमणशीलं मनः यदा एकस्मिन् ब्रह्मतत्त्वे निरुद्धं भवति तदा धारणा सिद्धा भवति। एषा ध्यानस्य पूर्वावस्था वर्तते।

**ध्यानम्**

ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः।
ध्यानशब्देन विख्याता परमानन्ददायिनी ॥[1]

'अहं ब्रह्मास्मि' इति अखण्डभावनया निरन्तरं स्थितिः ध्यानम्। तेजोबिन्दूपनिषद् ध्यानं साधनामार्गस्य केन्द्रबिन्दुरूपेण स्वीकरोति। अस्य माध्यमेन चित्तवृत्तयः शनैः शनैः लीयन्ते तथा साधकः आत्मस्वरूपे प्रतिष्ठितो भवति। तेजोबिन्दूपनिषदि ध्यानं साधनामार्गस्य केन्द्रबिन्दुरूपेण प्रतिपादितम्। आत्मतत्त्वस्य निरन्तरचिन्तनं, ब्रह्मभावनायाः अखण्डप्रवाहः तथा जीवब्रह्मैक्यस्य अनुभूतिपूर्वकमननं ध्यानम् इति कथ्यते। ध्यानस्य माध्यमेन चित्तवृत्तयः शनैः शनैः लीयन्ते तथा साधकः आत्मस्वरूपे प्रतिष्ठितः भवति।

**समाधिः**

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः।
वृत्तिविस्मरणं सम्यक् समाधिरभिधीयते ॥[2]

यदा चित्तवृत्तयः पूर्णतया ब्रह्माकाराः भवन्ति तथा ज्ञाता-ज्ञान-ज्ञेयभेदः विलीयते, तदा समाध्यवस्था भवति। अस्यामवस्थायां केवलं ब्रह्मस्वरूपमेव अवशिष्यते। एषः अद्वैतानुभवः एव परब्रह्मसाक्षात्कारः कथ्यते। पञ्चदशाङ्गयोगस्य अन्तिमम् अङ्गं समाधिः वर्तते। अस्यामवस्थायां ज्ञाता-ज्ञान-ज्ञेयभेदः पूर्णतया विलीयते। केवलं ब्रह्मस्वरूपमेव अवशिष्यते। अयम् अद्वैतानुभवः एव परब्रह्मसाक्षात्कारः कथ्यते। समाधौ साधकः अनुभवति— "अहं ब्रह्मास्मि", "सर्वं खल्विदं ब्रह्म", "नेह नानास्ति किञ्चन"। एषा अवस्था न केवलं बौद्धिकज्ञानस्य परिणामः, अपितु प्रत्यक्षानुभूतिरूपा ब्रह्मावगतिः वर्तते।

**पञ्चदशाङ्गयोगस्य समग्रमहत्त्वम्**

तेजोबिन्दूपनिषदि प्रतिपादितः पञ्चदशाङ्गयोगः योगदर्शनस्य अद्वैतवेदान्तस्य च समन्वितस्वरूपं प्रस्तुतयति। अस्य योगस्य विशेषता एषा यत् अयं केवलं शारीरिक-अथवा मानसिक-अनुशासनपर्यन्तं सीमितः न भवति, अपितु साधकं क्रमशः आत्मसाक्षात्कारस्य दिशि नयति। यमनियमत्यागमौनदेश-कालासनादिभिः साधकस्य आचार-विचार-चित्तस्य च शुद्धिः सम्पद्यते। मूलबन्धदेहसाम्यदृष्टिस्थिति-प्राणसंयमनादिभिः अन्तःकरणस्य स्थैर्यं वर्धते। प्रत्याहारधारणाध्यानाम् अभ्यासेन मनः बहिर्विषयेभ्यः निवर्त्य ब्रह्मतत्त्वे एकाग्रं भवति। अन्ततः समाध्यवस्थायां ज्ञाता-ज्ञान-ज्ञेयभेदः विलीयते तथा साधकः स्वस्य ब्रह्मस्वरूपस्य साक्षात्कारं करोति। एवं पञ्चदशाङ्गयोगः नैतिकशुद्धेः आरभ्य परमात्मैक्यस्य अनुभूतिपर्यन्तं सम्पूर्णसाधनामार्गं प्रदर्शयति। अतः अयं केवलं योगाभ्यासः न, अपितु मोक्षप्राप्तेः समग्रः

[1] तेजोबिन्दूपनिषद् १.३६
[2] तेजोबिन्दूपनिषद् १.३७

दार्शनिकः तथा आध्यात्मिकः मार्गः इति स्वीक्रियते ।

**पञ्चदशाङ्गयोगेन परब्रह्मावगतिः — अद्वैतवेदान्तीयविश्लेषणम्**

तेजोबिन्दूपनिषदः प्रतिपादयति यत् मानवजीवनस्य परमलक्ष्यं परब्रह्मप्राप्तिः वर्तते । एषा प्राप्तिः न बाह्यकर्मणा, न केवलं तर्केण, न च शास्त्राध्ययनमात्रेण सम्भवति; अपितु आत्मसाक्षात्काररूपेण अन्तःकरणे अनुभूयते । उपनिषदः स्पष्टतया प्रतिपादयति यत् जीवस्य वास्तविकस्वरूपं ब्रह्मैव वर्तते, किन्तु अविद्यया तस्य स्वरूपस्य आवरणं जातम् अस्ति । पञ्चदशाङ्गयोगस्य उद्देश्यं तदेव आवरणं दूरं कृत्वा आत्मनः ब्रह्मरूपत्वस्य साक्षात्कारः इति । अद्वैतवेदान्ते बन्धनस्य मूलकारणम् अविद्या स्वीक्रियते । अविद्यया जीवः स्वं शरीर-मनः-बुद्ध्यादिभिः सह अभिन्नं मन्यते । फलतः सः सुख-दुःखयोः, राग-द्वेषयोः, जन्म-मरणयोः चक्रे पतति । यदा ज्ञानं जायते तदा अज्ञानस्य नाशः भवति तथा जीवः स्वस्वरूपे प्रतिष्ठितः भवति । अयं सिद्धान्तः प्रमुखोपनिषत्सु बहुधा प्रतिपादितः दृश्यते ।

माण्डूक्योपनिषदि आत्मनः चतुर्षु पादेषु—जाग्रत्स्वप्नसुषुप्तितुरीयावस्थानां विवेचनं कृतम् अस्ति । तत्र तुरीयावस्था सर्वव्यवहारातीतं शुद्धचैतन्यस्वरूपं ब्रह्म निर्दिशति— “नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञम् ... शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ।[१] अस्मिन् मन्त्रे उपनिषद् आत्मनः तुरीयस्वरूपं निरूपयति । आत्मा न जाग्रदवस्थायाः बहिःप्रज्ञः, न स्वप्नावस्थायाः अन्तःप्रज्ञः, न च उभयात्मकः । सुषुप्त्यवस्थायामिव प्रज्ञानघनः अपि न भवति । सः सामान्यज्ञानस्वरूपः नास्ति, अज्ञानस्वरूपः अपि नास्ति । अतः आत्मा सर्वावस्थाविलक्षणः, सर्वोपाधिविनिर्मुक्तः च अस्ति । बृहदारण्यकोपनिषदि आत्मा एव सर्वस्य आधारः इति प्रतिपादितम् अस्ति । याज्ञवल्क्यः मैत्रेयीं प्रति वदति— आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।[२] अर्थात् आत्मा ज्ञातव्यः, श्रोतव्यः, मन्तव्यः तथा निदिध्यासितव्यः । आत्मज्ञानमेव मोक्षस्य साधनम् इति अत्र प्रतिपाद्यते । पुनश्च अहं ब्रह्मास्मि ।[३] इति महावाक्येन जीव-ब्रह्मणोः अभेदः उद्घोषितः अस्ति । छान्दोग्योपनिषदि उद्दालकः श्वेतकेतुं प्रति नववारं प्रसिद्धं महावाक्यं कथयति—तत्त्वमसि श्वेतकेतो ।[४] अर्थात् “हे श्वेतकेतो ! त्वमेव तत् ब्रह्म असि ।” अत्र जीवस्य ब्रह्मरूपत्वं प्रतिपादितम् अस्ति । यथा नद्यः समुद्रे प्रविश्य स्वनामरूपं त्यजन्ति, तथैव जीवः ब्रह्मणि एकत्वं प्राप्नोति इति दृष्टान्तः अपि तत्र प्रदत्तः अस्ति ।

तेजोबिन्दूपनिषदि पञ्चदशाङ्गयोगः ज्ञानप्राप्तेः साधनरूपेण निरूपितः वर्तते । यम-नियमाभ्यां चित्तशुद्धिः भवति । त्यागेन विषयासक्तेः निवारणं जायते । मौनेन अन्तर्मुखता वर्धते । देश-काल-आसन-मूलबन्धादिभिः चित्तस्थैर्यं सम्पद्यते । प्राणसंयमेन मनोनिग्रहः, प्रत्याहारेण विषयविमुखता, धारणया एकाग्रता, ध्यानेन आत्मचिन्तनम् तथा समाधिना ब्रह्मसाक्षात्कारः भवति । अतः पञ्चदशाङ्गयोगः अद्वैतवेदान्तस्य व्यावहारिकपक्षः इति वक्तुं शक्यते । यत् तत्त्वं वेदान्तः सिद्धान्तरूपेण प्रतिपादयति, तत् योगः अनुभवरूपेण साकारयति । एवं ज्ञानं तथा योगः परस्परपूरकौ स्तः । माण्डूक्योपनिषदः तुरीयब्रह्मस्वरूपं, बृहदारण्यकोपनिषदः आत्मविद्यायाः महत्त्वं, छान्दोग्योपनिषदः

---

[१] माण्डूक्योपनिषद्, मन्त्र ७

[२] बृहदारण्यकोपनिषद् २.४.५

[३] बृहदारण्यकोपनिषद् १.४.१०

[४] छान्दोग्योपनिषद् ६.८.७

ISSN : 2320-740X

जीवब्रह्मैक्यं च प्रतिपादयन्ति; तेजोबिन्दूपनिषत् तु तस्यैव ब्रह्मविद्यायाः प्राप्त्यर्थं पञ्चदशाङ्गयोगस्य साधनामार्गं निर्दिशति। अतः एतेषां समस्तानामुपनिषदां सारः आत्मज्ञानद्वारा ब्रह्मप्राप्तिरेव इति निष्पद्यते।

तेजोबिन्दूपनिषदि पञ्चदशाङ्गयोगः ज्ञानप्राप्तेः साधनरूपेण निरूपितः वर्तते। यम-नियमाभ्यां चित्तशुद्धिः भवति। त्यागेन विषयासक्तेः निवारणं जायते। मौनेन अन्तर्मुखता वर्धते। देशकालासनमूलबन्धादिभिः चित्तस्थैर्यं सम्पद्यते। प्राणसंयमेन मनोनिग्रहः, प्रत्याहारेण विषयविमुखता, धारणया एकाग्रता, ध्यानेन आत्मचिन्तनम् तथा समाधिना ब्रह्मसाक्षात्कारः भवति। अतः पञ्चदशाङ्गयोगः अद्वैतवेदान्तस्य व्यावहारिकपक्षः इति वक्तुं शक्यते। यत् तत्त्वं वेदान्तः सिद्धान्तरूपेण प्रतिपादयति, तत् योगः अनुभवस्य स्तरं नयति। एवं ज्ञानं तथा योगः परस्परपूरकौ स्तः।

**पञ्चदशाङ्गयोगस्य मनोवैज्ञानिकमहत्त्वम्**

तेजोबिन्दूपनिषदि वर्णितः योगः केवलम् आध्यात्मिकदृष्ट्या न, अपितु मनोवैज्ञानिकदृष्ट्यापि अत्यन्तं महत्त्वपूर्णः वर्तते। आधुनिकयुगे मनुष्यः मानसिकतनावेन, चिन्तया, असन्तोषेण, स्पर्धया तथा भौतिकतावादेन पीडितः वर्तते। एते सर्वे मनसः चञ्चलतां वर्धयन्ति। योगोपनिषद् मनसः नियन्त्रणस्य उपायं प्रदर्शयति। यमः तथा नियमः व्यक्तित्वनिर्माणस्य आधारः भवतः। त्यागः लोभस्य निवारणं करोति। मौनम् अन्तर्दर्शनस्य अवसरं ददाति। प्रत्याहारः इन्द्रियाणाम् अनुशासनं जनयति। ध्यानं मानसिकशान्तिं वर्धयति। समाधिः पूर्णमनोवैज्ञानिकसमत्वस्य अवस्था भवति। अतः तेजोबिन्दूपनिषदि प्रतिपादितः योगः केवलं मोक्षमार्गः न, अपितु स्वस्थजीवनस्य अपि मार्गदर्शकः वर्तते।

**पतञ्जलिप्रणीताष्टाङ्गयोगेन सह तुलनात्मकाध्ययनम्**

भारतीययोगपरम्परायां पतञ्जलिमहर्षिणा प्रतिपादितः अष्टाङ्गयोगः सर्वाधिकप्रसिद्धः वर्तते। तस्य अङ्गानि सन्ति—

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि॥[1]

तेजोबिन्दूपनिषदि प्रतिपादितः योगः एतत् आधारं स्वीकृत्य विस्तारितः दृश्यते।

| 8 अङ्गानि | 15 अङ्गानि |
|---|---|
| चित्तवृत्तिनिरोधः लक्ष्यम् | ब्रह्मसाक्षात्कारः लक्ष्यम् |
| योगदर्शनप्रधानः | अद्वैतवेदान्तप्रधानः |
| प्राणायामः प्रमुखः | प्राणसंयमनम् अद्वैतदृष्ट्या |
| नैतिकशिक्षा | ब्रह्मदृष्टिसहितनैतिकता |
| समाधिः अन्तिमावस्था | समाधिः ब्रह्मैक्यानुभवः |

विशेषतः त्यागः, मौनम्, देशः, कालः, मूलबन्धः, देहसाम्यम्, दृष्टिस्थितिः इत्यादीनि अङ्गानि तेजोबिन्दूपनिषदः विशिष्टयोगदानानि सन्ति। अतः स्पष्टं भवति यत् तेजोबिन्दूपनिषदः पतञ्जलियोगस्य विरोधं न करोति, अपितु तस्य वेदान्तीयविस्तारं प्रदर्शयति।

[1] योगसूत्रम् २.२९


ISSN : 2320-740X

**आधुनिकपरिप्रेक्ष्ये पञ्चदशाङ्गयोगस्य उपादेयता**

वर्तमानकाले विज्ञानस्य, प्रौद्योगिक्याः तथा भौतिकसुविधानां विकासः अभूतपूर्वः जातः । तथापि मानसिक-अशान्तिः, नैतिक-पतनम्, पारिवारिक-विघटनम् तथा आध्यात्मिक-शून्यता अपि वर्धमाना दृश्यते । एतादृशे काले तेजोबिन्दूपनिषदि प्रतिपादितस्य पञ्चदशाङ्गयोगस्य विशेषमहत्त्वं दृश्यते ।

**नैतिकविकासः**

यम-नियमाभ्यां व्यक्तित्वस्य परिष्कारः भवति । समाजे सत्यनिष्ठा, अनुशासनम् तथा उत्तरदायित्वबोधः वर्धते ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥[१]

अहिंसासत्यार्जवदयादमादयः गुणाः नैतिकजीवनस्य आधाराः सन्ति । पञ्चदशाङ्गयोगस्य यम-नियमाभ्यासेन एते गुणाः विकसिताः भवन्ति । सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ।[२]

व्याख्या— सत्यतपब्रह्मचर्यं तथा सम्यग्ज्ञानं आत्मप्राप्तेः साधनानि सन्ति ।

**मानसिकस्वास्थ्यरक्षणम्**

ध्यानं, मौनम् तथा प्रत्याहारः मानसिकतनावस्य नियन्त्रणे अत्यन्तोपयोगिनः भवन्ति ।

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥[३]

चञ्चलं मनः पुनः पुनः आत्मनि नियोजनीयम् । एषः ध्यानयोगस्य मूलाधारः अस्ति ।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥[४]

मन एव बन्धनस्य मोक्षस्य च कारणम् । विषयासक्तं मनः दुःखाय, संयतं मनः शान्तये च भवति ।

**आध्यात्मिकविकासः**

पञ्चदशाङ्गयोगः मनुष्यं भौतिकसमृद्धेः परे जीवनस्य परमलक्ष्यस्य बोधं कारयति ।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।[५] आत्मज्ञानात् श्रेष्ठं पवित्रं साधनं नास्ति । योगस्य परमलक्ष्यमपि आत्मज्ञानमेव ।

ब्रह्मविदाप्नोति परम् ।[६] ब्रह्मज्ञानी परमपुरुषार्थं प्राप्नोति । पञ्चदशाङ्गयोगः साधकं ब्रह्मविद्यायाः

[१] भगवद्गीता १६.१–२
[२] मुण्डकोपनिषद् ३.१.५
[३] भगवद्गीता ६.२६
[४] अमृतबिन्दूपनिषद् २
[५] भगवद्गीता ४.३८
[६] तैत्तिरीयोपनिषद् २.१.१

प्राप्त्यर्थं प्रेरयति ।

**वैश्विकसौहार्दम्**

अद्वैतदृष्ट्या सर्वेषु भूतेषु एकत्वभावस्य विकासः भवति । एषः विश्वशान्तेः आधारः अस्ति ।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥[1]

योगयुक्तः पुरुषः सर्वेषु भूतेषु आत्मानं पश्यति । एषा समदृष्टिः वैश्विकसौहार्दस्य मूलम् ।

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥[2]

यः सर्वत्र एकमेव आत्मतत्त्वं पश्यति, तस्य न मोहः भवति न शोकः । एषा भावना विश्वबन्धुत्वस्य मूलाधारः अस्ति ।"सर्वं ब्रह्म" इति भावना मानवेषु समता, करुणा तथा विश्वबन्धुत्वस्य भावं विकसितुं शक्नोति । अद्वैतवेदान्तस्य मूलसिद्धान्तः सर्वेषु भूतेषु एकमेव ब्रह्मतत्त्वम् इति । एषा समदृष्टिः मानवेषु समता, करुणा, सहिष्णुता तथा विश्वबन्धुत्वस्य भावं विकसितुं समर्था भवति । योगयुक्तः साधकः सर्वेषु भूतेषु स्वात्मानं पश्यति, तेन भेदभावः, द्वेषः तथा सङ्घर्षः निवर्तन्ते । ईशावास्योपनिषदि अपि यः सर्वत्र आत्मैक्यं पश्यति, तस्य मोहः शोकश्च न भवतः । अतः "सर्वं ब्रह्म" इति भावना केवलं दार्शनिकसिद्धान्तः न, अपितु वैश्विकशान्तेः, सामाजिकसामञ्जस्यस्य तथा मानवकल्याणस्य दृढाधारः अस्ति । अद्यतनविश्वे जाति-धर्म-वर्ण-भाषाभेदान् अतिक्रम्य सर्वान् प्रति समभावस्य स्थापना एव वैश्विकसौहार्दस्य प्रमुखमार्गः भवति ।

**निष्कर्षः**

तेजोबिन्दूपनिषदि प्रतिपादितः पञ्चदशाङ्गयोगः भारतीययोगपरम्परायाः एकं विशिष्टं, मौलिकं तथा दार्शनिकदृष्ट्या अत्यन्तं महत्त्वपूर्णं योगदानम् अस्ति । अयं योगः न केवलं योगशास्त्रस्य साधनात्मकपरम्परां समृद्धयति अपितु अद्वैतवेदान्तस्य परमसिद्धान्तान् व्यावहारिकसाधनारूपेण प्रतिष्ठापयति । उपनिषदां मुख्यप्रतिपाद्यविषयः ब्रह्मविद्या आत्मविद्या तथा मोक्षप्राप्तिः इति सर्वविदितम् । तेजोबिन्दूपनिषद् एतस्यैव परम्परायाः अनुसरणं कुर्वती योगमार्गं ब्रह्मसाक्षात्कारस्य साधनरूपेण प्रतिपादयति । अत्र योगः केवलं चित्तनिरोधस्य प्रक्रिया न, अपितु आत्मस्वरूपस्य प्रत्यक्षानुभवस्य, जीवब्रह्मैक्यस्य तथा अविद्यानिवृत्तेः साधनं मन्यते ।

अध्ययनात् स्पष्टं भवति यत् तेजोबिन्दूपनिषदि वर्णितः पञ्चदशाङ्गयोगः पतञ्जलिप्रणीताष्टाङ्गयोगस्य प्रभावेन प्रेरितः सन् अपि तस्मात् बहुधा भिन्नः अस्ति । यत्र पतञ्जलियोगे यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिः इति अष्टाङ्गानि निर्दिष्टानि सन्ति, तत्र तेजोबिन्दूपनिषदि त्यागमौनदेशकालमूलबन्धदेहसाम्यदृष्टिस्थितिः इत्यादीनामपि समावेशः कृतः । एतेषां नवीनाङ्गानां समावेशेन स्पष्टं भवति यत् उपनिषदः योगसाधनां केवलं शारीरिक-अनुशासनपर्यन्तं न सीमितवान्, अपितु साधकस्य सम्पूर्ण-व्यक्तित्वस्य आध्यात्मिकपरिष्कारं लक्ष्यीकृतवान् ।

[1]भगवद्गीता ६.२९
[2]ईशावास्योपनिषद् ७

 ISSN : 2320-740X

पञ्चदशाङ्गयोगस्य प्रत्येकमङ्गं साधकस्य क्रमिकविकासे महत्त्वपूर्णां भूमिकां निर्वहति। यमः तथा नियमः नैतिकजीवनस्य आधारभूततत्त्वानि सन्ति, ये साधकस्य अन्तःकरणशुद्धिं, सदाचारम्, आत्मसंयमं च सुदृढीकुर्वन्ति। त्यागः विषयासक्तेः क्षयस्य, मौनं मनोनिग्रहस्य तथा अन्तर्मुखतायाः, देशः तथा कालः साधनानुकूलपरिस्थितेः, आसनं तथा मूलबन्धः देहस्थैर्यस्य प्राणशक्तिनियमनस्य च साधनरूपेण विवेचितौ स्तः। देहसाम्यं तथा दृष्टिस्थितिः शरीरस्य, मनसः तथा इन्द्रियाणां समन्वितनियन्त्रणं सुलभं कुर्वन्ति, येन ध्यानाभ्यासः अधिकः फलदायी भवति।

ततः परं प्राणसंयमनप्रत्याहारधारणाध्यानम् इति चत्वारि अङ्गानि चित्तस्य सूक्ष्मपरिष्कारस्य प्रमुखसाधनानि भवन्ति। प्राणसंयमेन प्राणशक्तेः सन्तुलनं सम्पद्यते मनः प्रशान्तं भवति, चित्तविक्षेपाः शनैः शनैः उपशमं यान्ति। प्रत्याहारेण इन्द्रियाणां विषयेषु प्रवृत्तिः निवर्तते तथा अन्तर्मुखभावः विकसितो भवति। धारणा चित्तस्य एकत्र स्थिरीकरणस्य साधनं भवति, ध्यानं तस्य स्थैर्यस्य अखण्डप्रवाहस्वरूपं विकासयति। अन्ततः समाधौ साधकः सर्वविकल्पान् अतिक्रम्य आत्मस्वरूपस्य ब्रह्मस्वरूपस्य च अभेदानुभवं प्राप्नोति। एषा समाधिः न केवलं ध्यानस्य चरमावस्था अपितु अद्वैतवेदान्ते प्रतिपादितस्य ब्रह्मसाक्षात्कारस्य प्रत्यक्षानुभवः इति स्वीक्रियते।

तेजोबिन्दूपनिषदः प्रतिपादितस्य योगदर्शनस्य प्रमुखविशेषता एषा वर्तते यत् अत्र योगः ज्ञानस्य विरोधी न, अपितु ज्ञानप्राप्तेः अनिवार्यसाधनं मन्यते। योगाभ्यासेन शुद्धैकाग्रं तथा निर्मलं चित्तं ब्रह्मविद्यायाः ग्राहकम् भवति। अतः अस्मिन् उपनिषदि योगः तथा वेदान्तः परस्परपूरकौ, न तु परस्परविरोधिनौ इति स्पष्टतया प्रतिपादितम् अस्ति। एषा समन्वयदृष्टिः भारतीयदर्शनस्य व्यापकभावनां प्रतिबिम्बयति, यत्र साधनं तथा साध्यमभ्यासः तथा ज्ञानयोगः तथा वेदान्तः परस्परं पूरयतः।

समकालीनपरिप्रेक्ष्ये अपि पञ्चदशाङ्गयोगस्य प्रासङ्गिकता अत्यधिकं दृश्यते। आधुनिकमानवः मानसिकतनावेन, सामाजिकस्पर्धया, भौतिकतावादेन, नैतिकमूल्यह्रासेन तथा आध्यात्मिकशून्यतया पीड्यते। एतादृशे परिवेशे यम-नियमादयः नैतिकजीवनस्य पुनर्स्थापनाय प्रेरणां ददति। त्यागः लोभ-मोहादिदोषान् शमयति, मौनं मानसिकशान्तिं जनयति, ध्यानं चित्तस्य स्थैर्यं वर्धयति, समाधिः आत्मस्वरूपस्य अनुभूतिं सम्पादयति। अतः पञ्चदशाङ्गयोगः न केवलं मोक्षमार्गस्य साधनं, अपितु स्वस्थ-समन्वित-नैतिकजीवनस्य अपि प्रभावी मार्गदर्शकः इति स्वीकर्तुं शक्यते।

एतदध्ययनस्य आधारेण एतदपि निष्पन्नं भवति यत् तेजोबिन्दूपनिषदि प्रतिपादितः पञ्चदशाङ्गयोगः भारतीयज्ञानपरम्परायाः समन्वयात्मकदृष्टेः उत्कृष्टम् उदाहरणम् अस्ति। अत्र योगस्य शारीरिक, मानसिक, नैतिक, आध्यात्मिक तथा दार्शनिकाः सर्वे आयामाः समन्वितरूपेण निरूपिताः सन्ति। अयं योगः साधकं क्रमशः बहिर्मुखजीवनात् अन्तर्मुखतां, अन्तर्मुखतायाः आत्मबोधं, आत्मबोधात् ब्रह्मज्ञानं, ब्रह्मज्ञानात् मोक्षं च प्रति नयति। अतः अस्य योगस्य चरमलक्ष्यं न केवलं मानसिकप्रशान्तिः, न च शारीरिकस्वास्थ्यम्, अपितु परब्रह्मस्वरूपस्य प्रत्यक्षानुभूतिः एव इति निःसन्देहं सिध्यति।

अन्ततः निष्कर्षतया वक्तुं शक्यते यत् तेजोबिन्दूपनिषदि प्रतिपादितः पञ्चदशाङ्गयोगः भारतीय-योगदर्शनस्य, उपनिषद्परम्परायाः तथा अद्वैतवेदान्तस्य अमूल्यं दार्शनिकं योगदानम् अस्ति। अस्य अध्ययनं न केवलं योगदर्शनस्य ऐतिहासिकविकासं प्रकाशयति, अपितु आधुनिकमानवस्य आध्यात्मि-

कोन्नत्यै, मानसिकसन्तुलनाय, नैतिकजीवननिर्माणाय तथा आत्मसाक्षात्काराय अपि सुदृढं मार्गदर्शनं प्रददाति । अतः पञ्चदशाङ्गयोगः अद्यापि सार्वकालिकः, सार्वभौमिकः तथा सर्वमानवकल्याणाय उपयुक्तः साधनामार्गः इति सम्यक् प्रतिपादयितुं शक्यते ।

## सन्दर्भग्रन्थसूची

१. तेजोबिन्दूपनिषद्, निर्णयसागरसंस्करणम्, मुम्बई ।
२. अष्टोत्तरशतोपनिषदः, निर्णयसागर प्रेस, मुम्बई ।
३. Patanjali, योगसूत्रम् व्यासभाष्यसहितम्, चौखम्बा संस्कृत संस्थान, वाराणसी ।
४. ब्रह्मसूत्रभाष्यम्, चौखम्बा विद्याभवनम्, वाराणसी ।
५. बृहदारण्यकोपनिषद्भाष्यम्, गीता प्रेस, गोरखपुर ।
६. छान्दोग्योपनिषद्भाष्यम्, गीता प्रेस, गोरखपुर ।
७. माण्डूक्यकारिकाभाष्यम्, चौखम्बा संस्कृत संस्थान ।
८. Swami Madhavananda, The Upanishads, Advaita Ashrama, Kolkata ।
९. राजयोग, अद्वैत आश्रम, कोलकाता ।
१०. Swami Sivananda, The Science of Yoga, Divine Life Society.
१०. Sarvepalli Radhakrishnan, Indian Philosophy, Vol. I & II.




ISSN : 2320-740X

# तार्किकयुक्त्या पूर्वपक्षीयासत्ख्यातौ दोषोपचारः, उक्तदोषपरिहारश्च

अनिरुद्ध घोषः*
शोधच्छात्रः, रामकृष्ण मिशन् विद्यामन्दिरम्,
बेलूर्-मठः, पश्चिम-बंगालः

***लेखसारः*** *– रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम् इत्यादिस्वामिवचोभिः सुस्पष्टं यत् तत्त्वसाक्षात्कारोपकारकाणि यावन्ति शास्त्राणि वर्तन्ते तेषां समेषां शास्त्राणां मतानि यद्यपि भिन्नभिन्नानि तथापि तत्त्वन्तु समेषाम् एकमेव, परमं ब्रह्मतत्त्वम् । नित्यशुद्धबुद्धमुक्तसत्यस्वभावे ब्रह्मणि ऐहिकानां दृग्गोचरीभूतं जगदध्यस्तमिति सर्वैः शास्त्रपारावारपारिणैः विदितमेव । अस्य अध्यस्तप्रपञ्चस्य त्रितापेषु विदग्धाः सांसारिकाः बहुविधलौकिकव्यवहारेषु भ्रमिताः भवन्ति । अत एव धीमन्तः शास्त्रचर्चासमये स्वीयप्रमां यथा संस्थापयन्तः विलोक्यन्ते तथैव अप्रमाविषयिणीं ख्यातिमपि । तत्र अप्रमानिरुपणावसरे दार्शनिकानां हि 'मुण्डे मुण्डे मतिर्भिन्ना' इति वचनप्रामाण्यात् वैमत्यं परिलक्ष्यते । तस्मात् ख्यातिचर्चायां वादिप्रतिवादिनोः खण्डनमण्डनाभ्याम् औत्कर्ष्यापकर्ष्यस्थापनं दरीदृश्यते । अस्मिन् शोधपत्रे उत्तरपक्षरूपेण नैयायिकाभिमतान्यथाख्यातिमभिमत्य पूर्वपक्षीयनिरधिष्ठानासत्ख्यातेः दोषांश्च प्रदर्श्य उक्तदोषाः तार्किकबुद्धैः निरस्यन्ते ।*

***कूटशब्दाः*** *– आत्मख्यातिः, असत्ख्यातिः, प्रतीत्यसमुत्पादः, चतुष्कोटिविनिर्मुक्तम्, सांवृत्तिकम्, हीनयानः, तथ्यसंवृत्तिः, आलम्बनम्, आकाशकुसुमवदसत्प्रतिभासकल्पना, केशोण्ड्रकः, असद्विषयकः ।*

## भूमिका

इह खलु संसारार्णवे बम्भ्रम्यमाणानामशेषजनिमतां दुःखनिदानं मिथ्याज्ञानमेव । मिथ्याज्ञानेन प्रलुब्धाः स्मो वयम् । अस्माकं प्रात्यहिकजीवने बहुधा मिथ्याज्ञानं भवति । मिथ्याज्ञानबाधे एव मम इदं मिथ्याज्ञानम् आसीदित्येवं ज्ञानं भवत्यस्माकम् । इदं मिथ्याज्ञानं भ्रम इति उच्यते । दर्शनशास्त्रेषु भ्रमविषये महती चर्चा समुपलभ्यते । ख्या-धातोः स्त्रियां भावे क्तिन् प्रत्यये ख्यातिशब्दः निष्पद्यते । रज्जौ सर्पज्ञानं, शुक्तौ रजतज्ञानं, मरुमरीचिकायां जलज्ञानं वा ख्यातिरिति पदेन उच्यते । यद्यपि ख्यातिशब्दः नानार्थबोधकः तथाप्यत्र ख्यातिशब्दस्तु भ्रमीयप्रतीतिमेव बोधयति । वादस्तु विचार एव । अर्थात् ख्यातिवादो नाम भ्रमज्ञानस्वरूपविचारः । दर्शनशास्त्रे ख्यातिशब्दः भ्रमे भासमानवस्तुनः ज्ञाने रूढः । दार्शनिकाः भ्रमे भासमानवस्तुनः स्वरूपविषये विविधमतानि उपस्थापयन्ति । शोधोऽयं ख्यातिमूलः । अत्र आलोचनायां प्रमाप्रत्यक्षं तद्विपर्ययं च प्रतिपादयन्नेष ख्यातिशब्दो व्यावहारिकस्य भ्रमस्यैव स्वरूपं पुरःसारयन् तत्त्वानुसन्धाने सहायीभवति । तत्र बह्वीषु ख्यातिषु सतीष्वपि विज्ञानवादीयात्मख्यातिः, सौगतीयासत्ख्यातिः, प्राभाकरीयाख्यातिः, नैयायिकानामन्यथाख्यातिः, अद्वैतिनामनिर्वचनीयख्यातिः चैताः पञ्च ख्यातयः प्रसिद्धिं गताः । तासां मतवैषम्यकारणात् खण्डनमण्डनक्रमः प्रचलति ।

---

***सम्पर्कसूत्रम्** - 7407825561 , Email - ghoshaniruddha69@gmail.com

## शून्यशब्दस्य तात्त्विकस्वरूपनिरूपणम्

सौगतानुरागिषु चतुर्षु शून्यवादिनः माध्यमिका एव असतख्यातिमामनन्ति । वस्तुतः आत्मख्यातिनिरूपणवेलायां प्राक् यथा सम्यग्ज्ञानस्य स्वरूपज्ञानमपेक्षते तथैव असतख्यातिप्रतिपादनावसरेऽपि शून्यवादस्य तथा च शून्यस्वरूपस्य आकाङ्क्षा जायते इति शून्यवादः आदौ प्रस्तूयते । शून्यशब्दस्तु माध्यमिकानां पारिभाषिकशब्दः । शून्यवादे शून्यस्य तात्त्विकार्थनिरूपणे विदुषां मतवैषम्यं परिलक्ष्यते । शून्यशब्दस्य प्राथमिकार्थानुधावने यद्यपि अभावः इत्यर्थ आयाति । किन्तु माध्यमिकानां मौलिकग्रन्थानुशीलनेन शून्यस्य अभावरूपः अर्थः ग्रहीतुं न शक्यते । तत्र तु शून्यम् उपनिषदुक्तं ब्रह्म इवानुभवस्य विषयोऽपि न भवति । नागार्जुनाचार्यस्य मते प्रतीत्यसमुत्पादनीतेः अनिर्वाया परिणतिः भवति शून्यवादः- 'यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे'[1] इति । तत्र सर्वेषां पदार्थानां पूर्णरूपेण प्राप्तिर्भवति । आधारभूतः कश्चन पदार्थोऽवश्यमेव स्वीकार्यः यं विना वस्तुसिद्धिर्न भवति । शून्यं हि किञ्चन तत्त्वम् । चतुर्विधकोटिभिः तस्य निर्वचनं न सम्भवति । यतो हि सविशेषवस्तुन एव निर्वचनं सम्भवति न तु निर्विशेषवस्तुनः । तदेव श्लोक्यते-

न सन् नासन् न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः[2] ॥ इति ।

अर्थात् शून्यम् अभावो भवितुं नार्हति, अभावस्य सापेक्षत्वात् । शून्यं ह्येकं निरपेक्षं तत्त्वम् । एतत् शून्यं सर्वश्रेष्ठमपरोक्षं तत्त्वं भवति । तेषां नये नानारूपात्मकप्रपञ्चः शून्यस्य विवर्तो भवति । किञ्च अस्य जगतः कारणरूपेण सर्वज्ञः ईश्वरः नास्ति । अपि तु शून्यमेव तत्त्वम् अविद्यारूपिण्या मायया जगद्रूपेण आभासते । तेषां हीनयानानां मते मोक्षः खलु कर्मणस्तथा संकल्पस्य क्षये सम्भवति । संकल्पस्य कारणं भवति प्रपञ्चः । प्रपञ्चस्य निरोधस्तु शून्यतायाः सार्विकज्ञानेन सम्भवति । अतश्शून्यता हि मोक्षोपयोगिनी । प्रपञ्चश्च शून्यतायाः ज्ञानेन निरुध्यते । प्रपञ्चस्तु वस्तूपलब्धये जायते । अनुपलब्धौ च वस्तुनि प्रपञ्चस्य जन्म न भवति । यथा बन्ध्यापुत्राभावात् सन्तानकामुकस्य तस्मिन् रूपलावण्ये कामादीनामुत्पत्तिर्न भवति ।

शून्यवादानुसारेण बाह्यपदार्थोऽपि सत्यं न, आन्तरपदार्थोऽपि सत्यं न, विज्ञानमपि सत्यं न । केवलं शून्यमेव सत्यं परमतत्त्वमिति संसाधितम् । तेषां शून्यवादिनां मतानुसारेण सत्यं द्विविधमस्ति- सांवृत्तिकं पारमार्थिकञ्च । लोकव्यवहारे प्रचलितं सत्यं व्यावहारिकं सांवृत्तिकं वा उच्यते । पारमार्थिकं सत्यं तु अनुत्पन्नम्, अनिरुद्धम्, अनुच्छेद्यम्, अशाश्वतं च भवति । संवृत्तिर्नाम आच्छादनक्रिया । अर्थात् सांवृत्तिकं सत्यं भवति आच्छाद्यमानम् । आच्छादनं च अविद्यया जायते । अविद्यया यदा अन्यत् तत्त्वम् आच्छाद्यते, तदा व्यावहारिकसत्यस्य उदयो भवति । पुनश्च शून्यवादिभिरियं संवृत्तिः द्वेधा विभज्यते- तथ्यसंवृत्तिः मिथ्यासंवृत्तिश्चेति । पदार्थानां यथार्थज्ञाने तथ्यसंवृत्तिर्जायते किञ्च अयथार्थज्ञाने सति मिथ्यासंवृत्तिः जायते । अनयोः संवृत्त्योर्माध्यमेन गृहीतं ज्ञानमेव सांवृत्तिकं भवति । एतत्सांवृत्तिकं ज्ञानमेव पारमार्थिकसत्यस्य साधनमप्यस्ति । व्यावहारिकसत्येनैव

[1] मध्यमकशास्त्रम्, सम्पा.- श्रीपरशुरामशर्मा, पृ. २१९ ।
[2] माध्यमिककारिका, १/७


ISSN : 2320-740X

पारमार्थिकसत्यस्य बोधो जायते। मतेऽस्मिन् शुक्तिरूप्यादिभ्रमीयविषयाः शून्यरूपेणैव पर्यवस्यन्ति। तत्र बाह्यविज्ञानं यथा अत्यन्तमलीकं वर्तते, तद्वत् आन्तरविज्ञानमपि असदात्मकं भवति। अतः शुक्तिरजतव्यवहारेऽत्यन्तासद्रजतमेव प्रतीयते। यद्येवं सर्वमसद् भवति तदा विश्वप्रपञ्चस्य उपलब्धिः कथं जायेत इति जिज्ञासायां जायमानायां शून्यवादिनः उत्तरन्ति यत् प्रपञ्चस्य सांवृत्तिकप्रतीतौ अविद्याजनितं सकलं वस्तु सद्रूपेण प्रतिभाति। तेषां सिद्धान्ते विज्ञानवादिनां विज्ञानमपि मिथ्या इति। तत्र ते युक्तिं प्रदर्शयन्ति- ज्ञानं विषयमाश्रयति, विषयाकारञ्च भवति। यदि तत्र विषयः एव असत्, तर्हि विषयाकारं यज्ज्ञानं भवति तदपि मिथ्यैव स्यात्। एवं ज्ञेयवस्तु, ज्ञाता, ज्ञानं, अधिष्ठानं, आरोप्यवस्तु, तस्य आरोप्यवस्तुनो ज्ञानम् इति सर्वेषामेव असद्रूपा प्रतीतिर्भवति, केवलमेकस्य मिथ्यात्वस्वीकारे। असत्प्रतीतेः सर्वं मिथ्या इति बोधो जायते। तदा सर्वं शून्यमिति प्रतीतिः जायते। एवं जगति विद्यमानाः ज्ञातृज्ञेयज्ञानादयः सर्वे विषयाः शून्यतायां पर्यवसिताः भवन्ति। सर्वेषां वस्तुजातानां शून्यतायां पर्यवसानादेव माध्यमिकानां वादोऽयं शून्यवादः असद्वादो वेति नाम्ना प्रसिद्धो जातः।

वस्तुतः माध्यमिकाः शून्यवादं द्वारं कृत्वा बाह्यजगत् पूर्णतः प्रतिषेधितवन्तः। शून्यशब्दस्य अयं प्रतिषेधार्थस्तु आभिधानिकः। किन्तु पारिभाषिकार्थः क्रियते चेत्तदा अवर्णनीयः अनिर्वाच्यः वा इत्येवमर्थो लब्धव्यः। व्यवहारे असद्वस्तूनामुपलब्धिः भवत्येव। किन्तु तेषां वस्तूनां तात्त्विकं स्वरूपं हि 'शून्यम्' इति विज्ञायते।

**असत्ख्यातिनिरूपणम्**

ख्यातिरियं नास्तिकाधारभूतैः बुद्धानुसर्तृभिः ऊरीक्रियते। सौगतानुरागिषु चतुर्षु शून्यवादिनः माध्यमिका एव असत्ख्यातिमामनन्ति। शुक्तौ इदं रजतमिति अप्रमात्मके ज्ञाने पुरःस्थशुक्तिः यथा असत् तथा भासमानं रजतमपि असदित्येव तेषां राद्धान्तः। अन्यत्र अन्यधर्माध्यासः इत्यस्य ते एवमर्थं ज्ञापयन्ति यत् असतः शुक्तौ असतः रजतस्य धर्माध्यासः इति। अधिष्ठानभूते शुक्तौ रजतस्य असत्त्वात् शुक्तौ शुक्तिविपरीतधर्मस्य रजतस्य आरोपः अध्यासः। एतादृशविपरीतधर्मस्य कारणम् अविद्या। अविद्यया पूर्वसंस्कारवशात् रजतादिभ्रमः जायते। शुक्तौ रजतस्य सत्ता नास्ति। सत्ताभावः एव असत्त्वम्, अधिष्ठानभूता शुक्तिः आरोप्यं रजतञ्चोभयमेव असद्। ज्ञेयः विषयः ज्ञानस्य निरूपको भवति। अतः ज्ञेयस्य मिथ्यात्वे ज्ञानस्यापि मिथ्यात्वं वक्तव्यम्। भ्रमस्थले आरोप्यस्य यथा मिथ्यात्वं तथा अधिष्ठानस्यापि मिथ्यात्वमेव अङ्गीकुर्वन्ति माध्यमिकाः। शुक्तौ रजतप्रतिभासिज्ञाने योऽर्थः सद्रूपेण प्रतिभासते स विचार्यमाणे न सद्रूपेण तिष्ठति। अर्थात् शुक्तौ सद्रूपेण प्रतिभासमानायाः शुक्तिकायाः ज्ञानं न भवति अपि तु असदात्मकस्य रजतप्रकारकस्य ज्ञानं भवति। अधिष्ठानभूतायां शुक्तौ रजतस्यासत्त्वात् रजतप्रतिभासो विपरीतकल्पनामात्रम्। तदेव उक्तं- 'शुक्तौ इदं रजतम् प्रतिभासेऽस्मिन् वस्तुस्वरूपो ज्ञानस्य धर्मोऽर्थस्य वा। न प्रथमः, अहमाकारप्रतीतिरभावाद् बहिः इदम्रूपेण प्रतीयमानत्वाच्च। न द्वितीयः, अर्थक्रियासाफल्यरहितत्त्वादुत्तरकाले बाधकज्ञानसद्भावाच्च। अतः इदं रजतम् इति ज्ञाने असदेव प्रतिभासते'[१]।

[१]न्यायकुमुदचन्द्रः, सम्पा. श्रीमत्प्रभाचन्द्राचार्यः, पृ. ६०।

शून्यवादिनां मते सर्वं पदार्थजातं शून्यं, तस्मान्न कस्यापि पदार्थस्य सद्रूपेण प्रतीतिः भवति। इदं समग्रं विश्वं अध्यासरूपं, पुनः कथं भ्रमज्ञानमसत्व्यातिर्न स्यात्। आकाशकुसुमवदसत्प्रतिभासकल्पनापि नोचिता, असतः प्रतिभासासम्भवाद्, भ्रान्तिवैचित्र्याभावप्रसङ्गाच्च। असत्व्यातिवादे नार्थगतं नापि ज्ञानगतं वा वैचित्र्यं सम्भवति येनानेकप्रकारा भ्रान्तिर्भवेत्।

शून्यवादिषु केचन बौद्धाः वदन्ति यत्- यत्किञ्चित् वस्तुजातं दृष्टिगोचरं भवति तत् सर्वं न सत्, नापि असत्। एतादृशं मध्यपन्थानम् अनुस्रियमाणाः शून्यवादिनः बौद्धाः माध्यमिकाः इत्याख्यां लभन्ते। तत्र बौद्धाचार्यः नागार्जुनः *मध्यान्तविभागशास्त्रे* उक्तवान् यत्-

न शून्यं नापि चाशून्यं तस्मात् सर्वं विधीयते।
सत्त्वादसत्त्वात् सत्त्वाच्च मध्यमा प्रतिपच्च सा[1]॥

नागार्जुनः मूलमध्यमकारिकाग्रन्थे शून्यमेव एकमात्रं सत्यमित्युक्तवान्। तन्मते प्रतीयमानवस्तु व्यवहारदृष्ट्या सत्यं वर्तते। अस्य कापि तात्त्विकोत्पत्तिर्नास्ति। व्यावहारिकदशायां प्रतीयमानवस्तूनि यद्यपि सत् तथापि पारमार्थिकदृष्ट्या तु तानि असदेव। तेषां मते आत्मा शून्यम्। न केवलम् आत्मा अपि तु दृश्यमानं जगदपि शून्यमेव। यस्य स्वरूपं कथमपि निर्धारयितुं न शक्यते तमेव माध्यमिकाः शून्यमित्याचक्षते। शून्यं हि यन्न सत्, नासत्, न सदसत् इत्यनुभयात्मकम्, न च सदसद्भिन्नमित्यनुभयात्मकमपि न। एतेभ्यः चतुर्भ्यः कोटिभ्यः विर्निमुक्तं भवति शून्यम्। तेषां नये सांसारिकं व्यवहारजातं वस्तुसकलम् एतादृशशून्यस्वरूपं भवति। व्यवहारदशायां प्रतीयमानवस्तूनां किमपि स्वरूपं निर्धारयितुं न शक्यते। तदेव लङ्कावतारसूत्रे कथ्यते-

न सन्नासन्न सदसत् सदा लोकं प्रपश्यति।
तदा व्यावर्तते चित्तं नैरात्म्यं चाधिगच्छति[2]॥

शून्यवादिबौद्धानां मते प्रतीयमानस्य दृश्यविषयस्य किमपि अस्तित्वं नास्ति इति तत्त्वं यदा तत्त्वार्थी अनुभवति तदा कल्पनाप्रसूतस्य प्रपञ्चस्य उपशमो भवति। प्राचीनाः कथयन्ति यत् सांवृत्तिकसत्यता व्यावहारिकवस्तूनां स्वभावः नास्ति। सा तु स्वभावशून्यता इत्युच्यते। अतः चतुष्कोटिविनिर्मुक्तपरमशून्यतायामेव असतः प्रकाशः। वस्तुतः शून्ये असतः ख्यातिरेव असत्व्यातिर्नाम। अत्र नव्यशून्यवादिनः कथयन्ति यत् शून्ये असतः ख्यातिर्न असत्व्यातिः, अपि तु असति असतः ख्यातिरेव असत्व्यातिरिति। शून्यताशब्दस्य ते असत् तुच्छं वेति अर्थं कुर्वन्ति। दृश्यमानं जगत् उत्पत्तेः पूर्वम् असत् आसीत्, उत्पत्यनन्तरम् अर्थात् स्थितिकाले तथा च नाशानन्तरमपि असदेव स्थास्यति। आदौ अन्ते च यद्वस्तु असत् स्थितिकालेऽपि तत् असदेव भवति इत्येव नियमः। आदावन्ते च यन्नास्ति वर्तमानेऽपि तत् तथा इति वचनबलात् स्पष्टं यत् उत्पत्तिविनाशक्षणे यद्वस्तु असद्रूपेण तिष्ठति स्थितिकालेऽपि तदसदेव भवतीति। अतः नव्यशून्यवादिनां मते- जगति यत्किञ्चिद्वस्तु प्रतिभातं भवति तत् सर्वं खलु असत्। तस्मात्तेषां विचारे पुरतो दृश्यमाना प्रत्यक्षज्ञानलब्धा शुक्तिका असदात्मिकैव भवति। एवञ्च यदा कश्चित् शुक्तिकायां

[1] मध्यान्तविभागशास्त्रम्, सम्पा. स्वामी द्वारिकादासशास्त्री, पृ. २८।
[2] सद्धर्मलङ्कावतारसूत्रम्, सम्पा. श्रीशीतांशुशेखरवागचि, पृ. ६२।


ISSN : 2320-740X

किञ्चिचाकचिक्यादिगुणप्रादुर्भावात् तां शुक्तिकां पूर्वदृष्टरजतरूपेण गृह्णाति तदा तस्य स्मरणोद्भूतं यद्रजतज्ञानं भवति तत्र तद्रजतमपि असदेव । अर्थात् असच्छुक्तिकायाम् असतः रजतस्य यद्भानं भवति तदसच्छुक्तिकायाम् असतः रजतस्य भ्रम एव । नवीनाः तमेव भ्रमं असत्ख्यातिनाम्ना प्रलपन्ति । एतेषां नव्यानाम् असत्ख्यातिदृष्ट्या अयं भ्रमः केशोण्डूकः इव निरधिष्ठेयो भवति । शुक्तिकायां रजतभ्रमस्थले रजतं यथा असत् तथा शुक्तिकापि असत् । शून्यमेव शुक्तिकारूपेण भ्रमितं भवति । तत्र भ्रान्तशुक्तिका असत् । तस्याम् असदात्मिकायां शुक्तिकायां रजतस्य भ्रमो जायते, रजतमपि तत्र असत् । अतः नव्यमाध्यमिकाः असत्ख्यातिं निरधिष्ठानभ्रमः इति आख्यायन्ते । प्राचीनमाध्यमिकाः प्रतीयमानस्य जगतः तात्त्विकस्वरूपं विश्लेषयितुम् असत्ख्यातिं प्रतिपादयामासुः । अन्यत्र नव्याः व्यावहारिकं भ्रममेव असत्ख्यातिरूपेण परिगणितवन्तः । प्राचीनानां मते असत्ख्यातिः स्वाधिष्ठानभ्रमः ।

ज्ञेयस्य ज्ञानस्य ज्ञातुर्वा आत्यन्तिकतया असत्त्वम् इति सर्वस्यापि असत्त्वे पर्यवसानात् इयं ख्यातिः असत्ख्यातिरिति प्रसिद्धो जातः । अधिष्ठानभूते शुक्तौ रजतस्य असत्वात् शुक्तौ शुक्तिविपरीतधर्मस्य रजतस्य आरोप अध्यासः । एतादृशविपरीतधर्मस्य कारणम् अविद्या । अविद्यया पूर्वसंस्कारवशात् रजतादि भ्रम उत्पद्यते । शुक्तौ रजतस्य सत्ता नास्ति । सत्ताभावः एव असत्त्वम्, अधिष्ठानभूता शुक्तिः आरोपितं रजतञ्चेति उभयमपि असदेव ।

यस्मिन् ज्ञाने यत् प्रतिभासते तदेव तस्याऽलम्बनमिति स्वीकरणे प्रश्नः समुदेति यत्- भ्रमज्ञाने प्रतिभासमानं वस्तु ज्ञानात्मकं भवत्युत अर्थात्मकम्? न हि भ्रमज्ञाने प्रातिभासिकं वस्तु ज्ञानात्मकं भवितुमर्हति, यतस्तस्य ज्ञानात्मकत्वे, ज्ञानं स्वमेव तथारूपेण गृह्णातीति भ्रमप्रत्ययः अहं रजतमित्येवं भवेद्, तथा सति आत्माश्रयदोषः जायते । न तु प्रतिभासमानं वस्तु अर्थात्मकं रजतमिति ग्रहीतुं शक्यते, तस्मान्न चैवमनुभव इत्यर्थात्मकमेव तदालम्बनमङ्गीकर्तव्यम् । अथ च भ्रमज्ञानस्य विषयीभूतः स बाह्यार्थो नैव सत्, तत्साध्याया अर्थक्रियायास्तत्राऽभावात् । अतः पारिशेष्याद् भ्रमस्थले वयमसत एव बाह्यार्थस्य बोधं कुर्महे इत्युररीकरणीयम् । इयमेव असत्ख्यातिः उच्यते ।

माध्यमिकाः सर्वमपि शून्यमसदात्मकं निःस्वभावम् इत्यनुमिन्वन्ति । ते प्रथमतः सर्वेषां व्यावहारिकीं सत्तां स्वीकृत्य तानि परीक्षन्ते, अन्ततश्च तेषां सर्वेषां पारमार्थिकमसत्त्वं प्रदर्श्य तद्ग्राहकानां निखिलानां ज्ञानानां वैपरीत्यं समुद्घोषयन्ति । पारमार्थिकदृष्ट्या तु निर्विकल्पकज्ञानादृते सर्वाण्यपि सविषयकज्ञानान्यसद्ग्राहकत्वेन भ्रमात्मकान्येव । ज्ञानेषु यो भ्रान्ताभ्रान्तविवेको भवति, स तु केवलं व्यावहारिकसत्तामूलकः ।

वस्तुतो माध्यमिकानां दृष्टौ शुक्तेरसत्त्वात्, तत्र शुक्तिज्ञानं भवेद् रजतज्ञानं वा, उभयस्याऽसदालम्बनत्वेन भ्रमत्वमेव । तर्हि व्यवहारजगति उभयोः सत्ता कथमङ्गीक्रियते? तदुच्यते असत्प्रकाशनशक्तिमत्या अनादिवासनायास्तयोरुद्भवः । अनादिवासनोद्भूतं वस्तु यदाकारेण वर्तते तस्य तदाकारेण ज्ञानं न भूत्वा तद्भिन्नान्याकारेण ज्ञानं भवति चेत् तज्ज्ञानं भ्रमः इत्याख्यायते । यथा- शुक्तेः तद्विपरीतप्रत्ययेन रजताकारेण ज्ञानं भवति, तस्मात् शुक्तौ रजतज्ञानं भ्रमः कथ्यते । अन्यत्र यदा सम्यक्संवादकमसत्प्रकाशनं भवति, तदा व्यावहारिकसत्यत्वपरीक्षया सा प्रमा उच्यते । यथा- घटज्ञानं हि अनादिवासनायाः उत्पन्नम् अविसंवादात्मकं ज्ञानम् । यतो हि असत्प्रकाशनशक्तिसहकारात्मिका बुद्धिः पुरतो दृश्यमानस्य

घटपदार्थस्य कम्बुग्रीवादिसदृशं यादृशम् आकारं गृह्णाति तस्य तादृशरूपमेव प्रकाशयति । परमार्थतस्तु सर्वज्ञानानि भ्रम एव । पारमार्थिकदृष्ट्या जाग्रदवस्थायां प्रतीयमानं वस्तुशकलं स्वप्ने दृष्टवस्तुवदसद् भवति । स्वापकाले यदि 'मम पुरतः भूतपिशाचादयः सन्ति' इत्येवंरूपं ज्ञानं भवति तदा भीतेः अस्माकं रोदनादिकम् आगच्छति । वस्तुतस्तु स्वप्ने दृष्टवस्तूनां सत्ता व्यवहारिकदृष्ट्या नैव वर्तते, सा तु प्रतिभासते केवलम् । स्वप्नावस्थायां यथा असत्पदार्थाः सद्रूपेण प्रकाशन्ते तद्वत् विज्ञानमपि असत्पदार्थान् सदात्मकत्वेन प्रकाशयति ।

काचकमलादिदोषदूषितलोचनस्य पुरोवर्तिना असदात्मना शुक्तिद्रव्येण संसर्गात् उद्बोधितरजतसंस्कारसहिता असद्रूपा शुक्तिः असद्रूपेण रजताकारेण प्रतिभासते । बाधकज्ञानकाले असदेवेदं रजतमभात् इत्याकारः प्रत्यक्षानुभवः एव भ्रमस्थले असतः रजतस्य ज्ञाने प्रमाणम् । असतः प्रत्यक्षो न सम्भवति । भ्रमस्थले पुरोवर्तिनं रजततया पश्यामि इति अनुभवात् रजतपुरोवर्तिवस्तुनोः समवायप्रतीतिर्भवतीति सर्वैर्ज्ञायते । शुक्त्यनुयोगिकरजतत्वप्रतियोगिकः यः समवायः स न सत्, यतो हि तयोः तादात्म्यं नास्ति । अतः आरोप्याधिष्ठानयोः सम्बन्धः असदेवेति । यदा शुक्तौ रजतस्य आरोपो भवति तदा शुक्तिः रजतस्य अधिष्ठानं, रजतं च आरोप्यमिति । अधिष्ठानं शुक्तिः, आरोप्यं रजतम्, शुक्तिरजतयोः सम्बन्धः चैतत्त्रयमेव असदिति । शुक्तौ अत्यन्तस्य असतः रजतस्य कल्पनात् ख्यातिरियम् असत्ख्यातिरित्युच्यते ।

## तत्र दोषाः, तत्परिहारश्च

नैयायिकाः माध्यमिकानाम् एतन्मतं न सहन्ते । तत्र तार्किकैः असत्ख्यातेः दृक्कोणतः कल्पकोटिद्वयमुपस्थाप्यते । किं भ्रमात्मकम् असत् ज्ञानम् असदात्मना गृह्णाति इत्यसद्विषयकः प्रथमकल्पः ग्रहणीयः उत सदेव इतरसदात्मना गृह्णाति, सतश्च इतरसद्रूपेण असत्त्वादसद्विषयकः द्वितीयकल्पः ? तत्र प्रथमः कल्पः ग्रहीतुं न शक्यते । यतो हि इदं रजतमिति अप्रमात्मके ज्ञाने रजतात्मना असत्त्वमेव यदि विषयः, तर्हि रजतार्थिनः कथं शुक्तौ प्रवृत्तिः, न पुनः रजताभावे इति जिज्ञासा जायते । तदा उच्यते, अत्र रजतात्मना अभावो न विषयः । किञ्च यदि शुक्तिरेव रजतात्मना असदिति तदाकारतया शुक्तिं विषयीकरोति तदा तु इष्टापत्तिर्जायते, अन्यथाख्यातावेव पर्यवसानात् ।

ननु केयमसत्ख्यातिर्नाम इत्यत्रापि पक्षद्वयं कल्पितम् । किं सर्वत्रावर्तमानस्य प्रतीतिरेव असत्ख्यातिरुत देशान्तरादौ विद्यमानस्यात्रासतः प्रतीतिरिति ? नाद्यः कल्प्यते, यतो हि सर्वत्राविद्यमानस्य पुनः प्रतीत्यसम्भवात्, बन्ध्यापुत्रादेर्न खलु प्रतीतिः सम्भवति । द्वितीयः पक्षस्तु अन्यथाख्यातावेव पर्यवस्यति । देशान्तरे विद्यमानस्य देशान्तरे प्रतीतिर्हि अन्यथाख्यातिर्नाम इति ।

## उपसंहृतिः

ख्यातिशब्दः प्रतीत्यर्थे भ्रमज्ञानार्थे वा प्रयुज्यते । भ्रमज्ञानविषये भारतीयानां वैमत्यं दरीदृश्यते । पञ्च ख्यातीः व्यतिरिच्य अपि बह्व्यः ख्यातयः सन्ति । ताः अपि भ्रमज्ञानस्वरूपमेव प्रदर्शयन्ति ।

शुक्तौ रजतदर्शनं किं सत्यमुत मिथ्या इति विकल्पद्वारा तस्य प्रातिभासिकं स्थानं कल्पितं भवति । तद्वत् अयं प्रपञ्चः व्यावहारिकसत्तावान् चेदपि ब्रह्मज्ञानानन्तरं स्वप्नवद् मिथ्यैव प्रतिभाति । शुक्तौ


ISSN : 2320-740X

जायमानरजतप्रतीतिवत् ब्रह्मणि सर्वं जगदपि अध्यस्तं भवति ।

अत्र प्रपञ्चे भ्राम्यमाणानां मनुष्याणां भ्रमज्ञानविचारः आवश्यकः । मिथ्याज्ञानस्य मिथ्यात्वेन उपलब्धिर्भवति चेदेव मिथ्याज्ञानबाधः भवति । मिथ्याज्ञानस्य च नाशे सत्यं पूर्णरूपेण प्रकाशते । एवं प्रपञ्चोऽयं भ्रम एव । अस्य मिथ्यात्वेन यदा ज्ञानं भवति तदा एव सत्यस्वरूपम् अद्वयं ब्रह्म पूर्णसत्यरूपेण प्रकाशते ।

## सन्दर्भग्रन्थसूची


१. अनन्तश्रीस्वामिकरपात्रः । वेदार्थपारिजातः । सम्पा. पण्डितपट्टाभिरामशास्त्री । वाराणसीः वेदशास्त्रानुसन्धानकेन्द्रम्, १९७९ ।

२. आनन्दबोधभट्टारकः । न्यायमकरन्दः । सम्पा. स्वामिबलराम उदासीन माण्डलीका । वाराणसीः चौखम्बा संस्कृत बुक डिपो, १९०१ ।

३. कालीप्रसादसिंहः । शाङ्करवेदान्ततत्त्वमीमांसा । वाराणसीः विश्वविद्यालयप्रकाशनम्, १९८२ ।

४. धर्मकीर्तिः । न्यायबिन्दुः । सम्पा. आचार्य श्रीचन्द्रशेखरशास्त्री । वाराणसीः चौखम्बा संस्कृत सीरिज, २०११ ।

५. नारायणभट्टः । मानमेयोदयः । वाराणसीः, षड्दर्शनप्रकाशनप्रतिष्ठान, १९७८ ।

६. नागार्जुनः । मध्यमकशास्त्रम् । सम्पा. श्रीपरशुरामशर्मा । दारभाङ्गा, मिथिलाविद्यापीठम्, १९६० ।

७. बुद्धिष्ट लजिक । सम्पा. एफ. शेरवात्सकरीर । न्यु ईअर्कः डोभार पाबलिकेशन, १९६५ ।

८. माधवाचार्यः । सर्वदर्शनसंग्रहः । सम्पा. प्रो. उमाशंकरशर्मा । वाराणसीः चौखम्बा विद्याभवन । सम्पा. खेमराजश्रीकृष्णदासमहोदयः । मुम्बईः, १९६२ ।

९. श्रीगोकुलनाथः । वादावलिः । सम्पा. भट्टश्रीरमानाथशर्मा । बृहन्मन्दिरपुष्टिमार्गसिद्धान्तकार्यालयः, १९७६ ।

१०. श्रीमच्छालिकनाथमिश्रः । प्रकरणपञ्चिका । सम्पा. श्रासुब्रह्मण्यशास्त्री । वाराणसीः काशीहिन्दूविश्वविद्यालयः, १९६१ ।

११. श्रीमत्प्रभाचन्द्राचार्यः । न्यायकुमुदचन्द्रः । सम्पा. पण्डितनाथूरामः प्रेमी । मुम्बईः, माणिकचन्द्र जैन ग्रन्थमाला, १९७२ ।

१२. श्रीमद्विद्यारण्यमुनिः । विवरणप्रमेयसंग्रहः । सम्पा. करुणासिन्धुदासः । कलकाता श्रीबलरामप्रकाशनी, २००६ ।

१३. सद्धर्मलङ्कावतारसूत्रम् । सम्पा. सीतांशुशेखर वागचि । बौद्धसंस्कृतग्रन्थावलीः, १९६३ ।




# सांख्ययोगप्रत्यभिज्ञादर्शनानां तत्त्वसिद्धान्तमीमांसा

हरिप्रिया तिरुनगरि
शोधच्छात्रा, संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
नवदेहली

***लेखसारः*** *- दर्शनं दर्शननाम्ना कथं कथ्यते? दर्शनम् इत्यस्य वास्तविकार्थः अन्तःकरणेन बुद्ध्या साक्षात्कारः। साक्षात्कारः कस्य इति प्रश्ने सति उच्यते मूलतत्त्वस्य। भारतीयदर्शनानि दुःखस्य आधारशिलायां प्रतिष्ठितानि, अतएव दुःखनिवारणाय उपायान्वेषणे रतानि यथा दुःखस्य निरोधार्थं दुःखकारणस्य ज्ञानमावश्यकम् एवं दुःखस्य कारणम्, सुखस्य कारणम्, बन्धस्य कारणम्, जगतः कारणम्, मोक्षस्य कारणं किं, एतेषां सुखदुःखबन्धमोक्षाणां भोक्ता कः इति आत्मनः परमात्मनः जिज्ञासायां चरैवेति चरैवेति इत्युपदेशेन मनुष्यः एतेषां सर्वेषां कारणभूतं मूलकारणं साक्षात्करोति मुक्तिमाप्नोति च। किं नाम तत्वम् इति चेत् समाधीयते कारणभूतस्य जडवस्तुनः चेतनवस्तुनश्च मूलस्वरूपम्। तस्य भावः स्वभावः एव तत्त्वमित्यभिधीयते। मूलस्वरूपज्ञानं मोक्षकारकं भवति अर्थात् यस्य ज्ञानं मोक्षकारकं तत्तत्त्वमिति उच्यते। अत एव तानि तत्त्वानि प्रत्येकं दर्शनं तत्तद्दर्शनकारैः भिन्नानि प्रतिपादितानि। तेषां विचारः एव तत्त्वमीमांसा इति कथ्यते। भारतीयदर्शनपरम्परायां तत्त्वमीमांसा अत्यन्तमहत्त्वपूर्णं स्थानमधितिष्ठति। यतो हि कस्यापि दर्शनस्य मूलाधारः तस्य तत्त्वविचारः एव भवति। नामरूपात्मकस्य जगतः स्वरूपं, जीवस्य सत्ता, बन्धमोक्षयोः कारणं, परमतत्त्वस्य स्वरूपं च तत्त्वमीमांसायामेव प्रतिपादिताः भवन्ति। न्यायदर्शनादारभ्य वेदान्तपर्यन्तं सर्वेषु दर्शनेषु स्वस्वदृष्ट्या तत्त्वानां निरूपणं दृश्यते। न्यायदर्शने तु* ***प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः।***[1] *इति गौतममहर्षिणा षोडशतत्त्वानि प्रतिपाद्य तेषां ज्ञानादेव निश्रेयसप्राप्तिः उक्ता। एवमेव सांख्यदर्शने प्रकृतिपुरुषाभ्यां सह २५ तत्त्वानां विचारः, पातञ्जलयोगे पुरुषप्रकृति-पुरुषविशेषरूपेश्वरेण सह २६ तत्त्वानां प्रतिपादनं, प्रत्यभिज्ञादर्शने आशिवाद् पृथिवीपर्यन्तं ३६ तत्त्वानां प्रतिपादनं च कृत्वा एतेषां तत्त्वानां यथार्थज्ञानेन मोक्षसिद्धिः प्रतिपाद्य तत्त्वमीमांसायाः महत्त्वमेव महर्षयः प्रकाशयन्ति। वस्तुतः तत्त्वज्ञानं विना न बन्धस्य यथार्थज्ञानं सम्भवति, न च मोक्षस्य। अतः भारतीयदर्शनपरम्परायां तत्त्वमीमांसा दार्शनिकचिन्तनस्य मेरुदण्डरूपा परिगण्यते।*

*सांख्ययोगतत्त्वानां तु विचारः बहुत्र दृश्यते परं प्रत्यभिज्ञादर्शनस्य तत्त्वविचारः न्यूनप्रायः एव। प्रत्यभिज्ञादर्शने शिवतत्त्वात् माया मायायाः पञ्चकञ्चुकानि अतिरिच्य अन्यानि तत्त्वानि सांख्यतत्त्वसमान्येव दृश्यन्ते। पत्रेऽस्मिन् सांख्ययोगतत्त्वानां प्रत्यभिज्ञादर्शनस्य तत्त्वानां साम्यवैषम्यविचारः करिष्यते अन्यच्च परमतत्त्वविमर्शः जगत्स्वरूपविचारः बन्धमोक्षविचारः च करिष्यते।*

***कूटशब्दाः*** *- तत्त्वम्, पुरुषः, प्रकृतिः, ईश्वरः, परमशिवः, शक्तिः, माया*

---

***सम्पर्कसूत्रम्** - 8099809503, Email- Hptirunagari@gmail.com

[1] न्यायसूत्र १.१

**सांख्यतत्त्वसिद्धान्तः**

भारतीयदर्शनपरम्परायां सांख्यदर्शनं प्राचीनतमेषु दर्शनेषु अन्यतमं वर्तते । अस्य प्रवर्तकत्वेन महर्षेः कपिलस्य नाम उल्लिख्यते । सांख्यदर्शनस्य प्रमुखोद्देश्यः दुःखत्रयनिवृत्तिपूर्वकं पुरुषस्य कैवल्यप्राप्तिरस्ति । एतदर्थं सांख्याचार्यैः जगतः, जीवस्य तथा मोक्षस्य यथार्थस्वरूपं तत्त्वमीमांसायाः माध्यमेन निरूपितम् । सांख्यदर्शनस्य सम्पूर्णा दार्शनिकव्यवस्था पञ्चविंशतितत्त्वसिद्धान्ते प्रतिष्ठिता दृश्यते । सांख्यदर्शने प्रकृतिपुरुषयोः स्वातन्त्र्येण सत्ता स्वीकृता अस्ति । एषः सिद्धान्तः प्रकृतिपुरुषद्वैतवाद इति कथ्यते । प्रकृतिः त्रिगुणात्मिका, जडा तथा जगदुपादानकारणरूपा स्वीकृता, पुरुषश्च चेतनः, द्रष्टा, साक्षी तथा निष्क्रियः प्रतिपादितः । प्रकृतिपुरुषयोः संयोगेनैव सृष्टिप्रक्रिया प्रवर्तते इति सांख्यमतम् । सांख्यदर्शनस्य तत्त्वमीमांसायाः मूलाधारः पञ्चविंशतितत्त्वसिद्धान्तः । एतेषु तत्त्वेषु प्रकृतिः मूलकारणरूपेण स्वीकृता अस्ति । तस्याः विकासक्रमेण महदहंकारतन्मात्रमहाभूतेन्द्रियादितत्त्वानामुत्पत्तिः भवति । प्रकृतिः सत्त्वरजस्तमोगुणानां साम्यावस्थारूपा जगदुपादानकारणं वर्तते । यदा गुणसाम्यस्य वैषम्यमुपजायते तदा सृष्टिप्रक्रिया प्रवर्तते । प्रकृतिः यद्यपि जगदुपादानकारणरूपेण स्वीकृता, तथापि पुरुषसन्निधिं विना सा प्रवृत्तुं न शक्नोति । पुरुषस्य चैतन्यसन्निधौ एव प्रकृतेः गुणसाम्यभङ्गः सम्पद्यते तथा महदादितत्त्वानां विकासक्रमः प्रवर्तते । अतः सांख्यमते प्रकृतिपुरुषसंयोग एव सृष्टेः मूलकारणमिति मन्यते- **पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥**[1] सः सर्गः एवं भवति-

सर्वप्रथमं प्रकृतेः महत्तत्त्वस्य आविर्भावः भवति । महत्तत्त्वं बुद्धिरित्यपि कथ्यते, या निश्चयाध्यवसायात्मिका अस्ति । महतः अहंकारस्य उत्पत्तिः भवति । अहंकारः 'अहम्' इति अभिमानस्य मूलाधारः अस्ति । अहंकारात् द्विविधः सर्गः प्रवर्तते । सात्त्विकाहंकारात् एकादशेन्द्रियाणामुत्पत्तिः भवति, तामसाहंकारात् पञ्चतन्मात्राणां उत्पत्तिः, राजसाहंकारश्च उभयोरुत्पत्तौ सहकारिकारणत्वेन तिष्ठति । पञ्चतन्मात्रेभ्यः क्रमशः पञ्चमहाभूतानि जायन्ते । एवं प्रकृतेः आरभ्य पृथिवीपर्यन्तं चतुर्विंशतितत्त्वानां विकासः सम्पद्यते । एतेषां चतुर्विंशतितत्त्वानां साक्षिरूपेण, भोक्तृरूपेण च पुरुषः स्वीकृतः । पुरुषः न कर्ता, न विकारी, न च गुणात्मकः ; अपितु शुद्धचैतन्यस्वरूपः, उदासीनद्रष्टा च मन्यते । एवं २५ तत्त्वानि – पुरुषः, प्रकृतिः महत्, अहंकारः, ५ ज्ञानेन्द्रियाणि ५ कर्मेन्द्रियाणि, मनः ५ तन्मात्राणि, ५ महाभूतानि। **प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः । तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि ॥**[2]

**पुरुषस्वरूपम्** सांख्यदर्शने पुरुषः शुद्धचैतन्यस्वरूपः, नित्यः, विभुः, अकर्ता, असङ्गः तथा द्रष्टामात्रः स्वीकृतः । सः न कदापि विकारमापद्यते, न च गुणत्रयस्य विषयः भवति । सुखदुःखमोहादयः सर्वेऽपि धर्माः प्रकृतेरेव, न तु पुरुषस्य । तथापि अविवेकवशात् पुरुषः प्रकृतिविकारैः सह तादात्म्यं गृह्णाति, येन संसारबन्धः प्रवर्तते । **तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥**[3] अनेन पुरुषस्य साक्षित्वं, द्रष्टृत्वं, अकर्तृत्वं च प्रतिपाद्यते । सांख्यमते पुरुषाः

[1]सांख्यकारिका २१
[2]सांख्यकारिका २२
[3]सांख्यकारिका १९

अनेकास्सन्ति, प्रत्येकः पुरुषः स्वतन्त्रचैतन्यरूपेण स्वीकृतः । प्रकृतिपुरुषयोः विवेकज्ञानमेव मोक्षस्य अथवा कैवल्यस्य साधनं मन्यते ।

सांख्यदर्शने बन्धस्य मूलकारणम् अज्ञानमिति स्वीकृतम् । अज्ञानवशात् पुरुषस्य प्रकृतिविकारैः सह तादात्म्यं मन्यते, सः बुद्धेर्विकाराणां भोक्तृत्वेन प्रतीयते । यदा तत्त्वज्ञानजन्या विवेकख्यातिः उत्पद्यते, तदा प्रकृतिपुरुषयोः भेदज्ञानं सम्पद्यते । तस्याः विवेकख्यातेः प्रभावेण प्रकृतिः पुरुषार्थसम्पादनानन्तरं निवर्तते, पुरुषस्य च कैवल्यावस्था सिद्ध्यति अर्थात् यदा विवेकख्यातिरुत्पद्यते तदा प्रकृतिः "दृष्टाऽहमनेन पुरुषेण" इति कृतकृत्येव निवर्तते । तस्मिन् सति पुरुषस्य कैवल्यं सिद्धमिति सांख्यैः प्रतिपाद्यते- **दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या**।[1] एवं प्रकृतिरेव पुरुषसंसर्गेण सृष्टिरचनां कृत्वा स्वयमेव बध्यते स्वयमेव पुरुषं स्वस्मात् भेदं दर्शयित्वा विवेकख्यातिमाप्त्वा स्वयमेव निवर्तते मुच्यते च । पुरुषः अकर्तृत्वात् केवलं द्रष्टा भवति- **तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् । संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥**[2]

**योगदर्शनतत्त्वसिद्धान्तः**

पातञ्जलयोगदर्शनं सांख्यदर्शनस्य तत्त्वमीमांसामधिकृत्य साधनापक्षस्य विकासं करोति। अतः योगदर्शनेऽपि प्रकृतिपुरुषद्वैतवादः तथा पञ्चविंशतितत्त्वस्वीकारः दृश्यते। तथापि ईश्वरस्वीकारात् योगदर्शनं सेश्वरसांख्यमित्यपि कथ्यते।**सूक्ष्मविषयत्वं चाऽऽलिङ्गपर्यवसानम्**[3] इत्यस्य व्यासभाष्ये सविचारनिर्विचारसमापत्त्योः विषयभूतानां सूक्ष्मतत्त्वानां क्रमशः निरूपणं कृतम् । तत्र स्थूलमहाभूतेभ्यः आरभ्य तन्मात्राणि, ततः अहङ्कारः, महत्तत्त्वं, अन्ते च अलिङ्गरूपा प्रकृतिः इति क्रमः प्रतिपादितः । अयं क्रमः सांख्यदर्शने प्रतिपादितेन तत्त्वविकासक्रमेण पूर्णतया साम्यं धारयति- **पार्थिवस्याणोर्गन्धतन्मात्रं सूक्ष्मो विषयः। आप्यस्य रसतन्मात्रम्। तैजसस्य रूपतन्मात्रम्। वायवीयस्य स्पर्शतन्मात्रम्। आकाशस्य शब्दतन्मात्रमिति। तेषामहङ्कारः। अस्यापि लिङ्गमात्रं सूक्ष्मो विषयः। लिङ्गमात्रस्यापि अलिङ्गं सूक्ष्मो विषयः। न चालिङ्गात्परं सूक्ष्ममस्ति ।**[4] एतदनन्तरं पुरुषस्य सूक्ष्मत्वविषये चर्चा अपि क्रियते तत्र। अनेन व्यासभाष्येऽपि सांख्यप्रसिद्धतत्त्वक्रमस्यैव स्वीकारः दृश्यते। अतः योगदर्शनस्य तत्त्वमीमांसा मूलतः सांख्यदर्शनानुगामिनी इति वक्तुं शक्यते ।

यथोक्तं तत्त्वज्ञानादेव मोक्षः इति तदेव योगदर्शने एवमुच्यते तत्त्वानां स्वकारणे लयः केवलं प्रलयकाले एव न भवति, अपितु साधकस्य विवेकख्यातिप्राप्तौ अपि तस्य अनुभवः क्रमेण सम्पद्यते। यदा योगी चित्तवृत्तिनिरोधेन विवेकज्ञानमधिगच्छति, तदा तस्य बोधः स्थूलविषयेभ्यः सूक्ष्मतत्त्वेषु, सूक्ष्मतत्त्वेभ्यश्च कारणतत्त्वेषु क्रमशः प्रवर्तते। एष एव प्रतिप्रसवक्रमः कथ्यते। अस्मिन् क्रमे महाभूतानि तन्मात्रासु, तन्मात्राण्यहङ्कारे, अहङ्कारो महति, महत् प्रकृतौ च लीयते इति तत्त्वानां कारणावस्थायां प्रत्यावर्तनं चिन्त्यते। अन्ततः प्रकृतिपुरुषयोः विवेकज्ञानात् कैवल्यसिद्धिः भवति- **पुरुषार्थशून्यानां**

[1]सांख्यकारिका ६१
[2]सांख्यकारिका ६२
[3]योगसूत्र १.४५
[4]योगसूत्र १.४५ व्यासभाष्य


ISSN : 2320-740X

**गुणानां प्रतिप्रसवः कैवल्यम् ।**[1]

**ईश्वरतत्वम्** - सांख्यदर्शनात् भिन्नतया पातञ्जलयोगदर्शने ईश्वरस्य स्पष्टस्वीकारः दृश्यते। योगसूत्रकारः ईश्वरं पुरुषविशेषरूपेण निरूपयति—

**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।**[2]

अयं पुरुषविशेषः अविद्यास्मितारागद्वेषाभिनिवेशरूपक्लेशैः, कर्मभिः, तेषां विपाकैः कर्मफलैः तथा संस्काररूपवासनाभिश्च कदापि न स्पृश्यते। अतः सः नित्यशुद्धः, सर्वज्ञः, अनादिगुरुः च स्वीकृतः। यथा पुरुषस्य मुक्तेः प्राक् बन्धनस्थितिः दृश्यते न तथा ईश्वरस्य। ईश्वरः तु सदैव मुक्तः यत्र ऐश्वर्यस्य सर्वज्ञतायाः च पराकाष्ठा भवति। अत्र योगशास्त्रं सांख्यदर्शनं न खण्डयति अपितु ईश्वरः इति पुरुषस्य प्रकारविशेषमेव सूचयति-**तथा चेश्वरस्य पुरुषे अन्तर्भावस्तदुपाधेः प्रधान इति भावः ।**[3] सः ईश्वरः कालातीतः सन् कालेन अवच्छेन्नानां गुरूणाम् अपि गुरुः इति प्रतिपाद्यते। सः पुरुषविशेष ईश्वरः ओङ्कारशब्दवाच्यः। तस्य ओङ्कारस्य जपेन तस्यार्थभावेन च योगी चित्तैकाग्रतया व्याधिस्त्यानादिविघ्ननिवृत्तिपूर्वकं स्वस्वरूपं साक्षात्करोति। असम्प्रज्ञातसमाधेः शीघ्रप्राप्तये उपायानां प्रतिपादनसमये ईश्वरस्य चर्चा क्रियते यत् **ईश्वरप्रणिधानाद्वा**[4] भक्तिविशेषेण प्रसन्नीकृतस्य ईश्वरस्य संकल्पमात्रेण अनुग्रहेण योगी असम्प्रज्ञातसमाधिं शीघ्रमाप्नोति इति। एवं योगशास्त्रस्य तत्त्वविचारः।

**प्रत्यभिज्ञादर्शनतत्त्वसिद्धान्तः**

काश्मीरशैवदर्शनस्य प्रमुखेषु सम्प्रदायेषु प्रत्यभिज्ञादर्शनं दार्शनिकदृष्ट्या विशेषमहत्त्वमधिगच्छति। अस्य दर्शनस्य मूलप्रतिपाद्यविषयः जीवस्य स्वशिवस्वरूपस्य पुनः प्रत्यभिज्ञानम् अर्थात् स्वात्मनि विद्यमानस्य शिवत्वस्य साक्षात्कारः प्रत्यभिज्ञा। अयं सम्प्रदायः द्वैतद्वैताद्वैतअद्वैतवादेषु शिवाद्वयवादस्य प्रतिनिधित्वं करोति, यत्र परमशिवः सर्वस्य विश्वस्य मूलाधारः, कारणम् तथा स्वरूपं च इति प्रतिपाद्यते। प्रत्यभिज्ञामते विश्वं न परमशिवात् पृथगस्तित्वयुक्तं वस्तु, अपि तु तस्य स्वातन्त्र्यशक्तेः क्रमिकावभासमात्रमेव परिगण्यते। प्रत्यभिज्ञाशास्त्रस्य व्यवस्थितप्रतिपादनं आचार्यसोमानन्देन कृतम्। तेन विरचिते 'शिवदृष्टि' ग्रन्थे अस्य दर्शनस्य मूलसिद्धान्ताः प्रतिपादिताः सन्ति। तदनन्तरम् आचार्यउत्पलदेवेन 'ईश्वरप्रत्यभिज्ञाकारिका' इति ग्रन्थे प्रत्यभिज्ञादर्शनस्य दार्शनिकाधारः सुदृढीकृतः। अभिनवगुप्ताचार्येण तस्य विस्तृतव्याख्यानं कृत्वा प्रत्यभिज्ञादर्शनं भारतीयदार्शनिकपरम्परायां विशिष्टं स्थानमापादितम्।

अस्य दर्शनस्य तत्त्वमीमांसायां परमशिवः परमतत्त्वरूपेण स्वीकृतः तथा तस्य स्वातन्त्र्यशक्तेः क्रमिकाविर्भावस्य व्याख्यानार्थं षड्त्रिंशत्तत्त्वव्यवस्था प्रतिपादिता दृश्यते। एषा तत्त्वव्यवस्था प्रत्यभिज्ञादर्शनस्य दार्शनिकसंरचनायाः मूलाधारभूता परिगण्यते। सांख्ययोगदर्शनयोः तत्त्वव्यवस्थायाः परिप्रेक्ष्ये प्रत्यभिज्ञादर्शनस्य तत्त्वयोजना अधिकव्यापिका, सूक्ष्मतरा तथा क्रमबद्धा इति प्रतिभाति। दर्शनेऽस्मिन्

---

[1]योगसूत्र ४.३४
[2]योगसूत्र १.२४
[3]योगवार्तिकम्
[4]योगसूत्र १.२३

३६ तत्त्वानि स्वीकृतानि ।

शिवः, शक्तिः, सदाशिवः/ सदाख्यः, ईश्वरः, सद्विद्या/शुद्धविद्या, माया, कला, विद्या, रागः, कालः, नियतिः, पुरुषः, प्रकृतिः, बुद्धिः, अहंकारः, मनः, ५ ज्ञानेन्द्रियाणि( घ्राण-रसना-चक्षु-स्पर्शन-श्रवणेन्द्रियाणि), ५ कर्मेन्द्रियाणि (वाक्हस्तपादपायूपस्थेन्द्रियाणि), ५ तन्मात्राणि (शब्दस्पर्शरूपरसगन्धाः), ५ महाभूतानि (आकाशवाय्वग्न्यापपृथिव्यः) षट्त्रिंशत्तत्त्वानि ।

एतानि तत्त्वानि शुद्धाध्व-अशुद्धाध्वभेदेन विभक्तानि सन्ति । शिवादारभ्य सद्विद्यापर्यन्तं शुद्धाध्वा इति कथ्यते यतः सद्विद्यातत्त्वपर्यन्तं परमशिवस्य पूर्णत्वे, सर्वज्ञत्वे, सर्वकर्तृत्वे च कश्चिदपि संकोचः न दृश्यते ; मायातत्त्वस्य उदये तु पञ्चकञ्चुकैः सह तस्य चैतन्यस्वातन्त्र्ये क्रमशः संकोचः प्रवर्तते, येन जीवभावस्योत्पत्तिः सम्भवति । एतेषां समस्ततत्त्वानां मूलाधारभूततत्त्वरूपेण परमशिव एव प्रतिष्ठितः । इदं विश्वं तस्य परमशिवस्य स्वातन्त्र्यशक्तेः प्रदर्शनलीलामात्रमेव । सः परमशिवः विश्वोत्तीर्णः विश्वमयश्चेत्युच्यते । सः विश्वोत्तीर्णत्वात् परमार्थतः साध्यरूपः, विश्वव्यापकत्वाच्च विश्वमयरूपेण साधनभूतः परिगण्यते । सः तस्य चितिशक्त्या विमर्शशक्त्या स्वभित्तौ एव विश्वं प्रकटीकरोति "**स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति**"[१] अर्थात् स्वस्मिन् पूर्वादेव प्रकाशरूपेण स्थितस्य जगतः विमर्शः भवति अत एव सः प्रकाशविमर्शात्मकः परमेश्वर इति प्रत्यभिज्ञाशास्त्रे प्रसिद्धः । विमर्शः इति पदं प्रत्यभिज्ञाशास्त्रे पारिभाषिकतया प्रयुज्यते । तेन केवलं प्रकाशमात्रं नाभिधीयते, अपि तु स्वप्रकाशस्य स्वयमनुभवरूपा चैतन्यचेतना बोध्यते अर्थात् परमसतः शुद्ध-आत्मचेतना यया सृष्टेः प्रकाशः, स्थितिः लयः स्वस्वरूपे प्रत्यागमनं भवति ।"**इह खलु परमेश्वरः प्रकाशात्मा । प्रकाशश्च विमर्शस्वभावः । विमर्शो नाम विश्वाकारेण, विश्वप्रकाशनेन, विश्वसंहरणेन अकृत्रिमाहमिति विस्फुरणम्** ।[२] अत्र प्रश्नः उदेति **चितिः स्वतन्त्रा विश्वसिद्धिहेतुः**[३]इति यदि शक्तिरेव विश्वसिद्धिहेतुत्वेन स्वीकृता, तर्हि जगतः कारणत्वं परमशिवस्य कथं स्वीक्रियते ?**विश्वस्य -सदाशिवादेः भूम्यन्तस्य सिद्धौ-निष्पत्तौ, प्रकाशने, स्थित्यात्मनि परप्रमातृविश्रान्त्यात्मनि संहारे , पराशक्तिरूपा चितिः भगवती स्वतन्त्रा अनुत्तरविमर्शमयी शिवभट्टारकाभिन्ना हेतुः कारणम्**[४] इति अस्य समाधानं प्रत्यभिज्ञादर्शने शिवशक्त्योः अभेदस्वीकारे निहितम् । प्रत्यभिज्ञाहृदयस्य द्वितीयसूत्रभाष्ये शिवभट्टारकात् शक्तिः अभिन्ना मन्यते । यतः शक्तिर्नाम शिवस्यैव स्वातन्त्र्यस्वभावा सत्ता, न तु तस्मात् पृथगस्तित्वमापन्ना काचिदन्या वस्तुसिद्धिः अत एव शक्त्या सम्पन्ना विश्वसृष्टिः वस्तुतः शिवस्यैव स्वातन्त्र्यप्रकाशनं भवति । तस्मात् शक्तेः विश्वसिद्धिहेतुत्वेऽपि परमशिव एव जगतः परमार्थकारणत्वेन स्वीक्रियते । परमशिवस्य विश्वमयरूपं सर्जनात्मकं वर्तते तदेव प्रथमतत्त्वं शिवतत्त्वम् इति कथ्यते । सः अनुत्तररूपपरमशिवः यदा स्वेच्छया जगत् स्रष्टुं स्पन्दते परमशिवस्य आद्यः स्पन्दरूपः शिवः इत्युच्यते-**यदयमनुत्तरमूर्तिर्निजेच्छयाखिलमिदं जगत्स्रष्टुम् । पस्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः ॥**[५]

[१]प्रत्यभिज्ञाहृदयम् २
[२]पराप्रवेशिका
[३]प्रत्यभिज्ञाहृदयम् १
[४]प्रत्यभिज्ञाहृदयम् १
[५]षट्त्रिंशत्तत्त्वसन्दोहः -१


ISSN : 2320-740X

सः शिवः सर्वेषु ३६ तत्त्वेषु चिदानन्दमयः विविक्ततया इच्छाज्ञानक्रियाशक्तिस्वरूपः च वर्तते - **तत्र शिवतत्त्वं नाम इच्छा-ज्ञान-क्रियात्मकः केवलपूर्णानन्दस्वभावरूपः परमशिव एव।**[१] यत्र समष्टितया इच्छाज्ञानक्रियाशक्तयः स्युः सः विश्वोत्तीर्णः परमशिवः ।

**शक्तिः-**

परमशिवस्य विश्वोन्मेषाभिमुखी स्वातन्त्र्यमयी इच्छा एव शक्तितत्त्वरूपेण व्यवह्रियते। अत एव इयं शिवस्य स्वातन्त्र्यशक्तिः इत्यपि ज्ञायते। इयमिच्छा शक्तिः जगद्रूपेण तस्य स्वस्वरूपस्यैव विस्तारः अस्ति। एषा सकलविश्वस्य बीजरूपा विश्वप्रकाशनस्य मूलाधारश्च परिगण्यते। - **इच्छा सैव स्वच्छा संततसमवायिनी सती शक्तिः। सचराचरस्य जगतो बीजं निखिलस्य निजनिलीनस्य॥**[२]अनया एव शक्त्या शिवात् इदं तत्त्वं प्रत्याहृत्य अहमेवावतिष्ठते। अस्यामवस्थायाम् आनन्दशक्तिः प्रधाना भवति

**सदाशिवः-**

यदि वयं संसारस्य उत्पत्तिं त्रिधा पश्यामश्चेत् यथा बीजरूपेण, अङ्कुरायमाणरूपेण, अङ्कुरितरूपेण। तर्हि शिवे बीजरूपे कथने सति सदाशिवतत्त्वम् अङ्कुरायमाणरूपं वर्तते- **अप्रतिहतेच्छत्वात् सदेवाङ्कुरायमाणम् इदं जगत् स्वात्मना अहन्तया आच्छाद्य इदं स्थितं रूपं सदाशिवतत्त्वम्**[३] सदाशिवतत्त्वादेव बाह्यजगद्रूपसत्तायाः आद्यावस्था दृश्यते। अस्यामवस्थायाम् अस्य स्वरूपं सम्पूर्णतया अहंभावेन आच्छादितं भवति अन्यच्च इदम् अर्थात् विश्वम् अव्यक्ततया अवभासते। यथा इति षड्त्रिंशत् तत्त्वसन्दोहे उदाह्रियते चित्रकारस्य मनसि चित्रलेखनात् पूर्वं चित्रम् अस्पष्टं भवति तथैव सदाशिवतत्त्वे इदन्तामयं विश्वम् अस्पष्टं भवति। अस्यामवस्थायाम् इच्छाशक्तेः प्राधान्यं प्रतिपाद्यते - **तत्र प्रोन्मीलितमात्रचित्रकल्पतया इदमंशस्य अस्फुटत्वात् इच्छाप्राधान्यम्...**[४]

**ईश्वरः-**

**अङ्कुरितं जगत्**[५]-यत्र जगत् अङ्कुरितं स्यात् अर्थात् इदमंशः अधिकतया स्फुटः भवति तत् ईश्वरतत्त्वमिति कथ्यते-**विश्वं पश्चात्पश्यन् इदन्तया निखिलमीश्वरो जातः।**[६] विश्वं स्पष्टमिदन्तारूपेण अवभासयन् ईश्वरतत्त्वं प्रादुर्भवति, अयं विश्वस्य प्रमेयस्य स्फुटतया उन्मेषः, अस्यामवस्थायां ज्ञानस्य प्राधान्यं भवति यथोक्तं -, **अत्र वेद्यजातस्य स्फुटावभासनात् ज्ञानशक्त्युद्रेकः...**[७]

---

[१]पराप्रवेशिका
[२]षड्त्रिंशत्तत्त्वसन्दोहः २
[३]पराप्रवेशिका
[४]षड्त्रिंशत्तत्त्वसन्दोहः ३
[५]पराप्रवेशिका
[६]षड्त्रिंशत्तत्त्वसन्दोहः ४
[७]षड्त्रिंशत्तत्त्वसन्दोहः ४

## शुद्धविद्या/सद्विद्या

यत्र अहन्ता-इदन्तायाः समत्वं भवति अर्थात् अहम् इदम् इत्येतयोः परामर्शः समानरूपतया स्फुटः भवति- **अहन्तेदन्तयोः ऐक्यप्रतिपत्तिः**[१] शिवतत्त्वे अहं परामर्शः, सदाशिवे अहमिदं परामर्शः, ईश्वरतत्त्वे इदमहं परामर्शः अर्थात् अत्र सर्वत्र एकस्य प्रमुखतया परामर्शः जायते परं शुद्धविद्यातत्त्वे अहमिदम्, इदमहमिति द्वयोः परामर्शः भेदाभेदविमर्शनात्मकः भवति अर्थात् यत्र भेदस्य स्फुरणेऽपि अभेददृष्टिः न निवर्तते, सा शुद्धविद्या इति कथ्यते ।**सा भवति शुद्धविद्या येदन्ताहन्तयोरभेदमतिः**[२] द्वैतप्रथा यया उत्पद्यते तया मायया अस्पृष्टा शुद्धा अतएव इयं शुद्धविद्या इति कथ्यते । अतः अत्र पर्यन्तं शुद्धाध्वा इतः अनन्तरं पृथिवीपर्यन्तं मायया अशुद्धत्वात् अशुद्धाध्वा इति उच्यते । अस्यामवस्थायां क्रियाशक्तेः प्राधान्यं भवति ।

## माया

इतः अशुद्धाध्वा प्रारभ्यते अर्थात् इतः परमशिवः एव स्वमायाशक्त्या स्वस्य स्वरूपं गोपयति, स्वशक्तिभ्यः परिमितो भवति । मायातत्त्वस्य मुख्यव्यापारः अहन्तायाः इदन्तायाश्च अभेदस्थितेः भेदप्रथानिर्माणमेव । सा माया अहन्तायाः इदन्तां, इदन्तायाश्च अहन्तां परस्परं व्यावर्तयित्वा सीमितदृष्टेः उदयकारिणी भवति अतएव उच्यते **स्वस्वरूपेषु भावेषु भेदप्रथा माया**[३]

**कला**- परमेश्वरस्य सर्वकर्तृत्वशक्तेः संकोचेन जीवस्य किञ्चित्कर्तृत्वावस्थायाः उत्पत्तिः कलाकञ्चुकस्य कार्यम् ।

**विद्या**- यया परमशिवस्य सर्वज्ञत्वं संकुचितो भूत्वा किञ्चिज्ञत्वे परिणमति सा विद्या

**रागः**- पूर्णस्वरूपेऽपि परमशिवस्य संकुचितावस्थायां विशेषवस्त्वभिलाषरूपा आसक्तिः रागकञ्चुकस्य स्वरूपम् ।

**कालः** - येन त्रिकालाबाधितः नित्यस्वरूपः परमेश्वरः संकुचितो भूत्वा भूतभविष्यत्वर्तमानकालेषु परिच्छिन्नो भवति सः कालः

**नियतिः**- सर्वव्यापकस्वातन्त्र्यस्य सीमाबद्धव्यवस्थारूपे परिणमनं नियतिकञ्चुकस्य व्यापारः ।

इमानि पञ्चतत्त्वानि परमेश्वरस्य स्वरूपाच्छादकत्वात् कञ्चुकानीत्युच्यन्ते **एतत् पञ्चकमस्य स्वरूपावरकत्वात् कञ्चुकमिति उच्यते.**[४]

## पुरुषः

अस्मिन् दर्शने यः परमशिवः मायया, तस्याः पञ्चकञ्चुकैः संकुचितो भवति तदा तस्य सार्वभौमज्ञानम् ऐश्वर्यमपि संकुचितं भवति तदा सः परिमितः सन् पुरुषः, जीवः, अणुः, पशुः, चित्तम् (**चितिरेव**

---

[१]- पराप्रवेशिका

[२]षट्त्रिंशत्तत्त्वसन्दोहः ४

[३]पराप्रवेशिका

[४]पराप्रवेशिका


ISSN : 2320-740X

**चेतनपदादवरूढा चेत्यसंकोचिनो चित्तम्)**[१]इत्यादिपदैः कथ्यते। उक्तमपि- **अविकार्यस्यापि तस्य चिदात्मनः स्वशक्तीनां संकोचनपुरस्सरं शक्तिदारिद्र्यमापन्नस्य अण्वपरपर्याया पुरुषसंज्ञा...**[२] एवं संकुचितशक्तिसम्पन्नः पुरुषः स्वस्वरूपविस्मृत्या परिमितात्मभावमापन्नः सन् नानायोनिषु संसारचक्रे परिभ्रमति। अज्ञाननिवृत्तिपूर्वकं यदा तु ज्ञानशक्तिपातादिभिः उपायैः स्वस्वरूपप्रत्यभिज्ञा जायते, तदा स एव पुरुषः शिवभावमाप्नोति।

**प्रकृतिः-**

बुद्धितत्त्वादारभ्य पृथिवीतत्त्वपर्यन्तस्य विकासक्रमस्य मूलकारणरूपा प्रकृतिः स्वीकृता। अत्र प्रकृतिः सत्त्व-रजस्-तमोगुणानां साम्यावस्था परिगण्यते। गुणानां पृथग्भावः नास्ति, किन्तु परस्परसंयुक्ततया एव सा प्रकृतिः व्यवस्थितेति मन्यते। **एषा च सत्त्वरजस्तमसां साम्यावस्था अविभक्तरूपा ...**[३]इयं शिवस्य शान्ताख्या शक्तिः वर्तते यत्र इच्छाज्ञानक्रियाशक्तीनां समष्टिः दृश्यते। साम्यावस्थायां स्थिता प्रकृतिः यदा असाम्या भवति तदा सृष्टेः प्रसरः जायते - **यत्प्रक्षोभात् प्राकृतिकसर्गस्य प्रसरः**[४]

**अहंकारः**

**अणोः रजः परिणामिनी इच्छाशक्तिः अहमित्यभिमानलक्षणा अहंकृतिः**[५] प्रकृतेः रजोगुणेन परिणतेच्छाशक्तिरेव अहंकारतत्त्वम्

सत्वगुणेन परिणता ज्ञानशक्तिरेव प्रमेयानाम् अध्यवसायात्मिका **बुद्धिः** इति कथ्यते। सा निश्चयकारिणी विकल्पानां प्रतिबिम्बधारिणी चास्ति। तमोगुणपरिणामिनी क्रियाशक्तिरेव विकल्पकर्ता **मनः** इति। स एव परमेश्वरः वामदेवादिपञ्चमूर्तित्वात् संकुचितो भूत्वा ज्ञानशक्तिप्रधानतया ज्ञानेन्द्रियाणां रूपेण क्रियाशक्तिप्रधानतया कर्मेन्द्रियाणां रूपेण संकुचितः भवति। तस्य शक्तिपञ्चकेन पञ्चतन्मात्राणि, तस्य एव अत्यन्तसंकुचिते, अचिद्रूपे भूते सति पञ्चमहाभूतानि भवन्ति। एतानि चतुर्विंशतितत्त्वानि सांख्यदर्शने प्रतिपादितैः तत्त्वैः प्रायशः साम्यमुपयान्ति। अतः प्रत्यभिज्ञादर्शनस्य तत्त्वयोजनायां सांख्यीयतत्त्वव्यवस्थाया अन्तर्भावो दृश्यते। एवं ३६ तत्त्वव्यवस्था दर्शिता।

**सांख्ययोगप्रत्यभिज्ञादर्शनानां तत्त्वविमर्शे तुलनात्मकविचारः**

अत्र दर्शनत्रयस्य साम्यपदानाम् अर्थात् पुरुषः, प्रकृतिः, ईश्वरः, इत्यादीनाम् अन्यच्च परमतत्त्वस्य, जगदुत्पत्तिकारणस्य बन्धमोक्षकारणस्य च तुलना करिष्यते।

---

[१]प्रत्यभिज्ञाहृदयम् ५

[२]षट्त्रिंशत्तत्त्वसन्दोहः ६

[३]पराप्रवेशिका

[४]षट्त्रिंशत्तत्त्वसन्दोहः १३

[५]षट्त्रिंशत्तत्त्वसन्दोहः १४

**सांख्ययोगप्रत्यभिज्ञादर्शनेषु पुरुषः**

**सांख्यदर्शने पुरुषः** शुद्धचैतन्यस्वरूपः, नित्यः, विभुः, अकर्ता, असङ्गः तथा केवलं द्रष्टामात्रः स्वीकृतः । सः न कदापि विकारमापद्यते, न च सृष्टिकर्मणि प्रवर्तते । प्रकृतेः सर्वे विकाराः भवन्ति, पुरुषस्तु केवलं साक्षिरूपेण तिष्ठति ।

**प्रत्यभिज्ञादर्शने तु पुरुषः** स्वतन्त्रं परमतत्त्वं न भवति, अपितु मायापञ्चकञ्चुकैः संकुचितः परमशिव एव । अतः प्रत्यभिज्ञामते पुरुषः सीमितचैतन्यरूपः जीवः, अणुः, पशुः, चित्तम् इत्यादिभिः पदैः व्यवह्रियते । तस्य सर्वज्ञत्वं, सर्वकर्तृत्वं, पूर्णत्वं च मायया तिरोहितं भवति ।

एवं सांख्ये पुरुषः नित्यशुद्धस्वतन्त्रचैतन्यरूपा परमार्थसत्ता, प्रत्यभिज्ञायां तु पुरुषः परमशिवस्य संकुचितावस्था इति मूलभेदः ।

**एवमेव ईश्वरतत्त्वविषयेऽपि उभयदर्शनयोः पर्याप्तो भेदः दृश्यते ।** योगदर्शने ईश्वरः पुरुषविशेषत्वेन प्रतिपाद्यते— क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः इति । सः न जगदुपादानकारणं न च सर्वतत्त्वमूलं मन्यते, अपितु नित्यशुद्धः सर्वज्ञः पुरुषविशेषः इति स्वीकृतः ।

प्रत्यभिज्ञादर्शने तु परमशिवः एव जगतः निमित्तोपादानकारणं, सर्वतत्त्वाधिष्ठानं, परमतत्त्वरूपेण च प्रतिष्ठितः । विश्वस्य सृष्टिस्थितिसंहारतिरोधानानुग्रहरूपाणि पञ्चकृत्यानि तस्यैव स्वातन्त्र्यशक्तेः प्रकाशरूपाणि मन्यन्ते ।

अतः योगदर्शने ईश्वरः मुक्तपुरुषविशेषः, प्रत्यभिज्ञादर्शने तु परमशिवः सर्वतत्त्वमयः परमार्थसत्यरूपः इति स्पष्टं भेदमवलोकयामः ।

**सांख्यदर्शने प्रकृतिः तथा प्रत्यभिज्ञादर्शने प्रकृतिः**

सांख्यप्रत्यभिज्ञादर्शनयोः प्रकृतितत्त्वस्य स्वरूपे कतिपयेषु स्थलेषु साम्यं दृश्यते। उभयत्रापि प्रकृतिः सत्त्वरजस्तमोगुणानां साम्यावस्थारूपा, जगद्विकासक्रमस्य मूलाधारभूता च स्वीकृता। बुद्ध्यहङ्कारतन्मात्रमहाभूतादीनां प्रादुर्भावस्य कारणत्वमपि उभयत्र प्रकृतेरेव प्रतिपाद्यते ।

तथापि प्रकृतेः तात्त्विकस्थितौ उभयदर्शनयोर्महान् भेदः प्रतीयते । सांख्यदर्शने प्रकृतिः पुरुषवत् अनादिरूपा स्वतन्त्रसत्ता इति परिगण्यते । सा पुरुषात् सर्वथा भिन्ना जडोपादानकारणरूपा सत्ता अस्ति । सृष्टेः समग्रः विकासक्रमः प्रकृतेरेव परिणामरूपः स्वीक्रियते ।

प्रत्यभिज्ञादर्शने तु प्रकृतिः न स्वतन्त्रं परमतत्त्वम्, न च परमशिवात् पृथग्भूता सत्ता। सा परमशिवस्य स्वातन्त्र्यशक्तेः संकोचक्रमे आविर्भूतं तत्त्वविशेषं मन्यते । मायातत्त्वस्य पञ्चकञ्चुकानां च अधः पुरुषस्य परिमितावस्थायां या त्रिगुणात्मिका शक्तिः जगद्विकासस्य कारणं भवति, सा प्रकृतिरिति कथ्यते । अत्र परमशिवस्य विश्वरूपविस्तारत्वात् प्रकृतिरपि तस्मात् पृथग्भूता काचिज्जडा सत्ता न भवति, अपितु चितिशक्तेः संकुचिताविर्भावरूपत्वात् परमार्थतः चेतनाधिष्ठाना स्वीकृता ।

अतः सांख्ये प्रकृतिः स्वतन्त्रपरमार्थसत्ता, प्रत्यभिज्ञायां तु परमशिवशक्तेः संकुचिताविर्भावविशेषः इति निष्कर्षः ।


ISSN : 2320-740X

## योगदर्शने ईश्वरः तथा प्रत्यभिज्ञायां ईश्वरतत्त्वम्

योगदर्शने ईश्वरः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः इति स्वीकृतः। प्रत्यभिज्ञादर्शने तु ईश्वरः षट्त्रिंशत्तत्त्वेषु एकं शुद्धतत्त्वम्, यत्र इदन्ताप्राधान्येन विश्वस्य स्फुटावभासः भवति। अतः योगस्य ईश्वरः पुरुषविशेषः, प्रत्यभिज्ञायाः ईश्वरतत्त्वं तु परमशिवस्य स्वातन्त्र्यशक्तेः अवस्थाविशेषः इति भेदः।

## परमतत्त्वविमर्शः

## पुरुषः (सांख्य-योगस्थः) तथा परमशिवः (प्रत्यभिज्ञा)

सांख्ययोगदर्शनयोः पुरुषः शुद्धचैतन्यस्वरूपः, निष्क्रियः, साक्षिमात्रः, अकर्ता च स्वीकृतः। सः केवलं द्रष्टा, भोक्ता च मन्यते। प्रत्यभिज्ञादर्शने तु परमशिवः केवलं साक्षी न, अपितु स्वातन्त्र्ययुक्तः, सर्वकर्ता, सर्वज्ञः, विश्वोत्पत्तिस्थितिलयकारणभूतः च स्वीकृतः। अतः सांख्ययोगयोः पुरुषः निष्क्रियचैतन्यरूपः, प्रत्यभिज्ञायां परमशिवस्तु सक्रियस्वातन्त्र्यमयचैतन्यरूपः इति मुख्यो भेदः।

## सांख्ययोगस्य प्रकृतिः तथा प्रत्यभिज्ञाशास्त्रस्य शक्तिः

सांख्ययोगे तु सृष्टेः मूलकारणभूता प्रकृतिः वर्तते प्रत्यभिज्ञायां सृष्टिप्रसरः शक्त्या जायते अतः तुलना आवश्यकी

सांख्ययोगदर्शनयोः प्रकृतिः जडा, अचेतना तथा पुरुषभिन्ना सत्ता स्वीकृता। प्रत्यभिज्ञादर्शने तु शक्तिः न जडा, न च शिवात् पृथग्भूता सत्ता। अपितु शिवस्य स्वातन्त्र्यमयी चैतन्यशक्तिः एव। अतः सांख्ययोगयोः जडप्रकृतिः, प्रत्यभिज्ञायां तु चेतनस्वरूपिणी शक्तिः इति मौलिकः भेदः।

अन्यच्च सांख्ययोगे महदहंकारौ समष्टित्रिगुणयुक्तप्रकृत्या उत्पद्येते मनस्तु सात्विकादहंकारात् परं प्रत्यभिज्ञायां अन्तःकरणत्रयमपि अर्थात् महदहंकारमनांसि त्रिगुणसमष्ट्या प्रकृत्या एव उत्पद्यन्ते।

## बन्धमोक्षकारणतुलना-

## प्रत्यभिज्ञादर्शने माया तथा योगदर्शने अविद्या

प्रत्यभिज्ञादर्शने माया परमशिवस्य अनन्तशक्तीनां संकोचकारिणी सत्ता स्वीकृता। तया अहन्ता-इदन्तयोः भेदप्रथा जायते। योगदर्शने तु अविद्या अनित्ये नित्यबुद्धिः, अशुचौ शुचिबुद्धिः, दुःखे सुखबुद्धिः, अनात्मनि आत्मबुद्धिः इति विपरीतज्ञानरूपा क्लेशविशेषः। उभयत्र बन्धकारणत्वं साम्यमस्ति, किन्तु प्रत्यभिज्ञायां माया तत्त्वविशेषः, योगे तु अविद्या मानसिकक्लेशविशेषः इति भेदः।

## कैवल्यप्रत्यभिज्ञयोः तुलना

सांख्ययोगदर्शनयोः मोक्षः कैवल्यनाम्ना प्रसिद्धः। तत्र प्रकृतिपुरुषविवेकजन्यभेदज्ञानात् पुरुषस्य स्वस्वरूपावस्थानं कैवल्यमिति कथ्यते। प्रत्यभिज्ञादर्शने मोक्षः कस्यचित् नूतनावस्थालाभः न, अपितु पूर्वसिद्धस्य शिवस्वरूपस्य पुनः प्रत्यभिज्ञानम्। अतः सांख्ययोगयोः मोक्षः विवेकजन्यकैवल्यरूपः, प्रत्यभिज्ञायामपि स्वस्वरूपप्रथनमेव मोक्षः अर्थात् स्वशिवत्वसाक्षात्काररूपा प्रत्यभिज्ञा इति।

## सन्दर्भग्रन्थसूची


१. सांख्यकारिका, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१८.

२. पातञ्जलयोगदर्शनम्, सुरेशचन्द्र श्रीवास्तवः, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२०१९.

३. प्रत्यभिज्ञाहृदयम्, जयदेवसिंहः, मोतीलाल बनारसीदास, देहली, २०१६

४. षट्त्रिंशत् तत्त्वसन्दोहः, राजानक आनन्दः(भाष्यकारः), काश्मीर संस्कृतग्रन्थावलिः, काश्मीर, श्रीनगर, १९१८.

५. पराप्रवेशिका, क्षेमराजः, ईश्वर आश्रम ट्रस्ट, श्रीनगरम्, काश्मीरम्, १९९६.




 ISSN : 2320-740X

# न्यायबिन्दुदिशा प्रत्यक्षलक्षणविमर्शः

श्री जीवन गराईः*
शोधच्छात्रः, रा.वि.शै.शो.सं.,
वेलुडमठः

***लेखसारः*** *– 'समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना'*[१] *इत्यस्य उपमेयकोटौ प्रमाणशास्त्रप्रक्षेपो नातिशयोक्तिमालम्बते । प्रमाणशास्त्रेषु अन्यतमो विद्यते आचार्यधर्मकीर्तिप्रणीतो न्यायबिन्दुः इत्याख्यो ग्रन्थः ।*

*सर्वे प्रेक्षावन्तः प्रवृत्तिप्रयोजनमन्विष्य प्रवर्तन्ते इति स्वभावः । पुरुषार्थसिद्धिः भवति प्रमाणशास्त्रे प्रवृत्तिकारणम् । पुरुषार्थसिद्धिश्च सम्यग्ज्ञाननिर्भरा । सम्यग्ज्ञानमेव प्रमाणम् भवति बौद्धप्रमाणशास्त्रे । अविसंवादकं ज्ञानं सम्यग्ज्ञानं प्रमाणम् इत्युच्यते । तदेवाह धर्मकीर्तिः – प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः२*[२] *इति । एवमत्रादौ प्रमाणस्वरूपं विविच्य प्रमाणभेदोऽपि निरूपितः संख्याविप्रतिपत्तिनिराकरणाय । प्रत्यक्षविषयो भवति स्वलक्षणम् । अनुमानविषयो भवति सामान्यलक्षणम् । अतः स्वलक्षणज्ञानाय प्रत्यक्षनिरूपणमत्यावश्यकम् इत्यतः प्रत्यक्षलक्षणम् प्रतिपादितमस्ति । तत्र प्रत्यक्षं कल्पनापोढम्*[३] *इत्यस्मिन् लक्षणवाक्ये कस्य विधेयत्वं कस्य वा अनुवादत्वम् इत्यत्र आचार्याणां विप्रतिपत्तयः प्रतिपादिताः । प्रत्यक्षशब्दस्य कः समासः – दिङ्नागोक्तः अव्ययीभावसमासः उत धर्मोत्तराचार्यप्रोक्तः तत्पुरुषसमासः इत्यत्र विचारः प्रस्तुतः । प्रत्यक्षशब्दस्य किं व्युत्पत्तिनिमित्तं किं च प्रवृत्तिनिमित्तम् इत्यपि विचारितम् । कल्पनापोढम् इत्यत्र कीदृशी कल्पना ग्रन्थकारेण विवक्षिता । तत्र तत्र स्थलेषु विनीतदेवाचार्येण सह धर्मोत्तराचार्यस्य वैलक्षण्यमपि प्रतिपादितम् । अभ्रान्तपदग्रहणस्य किं तात्पर्यमिति निरूपितम् । वस्तुतस्तु धर्मकीर्तिप्रोक्तं प्रत्यक्षलक्षणमिदं योगाचारनये उत सौत्रान्तिकनये इत्यपि युक्त्या तत्र शोधविषये प्रतिपादितमस्ति ।*

***कूटशब्दाः*** *– प्रमाणम्, लक्षणम् , प्रत्यक्षम् , कल्पना , समासः, योगाचारः, धर्मकीर्तिः ।*

**उपोद्घातः**

बौद्धाचार्यधर्मकीर्तिप्रणीतः न्यायबिन्दुः इत्याख्यः कश्चन प्रकरणग्रन्थो विद्यते । किमर्थमाचार्येण ग्रन्थस्यास्य रचना विहिता इति चेदुच्यते प्रमाणतत्त्वव्यवस्थापनार्थमिति । एवं प्रमाणशास्त्रविषयकोऽयं ग्रन्थः । वस्तुतः अयमेव आचार्यः धर्मकीर्तिः प्रमाणवार्तिकम् इति ग्रन्थं प्रणीतवान् । तत्रैव च सम्यग्ज्ञानात्मकस्य प्रमाणस्य व्युत्पादनात् पुनः अस्य ग्रन्थस्य लेखने किं तात्पर्यम् इति चेदुच्यते संक्षिप्तरुचीन् प्राज्ञान् अधिकृत्य इदं प्रकरणम् आचार्येण प्रणीतम् अस्ति । अर्थात् परिनिष्ठितसिद्धान्तानां संक्षेपेण प्रतिपादनार्थमेव इमं ग्रन्थं रचितवान् आचार्यः । तदेव दुर्वेकमिश्रः आह- "ननु वार्तिकादिनैव सम्यग्ज्ञानस्य व्युत्पादनात् कथमस्य न वैयर्थ्यमिति चेत् संक्षिप्तरुचीन् प्राज्ञान् अधिकृत्येदं प्रकरणं

---

***सम्पर्कसूत्रम्** - 8327009218, Email- jiban.gorai.vedvid@gmail.com

[१] १ वृत्तरत्नाकरे प्रथमोऽध्याये षष्ठं पद्यम् ।

[२] २ प्रमाणवार्तिकम्, तृतीया कारिका ।

[३] ३ न्यायबिन्दुः, पत्रसंख्या – ११ ।

प्रणीतमित्यदोषः"१[1] इति ।

**प्रमाणस्वरूपम्**

तत्र आदावेव प्रत्यक्षपरिच्छेदे 'सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्युत्पाद्यते'२[2] इत्यादिना ग्रन्थस्यास्य अभिधेयप्रयोजनाद्यनुबन्धादिकं पर्यालोच्य सम्यग्ज्ञानविषयिणीं चर्चां प्रारब्धवान् । तत्र तद् व्युत्पाद्यते इत्यत्र तदिति अभिधेयपदम्, अभिधेयश्च सम्यग्ज्ञानमिति । व्युत्पाद्यते इति प्रयोजनपदम् । सम्यग्ज्ञानस्य व्युत्पादनमेव प्रकरणस्यास्य प्रयोजनम् । बौद्धन्यायशास्त्रे सम्यग्ज्ञानमेव प्रमाणम् इत्युच्यते । इन्द्रियादेः प्रामाण्यमवधूय ज्ञानस्यैव प्रमाणतामभ्युपयन्ति बौद्धशास्त्रवेत्तारः । एवमत्र प्रमाणमपि ज्ञानात्मकं भवति, प्रमाणफलं प्रमा अपि ज्ञानात्मिका भवति । ज्ञानेन सह अर्थस्य सारूप्यं प्रमाणम् इत्युच्यते । सारूप्यं लक्षणं स्वभावो यस्य तत् सारूप्यलक्षणं प्रमाणं भवति । अर्थाधिगतिः अर्थप्रतीतिः प्रमाणफलम् इत्युच्यते ।

सम्यग्ज्ञानमेव प्रमाणम् इत्यत्र पूर्वपक्षिणाम् आक्षेपः– किमिदं सम्यक्त्वम् अभिप्रेतं ज्ञानस्य यद्योगात् सम्यग्ज्ञानमित्युच्यते । किं वस्तुनः ग्रहणं सम्यक्त्वम् उत गृहीतवस्तुनः प्रापणमिति । वस्तुग्रहणस्य सम्यक्त्वे अनुमानेन अवस्तुग्रहणात् तस्य असम्यग्ज्ञानत्वापत्तिः । यदि द्वितीयमुच्यते तर्हि अगृहीतप्रापणाद् न किञ्चित्सम्यग्ज्ञानं स्यात् इति पूर्वपक्षिणामभिप्रायो वर्तते । सिद्धान्ती वदति यत् – अविसंवादकत्वं सम्यक्त्वं विवक्षितम् इति । तदेवाह धर्मोत्तराचार्यः – 'अविसंवादकं ज्ञानं सम्यग्ज्ञानम्'३[3] इति । अविसंवादकं नाम संवादकमित्येव । विशब्दः अत्र संवादप्रतिषेधे वर्तते । तत्प्रतिषेधस्य विधिरूपत्वात् संवादक एवावतिष्ठत इति संवादकार्थः अविसंवादकशब्दः । तदा अयमर्थो भवति – अविसंवादकं प्रवृत्तिविषयवस्तुप्रापकं सम्यग्ज्ञानमिति ।

वृद्धव्यवहारो हि शब्दार्थनिश्चयभूमिः इति प्रसिद्धिः । तत्र च संवादकशब्दः उपदर्शितार्थप्रापके न वर्तते । तर्हि कुत्र वर्तते तदोच्यते सत्यवादिनि वर्तते । किन्तु ज्ञानस्य ताद्रूप्यं नास्ति । तर्हि कथं संवादकशब्दप्रयोगः तदोत्तरति लोके व्यवहर्तरि जने पूर्वमुपदर्शितमर्थं प्रापयन्संवादक उच्यते । तद्वद् ज्ञानमपि स्वयं प्रदर्शितमर्थं प्रापयन्संवादकमुच्यते । अत्र प्रापकत्वं नाम प्रदर्शिते अर्थे प्रवर्तकत्वमेव, नान्यत् किमपि । यतो हि ज्ञानम् अर्थमादौ जनयति तदनन्तरं प्रापयति इति न , अपि त्वादौ अर्थे पुरुषं प्रवर्तयति तदनन्तरम् अर्थं प्रापयति । किञ्च प्रवर्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वमेव । यतो हि ज्ञानं पुरुषं हठात् प्रवर्तयितुं न शक्नुयात् ।

एवं यत एव प्रवर्तकत्वमेव प्रापकत्वं किञ्च प्रवर्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वम् । अतः अर्थस्य प्राप्तिरेव प्रमाणफलं भवति । तदेवोक्तं धर्मोत्तराचार्येण – 'अर्थाधिगतिरेव प्रमाणफलम्'१[4]इति । अधिगते अर्थे एवं मन्यते यत् येन सम्यग्ज्ञानेन अर्थः प्रदर्शितः तेन प्रवर्तितः पुरुषः अर्थश्च प्रापितः । तथा अर्थस्य प्राप्तौ प्रमाणव्यापारः परिसमाप्यते । यतः अधिगमात् अन्यत्फलं नोपपद्यते, जाते च तस्मिन् व्यापारः परिसमाप्यते, अतः अनधिगतः नाम ज्ञानान्तरेणापरिच्छिन्नो विषयः यस्य तत् प्रमाणं भवति । अत

[1] १ धर्मोत्तरप्रदीपः, पत्रसंख्या – ३५ ।

[2] २ न्यायबिन्दुः, पत्रसंख्या – २ ।

[3] ३ न्यायबिन्दुटीका, पत्रसंख्या – १० ।

[4] १ न्यायबिन्दुटीका, पत्रसंख्या – ११ ।

 ISSN : 2320-740X

एवोक्तम् – अनधिगतविषयं प्रमाणमितिर[१]। अधिगतविषयं तु अप्रमाणं भवति ।

**संख्याविप्रतिपत्तिनिराकरणम्**

‘सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्युत्पाद्यते’ इत्यत्र व्युत्पाद्यते नाम विप्रतिपत्तिनिराकरणेन प्रतिपाद्यते इति । अधुना का अत्र विप्रतिपत्तिः यन्निराकरणेनेदं प्रतिपाद्यते । तदर्थमुच्यते विप्रतिपत्तिश्चात्र चतुर्विधा- संख्यालक्षणगोचरफलविषया इति । संख्याविप्रतिपत्तिस्तावत् प्रत्यक्षमित्येकमेव प्रमाणमिति चार्वाकाणाम् । एवम् अन्यानि अपि मतानि सन्ति तत्र तत्र दर्शनेषु । इमां संख्याविप्रतिपत्तिं निराकर्तुमाह – द्विविधं सम्यग्ज्ञानम्३[२] इति । द्वौ विधौ प्रकारौ अस्येति विगृह्णन् प्रयुक्तः विधशब्दः अत्र प्रकारवाची अस्ति । अत्रैवं नाशङ्कनीयं यत् विधशब्दो जातिवाचित्वात् प्रकारवाची न भवति । यतो हि तस्य अनेकार्थत्वात् प्रकारवाचिनः अपि प्रयोगस्य प्रायशो दृष्टत्वात् । यथा – ‘चतसृषु चैवंविधासु तत्त्वं परिसमाप्यते’४[३] इत्याचार्येण वात्स्यायनेन न्यायभाष्ये निगदितम् ।

पुनः शङ्का जायते यत् – लक्षणं यदि एकस्यैव अस्ति तदेकमेव प्रमाणं, यदि बहूनां तदा प्रमाणबाहुल्यं स्यादिति स्वभावतरेव विज्ञायते । लक्षणव्युत्पत्तेः सामर्थ्यात् संख्याविप्रतिपत्तिः निराकृता भवति, तर्हि किं पुनः पृथक् संख्याविप्रतिपत्तिनिराकरणेन इति । तदोच्यते संख्याप्रदर्शनेन व्यक्तिभेदो दर्शितो भवति । एवं व्यक्तिभेदे प्रदर्शिते प्रतिव्यक्तिनियतं सम्यग्ज्ञानलक्षणम् आख्यातुं शक्यं भवति, अप्रदर्शिते त्वशक्यं भवति । अतः आदौ संख्याभेदकथनं प्रतिव्यक्तिनियतलक्षणनिर्देशाङ्गत्वादेव । किं पुनस्तद् द्वैविध्यम् इत्याह – ‘प्रत्यक्षमनुमानम् च’१[४]१ इति । अत्र चकारः प्रत्यक्षानुमानयोस्तुल्यबलत्वं तुल्यसामर्थ्यं समुच्चिनोति । यथा अर्थाविनाभावित्वादर्थं प्रापयत्प्रत्यक्षं प्रमाणम् तद्वत् अर्थाविनाभावित्वाद् अनुमानमपि परिच्छिन्नमर्थं प्रापयत्प्रमाणमिति अर्थाव्यभिचारेणापि निमित्तेन समानेन भाव्यम् । अनेन ‘प्रत्यक्षमेकं प्रमाणम्’ इति ब्रुवाणश्चार्वाकः, ‘अनुमानादर्थनिश्चयो दुर्लभः, कनिष्ठं च तत्प्रमाणम्’ इत्याचक्षाणो मीमांसकश्च निरस्तः । अधुनोच्यते द्विविधमिति असत्यपि संख्याभेदप्रदर्शने तत् सम्यग्ज्ञानं प्रत्यक्षमनुमानं चेत्युक्ते अपि व्यक्तिभेदो दर्शितो भवत्येव । एवं सति लक्षणभेदाख्यानमपि सुकरं स्यादिति । अतः द्विविधशब्दप्रयोगस्य किं प्रयोजनमिति चेदुच्यते सिद्धे सतीदं वचनं नियमार्थमिति ।

**लक्षणविप्रतिपत्तिनिराकरणम्**

लक्षणविप्रतिपत्तिस्तु – इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्२[५] इति न्यायसूत्रकारः गौतमः । एवं अन्यानि अपि लक्षणानि विद्यन्ते । सम्प्रति लक्षणविप्रतिपत्तिं निराकर्तुम् आचार्यः धर्मकीर्तिः प्रत्यक्षलक्षणम् उक्तवान् – **तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम्**३ [६]इति । सप्तम्यर्थे विद्यमानः तत्रेति निर्धारणे वर्तते । जातिगुणक्रियासंज्ञाभिः समुदायात् एकदेशस्य पृथक्करणं निर्धारणम् । ततः एवं वाक्यार्थो भवति – तत्र नाम तयोः प्रत्यक्षानुमानयोः इति समुदायनिर्देशः । ततः प्रत्यक्षमिति एकदेशनिर्देशः । तत्र समुदायात् प्रत्यक्षत्वजात्या एकदेशस्य पृथक्करणं निर्धारणम् ।

[१]२ न्यायबिन्दुटीका, पत्रसंख्या – ११ ।
[२]३ न्यायबिन्दुः, पत्रसंख्या – १० ।
[३]४ वात्स्यायनभाष्यम्, पत्रसंख्या – ३।
[४]१ न्यायबिन्दुः, पत्रसंख्या – १० ।
[५]२ न्यायसूत्रम्, प्रथमोऽध्याये प्रथमाह्निके चतुर्थं सूत्रम् ।
[६]३ न्यायबिन्दुः, पत्रसंख्या – ११ ।

वैयाकरणदृष्ट्या एव निर्धारणविवेचनं कृतमस्ति अतः तदनुसारेण जातेः उल्लेखः अथवा प्रत्यक्षत्वादिकल्पितजात्या कथितम् अस्ति। यतो हि बौद्धमते जातिः सामान्यं वा परमार्थसद्वस्तु नास्ति। कल्पनया अपोढं रहितं यत् कल्पनापोढम् एवञ्च अविसंवादकात्मकं यत् अभ्रान्तं भवति तत् प्रत्यक्षमतित्युच्यते। एवं कल्पनास्वभावेन रहितं शून्यं सत् ज्ञानं यदभ्रान्तं तत्प्रत्यक्षमिति।

सम्प्रति लक्षणवाक्येऽस्मिन् कस्य विधेयत्वं कस्य वा अनुवादत्वमिति किञ्चित् प्रस्तूयते। प्रत्यक्षमिति संज्ञा कल्पनापोढत्वादिः संज्ञि, तेन संज्ञासंज्ञिसम्बन्धः प्रतिपाद्यते विनीतदेवाचार्येण। अपरेण व्याख्यातम् – 'प्रदेशान्तरप्रसिद्धयोः कल्पनापोढत्वाभ्रान्तत्वयोः अनुवादेन प्रत्यक्षत्वं विधीयते'४[1] इति, तदपि न भवेत् यतो हि कश्चन न्यायो वर्तते- 'प्रसिद्धे लक्ष्यलक्षणभावे लक्षणानुवादेन लक्ष्यं विधेयम् अप्रसिद्धे तु लक्षणवाक्येन लक्षणमेव विधेयम् न लक्ष्यम्' इति। तेनात्र प्रत्यक्षत्वानुवादेन कल्पनापोढत्वमभ्रान्तत्वं च विधीयते। अनेन पूर्वं प्रसिद्धस्य पश्चाच्छब्देनाभिधानम् अनुवादः इति दर्शयति।

**प्रत्यक्षसमासविचारः**

प्रत्यक्षमित्यत्र कः समासः – तत्रोच्यते तत्पुरुषः समासः। किं विग्रहवाक्यमिति चेत् – प्रतिगतम् अक्षमिति प्रत्यक्षम्। केन सूत्रेण इति चेत् – **अत्यादयः क्रान्ताद्यर्थे द्वितीयया१**[2]इति१ इति वार्तिकेण। वार्तिकार्थस्तु – क्रान्ताद्यर्थेषु विद्यमानानाम् अत्यादीनां निपातानां द्वितीयान्तेन समर्थेन सुबन्तेन नित्यसमासो भवति, स च समासः तत्पुरुषसंज्ञको भवति। प्रकृते प्रतिगतम् अक्षमिति लौकिकविग्रहः, अलौकिकविग्रहस्तु अक्ष अम् – प्रति। अत्यादिषु निपातेषु एकः निपातो भवति प्रति, अयं निपातः क्रान्ताद्यर्थेषु आश्रितत्वमित्यर्थे वर्तते। अतः प्रति इति निपातस्य अक्ष अम् इति द्वितीयान्तेन समर्थेन सुबन्तेन सह अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति वार्तिकेण नित्यतत्पुरुषसमासो भवति।

समासविधायके अस्मिन् वार्तिके अत्यादयः प्रथमानिर्दिष्टः, अतः तद्बोध्यस्य प्रति इत्यस्य उपसर्जनसंज्ञा भवति। ततः उपसर्जनं पूर्वम् इत्यनेन तस्य पूर्वनिपाते प्रति – अक्ष अम् इति जातम्। कृत्तद्धितसमासाश्च इत्यनेन समासस्य प्रातिपदिकत्वात् तदवयवस्य सुपः अम्प्रत्ययस्य सुपो धातुप्रातिपदिकयोः इत्यनेन लुकि प्रति अक्ष इति जातम्, ततः सन्धिकार्ये प्रत्यक्ष इति रूपम्। अस्य प्रातिपदिकत्वात् ततः विभक्त्युत्पत्तेः पूर्वं लिङ्गनिर्णयः कर्तव्यः। तत्रोच्यते अयं प्रत्यक्षशब्दः सर्वलिङ्गो वर्तते नाम त्रिषु लिङ्गेषु अयं प्रत्यक्षशब्दः वर्तते। कथम् अस्य सर्वलिङ्गता इति प्रश्नः यतो हि – परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः२[3] (द्वन्द्वतत्पुरुषयोः परपदस्यैव लिङ्गं भवति) इति समस्तेन प्रत्यक्षशब्देन प्रतिशब्दापेक्षया परस्थानस्थितस्य अक्षशब्दस्य लिङ्गपरिग्रहात् कथमस्य सर्वलिङ्गता अर्थात् केन अस्य परवल्लिङ्गनिषेधः इति प्रश्नः तदोच्यते – **द्विगुप्राप्तापन्नालंगतिपूर्वसमासेषु प्रतिषेधो वाच्यः** ३[4] इति वार्तिकेण। वार्तिकार्थस्तु द्विगुसमासे, पुनः प्राप्त-आपन्न-अलम् इत्येतेषु त्रिषु शब्देषु कश्चित् शब्दः यदि तत्पुरुषसमासस्य पूर्वपदे वर्तते तथा गतिसमासे परवल्लिङ्गतायाः निषेधः क्रियते। अत्र तु विशेष्यानुसारं लिङ्गं भवति। एवञ्च प्रकृते

[1]४ धर्मोत्तरप्रदीपः, पत्रसंख्या – ४१।
[2]१ वा. १३३६, सिद्धान्तकौमुदी, पत्रसंख्या – ९६।
[3]२ पा.सू. – २.४.२६।
[4]३ वा. १५४५, सिद्धान्तकौमुदी, पत्रसंख्या – ११९।


ISSN : 2320-740X

प्रत्यक्षशब्दस्य नपुंसकलिङ्गत्वे प्राप्ते प्रस्तुतेन वार्तिकेन गतिसमासे परवल्लिङ्गतानिषेधे विशेष्यानुसारेण सौ प्रक्रियाकार्ये प्रत्यक्षं ज्ञानम्, प्रत्यक्षा बुद्धिः, प्रत्यक्षो घटः इति प्रयोगाः भवन्ति ।

इदानीमुच्यते – यद्येवं समासः तर्हि कथमाचार्यदिङ्नागेन प्रमाणसमुच्चयग्रन्थे अक्षम् अक्षम् प्रति वर्तत इति प्रत्यक्षम् इत्युक्तम् । यतो हि अव्ययीभावपक्षे प्रत्यक्षो वृक्षः, प्रत्यक्षाः मृगाः चेत्यादयः प्रयोगाः न स्युः । तत्र आचार्यदुर्वेकमिश्रः धर्मोत्तरप्रदीपे उक्तवान् – तदर्थमात्रं कथितमित्यदोषः । एवम् अव्ययीभावपक्षोऽपि अदोषः एव, तत्र अर्थमात्रकथनम् अस्ति समासप्रदर्शनम् नास्ति । वस्तुतः अव्ययीभावसमासे तु प्रत्यक्षशब्दस्य नित्यनपुंसकलिङ्गत्वं भवति, तथा चेत् प्रत्यक्षा बुद्धिः प्रत्यक्षो घटः इत्यादिप्रयोगः न स्यात् । किन्तु गतिसमासे प्रत्यक्षशब्दस्य त्रिषु लिङ्गेषु प्रयोगः सम्भवति इति कृत्वा गतिसमास एव इष्टः ।

प्रत्यक्षमिति प्रतिगतम् आश्रितम् अक्षमिति तत्पुरुषसमासः उक्तः । अत्र आश्रितत्वं च जन्यतया न तु आधेयभावेन इति बोध्यम् । तथा च इन्द्रियजन्यत्वमित्यर्थः । इदम् प्रत्यक्षं चतुर्विधं भवति । ते च प्रकाराः – इन्द्रियज्ञानम् मनोविज्ञानम् स्वसंवेदनम् योगिज्ञानं चेति । प्रतिगतम् आश्रितम् अक्षमित्यस्यां व्युत्पत्तौ अक्षाश्रितत्वम् इत्यर्थो लभ्यते । तथा सति केवलं इन्द्रियविज्ञानस्यैव प्रत्यक्षवाच्यता स्यात्, मानस-स्वसंवेदन-योगिप्रत्यक्षाणां न स्यात् प्रत्यक्षवाच्यता । अतः उच्यते – अक्षाश्रितत्वं तु व्युत्पत्तिनिमित्तं प्रत्यक्षशब्दस्य, न तु प्रवृत्तिनिमित्तम् । व्युत्पत्तिस्तु प्रकृत्यादिविभागेन शब्दस्य निष्पत्तिः । तर्हि किं प्रवृत्तिनिमित्तम्, तदुच्यते अर्थसाक्षात्कारित्वमेव प्रत्यक्षशब्दस्य प्रवृत्तिनिमित्तम् । ततश्च यत् किञ्चित् अर्थस्य साक्षात्कारि ज्ञानं तत् प्रत्यक्षमुच्यते । तेन मानसादीनामपि प्रत्यक्षवाच्यता सम्भवति, यतो हि मानसादिप्रत्यक्षेऽपि अर्थसाक्षात्कारस्तु भवत्येव ।

**कल्पनापोढत्वनिरूपणम्**

कल्पनाया अपोढमपेतं कल्पनापोढम् । यत् कल्पनाया अपोढं रहितं तत् कल्पनाया अपोढमपगतं भवतीति अर्थाभेदं मत्वा कल्पनाया अपोढमिति कर्तरि निष्ठामाह आचार्यः धर्मोत्तरः । सम्प्रति शङ्का जायते – किमेकस्मिन् ज्ञाने ज्ञानान्तरसम्भवोऽस्ति, येनायं प्रतिषेधः शोभते । किञ्च कल्पनाज्ञानेऽपि कल्पनानन्तरं नास्तीति तदपि कल्पनापोढमिति प्रसज्येतेति वचनावकाशं पश्यन् उच्यते यत् कल्पनापोढमित्यत्र आचार्यीये लक्षणवाक्ये कल्पनाशब्दः भावप्रधानो विद्यते । तेन कल्पनात्वेन रहितम् कल्पनास्वभावरहितमित्यर्थः समायाति । कीदृशी पुनः कल्पनेह गृह्यते इत्याह आचार्यः धर्मकीर्तिः –

**'अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिकल्पना'**[१] १ इति ।

अभिलप्यते उच्यते अनेन इत्यभिलापो वाचकः शब्दः । अनेन अभिलप्यते इत्यभिलापः वाच्यः सामान्यादिः इत्येवंरूपा विनीतदेवव्याख्या निराकृता । येन अर्थस्य अभिधानं क्रियते सः अभिलापः वाचकः शब्दः । अभिलापेन वाचकेन संसर्गः सम्बन्धः इति अभिलापसंसर्गः तृतीयेति योगविभागात्समासः । अभिलापसंसर्गाय योग्यः इति चतुर्थीतत्पुरुषसमासः इति अर्थकथनमिदं कृतम् । समासस्तु अभिलापसंसर्गस्य योग्य इति षष्ठीतत्पुरुषसमासः कर्तव्यः । तादर्थ्यचतुर्थ्याः प्रकृतिविकार एव समासात् ।

[१] १ न्यायबिन्दुः, पत्रसंख्या – १३ ।

कथं पुनः वाच्यवाचकयोः संसर्गः सम्भवति, तदोच्यते यदैकस्मिन् ज्ञाने अर्थाकारः वाचकशब्दाकारेण सह ग्राह्याकारतया आरूढो भवति नाम सन्निविष्टो भासितो भवति तदा वाच्यवाचकयोः संसर्गः इति । ततो यदा अभिधेयाभिधानयोः आकारौ सन्निविष्टौ प्रतिभासितौ भवतः तदा अभिधानाभिधेये संसृष्टे सम्बद्धे भवतः । एवं यस्यां प्रतीतौ अभिलापसंसर्गाय योग्योऽभिधेयाकाराभासो सा अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना इत्येवमर्थः समायाति ।

**अभ्रान्तत्वनिरूपणम्**

विनीतदेवाचार्येण अविसंवादकत्वमेव अभ्रान्तत्वम् इत्यभिप्रेतम् । किन्तु सम्यग्ज्ञानमेव प्रत्यक्षम्, तत्र सम्यग्ज्ञानत्वादेव अविसंवादकत्वे लब्धे पुनः अविसंवादकग्रहणं निष्प्रयोजनम् । अतः धर्मोत्तराचार्यः तादृशव्याख्यानमवमन्यमानः अभ्रान्तशब्दस्यार्थमाह - 'अभ्रान्तम् अर्थक्रियाक्षमे वस्तुरूपे अविपर्यस्तमुच्यते । अर्थक्रियाक्षमं च वस्तुरूपं सन्निवेशोपाधिवर्णात्मकम्, तत्र यन्न भ्राम्यति तदभ्रान्तम्'[१]१ इति । अनेन परमाणुप्रचयस्यैव अर्थक्रियाकारित्वम् नावयविनः तस्यासत्वादिति सूचितम् ।

अधुना प्रश्नो भवति – एवमभ्रान्तत्वे योगाचारमतम् असंगृहीतं स्यात् । यतः योगाचारनये तु ग्राह्यग्राहकाकारतया प्रवृत्तेः सर्वस्यैव असर्वज्ञविज्ञानस्य आलम्बने भ्रान्तत्वात् इति । तदोच्यते न योगाचारनये लक्षणमिदं किन्तु सौत्रान्तिकनये एव । योगचारनये किं प्रत्यक्षलक्षणं स्यादिति चेत्- प्रत्यक्षं कल्पनापोढमित्येव । तर्हि एतन्मते द्विचन्द्रादिनिरासः कथमिति जिज्ञासा जायते, तदोच्यते सम्यग्ज्ञानं सदेव इत्यभिप्रायाददोषः । सौत्रान्तिकनयेऽपि एवमेव भवतु कथमभ्रान्तपदग्रहणमतिरिच्यते इति चेदुच्यते केवलं विप्रतिपत्तिनिरासार्थं गृह्यते, इहाभ्रान्तपदं तैमिरिकादिज्ञानव्यवच्छेदार्थम् । तत्र असत्यभ्रान्तग्रहणे गच्छद्वृक्षदर्शनादिः कल्पनापोढत्वात् प्रत्यक्षमिति स्यादाशङ्का । तन्निवृत्त्यर्थमभ्रान्तग्रहणं कृतमस्ति । यतो हि गच्छद्वृक्षदर्शनादिः तु मिथ्याज्ञानमिति उक्तमस्ति । कुतो मिथ्याज्ञानमिति चेत् – यस्मात् तद् गच्छद्वृक्षदर्शनादिः भ्रान्तत्वात् न प्रत्यक्षम् । भवतु भ्रान्तत्वादप्रत्यक्षम्, कथं नानुमानमिति चेदुच्यते त्रिरूपलिङ्गजत्वाभावात् इति । यद्येवम् अन्यत्प्रमाणं भविष्यति, तथापि कथं मिथ्याज्ञानमित्याशङ्कायां वाच्यम् – यस्मान्नाभ्यां प्रत्यक्षानुमानाभ्यां प्रमाणान्तरं विद्यते । अतः प्रत्यक्षत्वादिस्वभावत्वाभावात् गच्छद्वृक्षदर्शनादिः मिथ्याज्ञानमेव भवति । पुनः शङ्का जायते – यदि मिथ्याज्ञानं कथं ततो वृक्षावाप्तिरिति चेदुच्यते न ततो वृक्षावाप्तिः भवति, यतो हि नानादेशगामी वृक्षः तेन परिच्छिन्नो भवति । एकदेशो नियतश्च वृक्षः अवाप्यते । ततो यद्देशो गच्छद्वृक्षो दृष्टस्तद्देशो नावाप्यते, यद्देशश्चावाप्यते स न दृष्ट इति न तस्मात् कश्चिदर्थः अवाप्यते, ज्ञानान्तरादेव तु वृक्षादिरर्थः अवाप्यते इत्येवमभ्रान्तग्रहणं विप्रतिपत्तिनिरासार्थम् ।

ततः आचार्यः धर्मकीर्तिः आह – 'तया रहितं तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम्'[२]१ इति । तया कल्पनया कल्पनास्वभावेन रहितं शून्यं सत् ज्ञानं यदभ्रान्तं तत्प्रत्यक्षमिति । अर्थात् कल्पनापोढत्वाभ्रान्तत्वे परस्परसापेक्षे प्रत्यक्षलक्षणम्, न प्रत्येकमिति दर्शयितुं 'तया रहितं' 'यदभ्रान्तं' तत्प्रत्यक्षमिति लक्षणयोः परस्परसापेक्षयोः प्रत्यक्षविषयत्वं दर्शितमिति ।

**निष्कर्षः**

[१]१ न्यायबिन्दुटीका, पत्रसंख्या – ३४ ।
[२]१ न्यायबिन्दुः, पत्रसंख्या – १६ ।

 ISSN : 2320-740X

वस्तुतः बौद्धाचार्य एव दिङ्नागः तदीये 'प्रमाणसमुच्चयः' इत्याख्ये ग्रन्थे 'कल्पनापोढं प्रत्यक्षम्' इत्यादिप्रत्यक्षलक्षणं लक्षितवान्। किन्तु वार्तिककारेण उद्योतकरेण भ्रान्तौ उक्तलक्षणस्यातिव्याप्तिं प्रदर्श्य लक्षणस्य दुष्टत्वं प्रतिपादितम्। दोषस्यास्य परिष्काराय तत्र लक्षणे अभ्रान्तमिति पदं योजयित्वा समीचीनव्याख्यानपुरःसरं निर्दुष्टं लक्षणं लक्षितमाचार्येण धर्मकीर्तिना प्रकृते न्यायबिन्दुः इति प्रकरणग्रन्थे – "तत्र कल्पनापोढमभ्रान्तं प्रत्यक्षम्" इति। एवं तत्र कल्पनापदस्य अभ्रान्तपदस्य च तात्पर्यं पर्यालोच्य प्रत्यक्षलक्षणं विचारितम्। अनन्तरं प्रत्यक्षशब्दस्य तत्पुरुषसमासः एव इष्टः, अक्षम् अक्षम् प्रति वर्तते इति दिङ्नागवचनं केवलम् अर्थनिर्णयाय वर्तते इत्यादिप्रत्यक्षसमासविचारः विस्तरेण प्रतिपादितः।

न्यायबिन्दुग्रन्थस्य उपरि प्रसिद्धटीकाद्वयं प्राप्यते - आचार्यविनीतदेवेन विरचिता विस्तरटीका पुनः धर्मोत्तराचार्येण प्रणीता धर्मोत्तरटीका इति। धर्मोत्तरटीकायाः अध्ययनेन ज्ञायते यत् विनीतदेवविरचिता विस्तरटीका प्राचीना वर्तते, यतो हि धर्मोत्तराचार्यः स्वटीकायां प्रायः स्थलेषु विनीतदेमतं निराकरोति। एवं धर्मोत्तराचार्यमतस्यैव प्राबल्यमस्ति इति शोधप्रबन्धे प्रदर्शितम्। अन्ते च न्यायबिन्दुग्रन्थदिशा प्रत्यक्षलक्षणमिदं सौत्रान्तिकनये एव न तु योगाचारनये इत्यपि युक्त्या विवेचितमस्तीति शम्।

## सन्दर्भग्रन्थसूची


१. केदारभट्टः, वृत्तरत्नाकरः (चन्द्रिका-संस्कृत-हिन्दीव्याख्योपेतः), आचार्यः बलदेव उपाध्यायः (व्याख्याकारः), चौखम्बा सुरभारती प्रकाशन, वाराणसी

२. गोतमः, न्यायदर्शनम् (वात्स्यायनभाष्यसहितम्), आचार्य ढुण्डिराजशास्त्री (व्याख्याकारः), श्रीनारायणमिश्रः (सम्पादकः), चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, द्वितीयं संस्करणम्, १९७०

३. दुर्वेकमिश्रः, धर्मोत्तरप्रदीपः, पण्डितदलसुखभाईमालवाणिया (सम्पादकः), काशीप्रसाद-जायसवाल-अनुशीलनसंस्था, पाटलीपुत्रम्, २०१२चरकसंहिता, महर्षिचरकः, हिन्दीव्याख्या...डाँ. ब्रह्मानन्दत्रिपाठी, चौखम्बा सुर-भारती प्रकाशन, वाराणसी, पुनर्मुद्रितसंस्करणम् - २००९।

४. धर्मकीर्तिः, न्यायबिन्दुः(श्रीधर्मोत्तराचार्यकृतटीकासमेतः), श्रीचन्द्रशेखरशास्त्री(सम्पादकः), काशीसंस्कृतग्रन्थमाला, विद्याविलासप्रेस, काशी, १९२४यजुर्वेदः, दौलतराम गौड वेदाचार्यः, चौखम्बा विद्याभवन, वाराणसी - १९९३।

५. धर्मकीर्तिः, न्यायबिन्दुः, श्रीगोविन्दचन्द्रपाण्डे (व्याख्याकारः), प्रथमसंस्करणम्, दर्शन प्रतिष्ठन, जयपुर, १९७२

६. धर्मकीर्तिः, प्रमाणवार्तिकम् (अभिप्रायप्रकाशिकाटीकया संवलितम्), श्रीरामशङ्करः त्रिपाठी (टीकाकारः सम्पादकश्च), केन्द्रीयतिब्बती-अध्ययनविश्वविद्यालयः सारनाथः, वाराणसी, प्रथमसंस्करणम्, २०१२

७. धर्मकीर्तिः, प्रमाणवार्तिकम् (वार्तिकालङ्कारभाष्यसहितम्), स्वामियोगिन्द्रानन्दः (सम्पादकः), चौखम्बा विद्याभवन, वाराणसी, १९९४

८. धर्मोत्तराचार्यः, न्यायबिन्दुटीका(न्यायबिन्दुसहिता), श्रीनिवासशास्त्री(सम्पादकः), साहित्य भण्डार, मेरठ, तृतीयसंस्करणम्, २००७

९. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः), मोतीलाल बनारसीदास इंटरनेशनल, दिल्ली, २०२१

# कपिलनये बन्धस्वरूपविमर्शः

प्रभातकुमारमण्डलः,*
शोधच्छात्रः, रा.वि.शै.शो.सं.,
बेलुडमठम्, हावडा

***लेखसारः*** *– बन्धसंसर्गमोक्षाः पुरुषस्य न सन्ति अपि तु प्रकृतिगता एव बन्धसंसर्गापवर्गाः पुरुषेषु उपचर्यन्ते इति सांख्यसमयः । परन्तु भवति त्रिविधदुःखयोगलक्षणबन्धस्य प्रतिकूलवेदनीयत्वरूपोभिघातः पुरुषेण । येन निवारयितुं दुःखानि लोकसिद्धेनोपायेन दुःखानामात्यन्तिकीमैकान्तिकीं च निवृत्तिमपश्यन् शास्त्रे प्रवर्तते पुरुषः । स पुरुषे विद्यमानो बन्धयोगः किंस्वरूपः, किं स्वाभाविकः स उत नैमित्तिकः आहोस्वित् औपाधिकः इत्येव अस्मिन् शोधनिबन्धे निबध्यते । तत्रादौ बन्धः स्वाभाविकः इत्यत्र स्वाभाविकत्वं नाम किमिति भाष्याभिमतं स्वाभाविकत्वं निरूप्य बन्धस्य स्वाभाविकत्वं निराकृतम् । तदनु नैमित्तिको बन्धः इति पक्षे पूर्वपक्षिभिः आक्षिप्तानि निमित्तानि निमित्ताभासानीति निरूपितम् । अन्ते च बन्धः औपाधिक एव इति सांख्यसिद्धान्तः प्रस्तुतः ।*

***कूटशब्दाः*** *– बन्धः, स्वाभाविकः, नैमित्तिकः, औपाधिकः, पुरुषः प्रकृतिः ।*

**प्रस्तावना** -परमार्थतः पुरुषो न बध्यते नापि संसरति न वा मुच्यते, अपि तु नानापुरुषाश्रया प्रकृतिरेव संसरति बध्यते मुच्यते चेति कापिलानां राद्धान्तः । यथाह सुवर्णसप्तत्यामीश्वरकृष्णः -

**तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित् ।**
**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥**[१] इति ।

यच्च लोके 'बद्धोऽयं' 'पुरुषः संसारी' 'मुक्तः अयम्' इत्यादिः व्यवहारः, उपचारः स मन्तव्यः । प्रकृतेरेव बन्धमोक्षौ तत्र पुरुषेषु उपचर्येते, यथा भृत्यगतौ जयपराजयौ राजनि उपचर्येते तद्वत् । तथाह्युक्तं टीकाकृद्भिः वाचस्पतिमिश्रचरणैः - **प्रकृतिगता बन्धसंसर्गापवर्गाः पुरुषेषु उपचर्यन्ते**[२] इति । तथापि प्रत्यात्मवेदनीयं त्रिविधं दुःखम् अपलपितुं न शक्यते। तेन च त्रिविधेन दुःखेन भवति चेतनाशक्तेः पुरुषस्य प्रतिकूलवेदनीयतया अभिसम्बन्धः । स एव योगः अभिघातशब्देन निर्दिश्यते शास्त्रे **दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ**[३] इत्यादौ । उक्तं च तत्र मिश्रचरणैः - **तदनेन दुःखत्रयेम अन्तःकरणवर्तिना चेतनाशक्तेः प्रतिकूलवेदनीयतया अभिसम्बन्धः अभिघातः**[४] इति । येन दुःखापघातकम् अन्विषन् अविलोक्य चोपायेन लौकिकेन आत्यन्तिकैकान्तिकदुःखनिवृत्तिं तदुपाये आत्यन्तिकैकान्तिकदुःखनिवृत्तिसाधने मोक्षशास्त्रे प्रवर्तते पुरुषः । सः दुःखाभिघातः अर्थात् दुःखयोग एव बन्धः । बद्धश्च पुरुषः यतते मोक्षाय । मोक्षश्च तदात्यन्तिकैकान्तिकनिवृत्तिलक्षणः । तथाह्युक्तं सांख्याचार्यधुरन्धरैः विज्ञानभिक्षुभिराचार्यैः स्वभाष्ये - **दुःखात्यन्तनिवृत्तेः मोक्षत्वस्य उक्ततया बन्धोऽत्र दुःखयोग एव**[५] इति । स च बन्धः किं स्वाभाविकः आहोस्वित् नैमित्तिकः उत औपाधिकः इत्यस्मिन् अयं

---

***सम्पर्कसूत्रम्*** - 8697911327 , Email- provatkm0711@gmail.com

[१]सांख्यकारिका ६२
[२]सांख्यतत्त्वकौमुदी, पत्रसंख्या - ३१०
[३]सांख्यकारिका १
[४]सांख्यतत्त्वकौमुदी, पत्रसंख्या - ९
[५]सांख्यदर्शनम्, पत्रसंख्या - ३२

शोधनिबन्धः ।

अत्र प्रश्नो भवेत् कर्मसामानाधिकरण्यानुरोधात् दुःखयोगरूपो बन्धोऽपि चित्तस्य एव कुतो न । दुःखं तावत् चित्तस्य धर्मः इति प्रसिद्धम् । अतस्तस्य किंप्रयोजनं पुरुषेण सम्बन्धकल्पनमिति । तत्रोच्यते – **दुःखयोगरूपस्य बन्धस्य चित्तमात्रधर्मत्वे भोगवैचित्र्यं नोपपद्येत ।**[1] अथान्तरेणापि दुःखयोगं पुरुषस्य दुःखसाक्षात्कारलक्षणो भोगः इति नियमः तदा नियामकाभावात् सकलपुरुषदुःखादीनां सर्वपुरुषभोग्यता स्यात् । तेन अयं दुःखभोक्ता अयं सुखभोक्ता इत्येवंरूपं भोगवैचित्र्यं नोपपद्येत । तस्मात् भोगवैचित्र्योपपत्तये दुःखादियोगलक्षणो बन्धः पुरुषेऽपि अङ्गीकार्यः । पुरुषे च सः दुःखयोगः प्रतिबिम्बरूपो ग्राह्यः । प्रतिबिम्बश्च स्वोपाधिवृत्तेरेव भवतीति न सर्वपुरुषाणां सर्वदुःखभोगप्रसङ्गः । चित्तवृत्तिबोधे च पुरुषस्य अनादिः स्वस्वामिभावसम्बन्धो हेतुः इत्यत्र **वृत्तिसारूप्यमितरत्र**[2] इति योगसूत्रस्य **चित्तमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः । तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः सम्बन्धो हेतुः**[3] इति भाष्यवचनं प्रमाणम् । यच्च चित्तस्यैव बन्धमोक्षौ न पुरुषस्य इति श्रुतिस्मृतिषु गीयते तत्र बिम्बरूपदुःखयोगलक्षणः पारमार्थिको बन्धो ग्राह्यः । सम्प्रति पुरुषस्य बन्धः किं स्वभाविको न वेति निरूप्यते–

तत्र त्रिविधदुःखयोगलक्षणो बन्धः स्वाभाविको न वेति विचारणादग्रे स्वाभाविकशब्देन अस्मिन् शास्त्रे किं विवक्षितमिति निरूपणीयम् ।

**स्वाभाविकत्वनिरुक्तिः** - सांख्यप्रवचनभाष्ये यथास्वमतं स्वाभाविकत्वं निर्वचन् आह भगवान् भाष्यकारः - **यस्मिन् सति कारणविलम्बात् विलम्बो यस्योत्पत्तौ न भवति तस्य तत् स्वाभाविकम् इति स्वाभाविकत्वलक्षणम्**[4] इति । अर्थात् यस्मिन् वह्न्यादिधर्मिणि सति यस्य औष्ण्यादेः उत्पत्तौ कारणविलम्बात् विलम्बः कालविलम्बो न भवति, अपि तु धर्मिणः सत्तामात्रेणैव धर्मस्य उत्पत्तिः भवति तत् औष्ण्यादिकं वह्न्यादेः स्वाभाविकम् । अत्र शंका - दुःखं तावत् सर्वदा उपलभ्यते । अतः तस्य स्वाभाविकत्वे किमर्थः प्रश्नः ? सत्यम् । यद्यपि चित्तं त्रिगुणात्मकमिति हेतोः दुःखं स्वाभाविकमिति कथनं युक्तं तथापि सत्त्वाधिक्येन चित्तस्य अभिभवे सदा दुःखं नोपलभ्यते । तस्मात् अनुपलब्धेः सदा दुःखस्य उपपद्यते शङ्का । एवम् आत्मनः अपि दुःखानुपलब्धिः सम्भवति एव ।

**१. बन्धस्य स्वाभाविकत्वपक्षः** - स्यादेतत् । औष्ण्यं यथा स्वाभाविको धर्मो वह्नेः तथायं दुःखयोगोऽपि किं स्वाभाविको धर्मः पुरुषस्य ? यदि दुःखत्रययोगलक्षणो बन्धः स्वाभाविकः तदा व्यर्थ एव शास्त्रेण कृतो बद्धस्य मोक्षायोपदेशः । यावत् हि द्रव्यं तिष्ठति तावत् खलु स्वभावोऽपि तिष्ठतीति लोके दृष्टम् । नहि कदाचित् अपि लोके वह्निः अनुष्णः औष्ण्यस्वभावहीनः उपलभ्यते । औष्ण्यस्वभावः यावत् वह्निकालं तिष्ठति । एवं पुरुषस्य त्रिविधदुःखयोगलक्षणस्य बन्धस्यापि स्वाभाविकत्वे यावत् तिष्ठेत् पुरुषस्तावत् बन्धः स्यात् । तथा सति अनिर्मोक्षप्रसङ्गेन शास्त्रविहितमोक्षोपदेशः व्यर्थः स्यात् सर्वथा । तथाह्युक्तम् आचार्येण विज्ञानभिक्षुणा - **न ह्यग्नेः स्वाभाविकादौष्ण्यान्मोक्षः सम्भवति, स्वाभाविकस्य**

[1] विचित्रभोगानुपपत्तिरन्यधर्मत्वे । (सांख्यसूत्रम् १.१७)

[2] योगसूत्रम् १.४

[3] पातञ्जलयोगदर्शनम्, पत्रसंख्या २१

[4] सांख्यदर्शनम्, पत्रसंख्या - ३५

**यावद्द्रव्यभावित्वात् इत्यर्थः**[१] इति । ईश्वरगीतायाम् अपि उक्तं -

**यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात् स्वभावतः ।**
**नहि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि ॥**
[२] **स्वयं च तत्वं स्वयमेव शुद्धम् ।**[३]

ननु स्वाभाविकस्य अपि धर्मस्य लोके अपायदर्शनात् अनपायी स्वाभावः इति न्यायः एव असिद्धः । यथा रागेण शुक्लस्य पटस्य स्वाभाविकं शुक्लत्वम् अपनीयते । किञ्च स्वाभाविकाङ्कुरशक्तिमतो बीजस्य स्वाभाविकी अङ्कुरशक्तिः अग्निनापनीयते इति लोके दृश्यते । तद्वत् स्वाभाविकस्यापि बन्धस्य अपायः सम्भवेत् । ततो न मोक्षशास्त्रोपदेशविधेः निरर्थकत्वाशंकावसरः ।[४] इमामाशङ्कां परिहरन्नाह भगवान् सूत्रकारः - **शक्त्युद्भवानुद्भवाभ्यां नाऽशक्योपदेशः**[५] इति ।अयमाशयः उभयत्रापि दृष्टान्तयोः शुक्लत्व-अङ्कुरशक्त्योः उद्भवानुद्भवौ एव भवतः न तु शौक्ल्याङ्कुरशक्त्योः भावाभावौ । तस्मिन्नेव पटे रजकादिव्यापारेण शक्तत्वस्य पुनर्दर्शनात्, भृष्टेऽपि बीजे योगिसङ्कल्पादिभिः अङ्कुरादिशक्तेः पुनराविर्भावदर्शनाच्च । तस्मात् युक्त एव अनपायी स्वभाव इति न्यायः ।

नन्वेवं पुरुषे दुःखशक्तितिरोभावस्यैव मोक्षत्वमस्तु । सत्यं स्यादेवं यदि तथा निरूपितं स्यात् श्रुतिस्मृत्योः । तत्र तु दुःखात्यन्तनिवृत्तेरेव पुरुषार्थत्वं निरूपितम् । किञ्च दुःखशक्तितिरोभावस्यैव मोक्षत्वे दग्धबीजे अङ्कुरशक्तेराविर्भाव इव मुक्तेष्वपि सम्भवेदेव योगीश्वरसंकल्पादिना शक्त्युद्भवः । तेन अनिर्मोक्षता एव स्यात् ।

दुःखं स्वाभाविकमिति मन्यमानानां बौद्धानां नये चित्तम् एव आत्मा । अतः आत्मनाशादेव मोक्षः इति उन्मत्तप्रलापः । अहं बद्धः विमुक्तः स्याम् इत्यादिसामानाधिकरण्येनैव मोक्षस्य पुरुषार्थत्वाङ्गीकारात् । अथ स्वाभाविकं दुःखं तदा स्वभावतो बद्धस्य पुरुषस्य मोक्षसाधनोपदेशविधिः न घटेत कथमपि । तथाहि सूत्रम् **न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः**[६] इति । दुःखानामात्मनः स्वाभाविकधर्मतया आत्यन्तिकैकान्तिकनिवृत्तिरूपो मोक्षो न सिद्ध्येदिति मोक्षसाधनोपदेशश्रुतेः अननुष्ठानलक्षणमप्रामाण्यप्रसङ्गः ।न च श्रुत्युपदिष्टमोक्षोपदेशस्याप्रामाण्यं शक्यते सोढुम् । यत् अवगतं सत् स्ववृत्तितया इष्यते तदेव प्रयोजनम् । अशक्यसम्पादने च तस्मिन् तदुपदेशानुष्ठानमपि असम्भवमेव । अशक्योपायोपदेशस्य निरर्थकत्वात् । तस्मात् अनुपदेशः एव सः इति वक्तव्यम् । यथा चाह महर्षिकपिलः - **नाशक्योपदेशविधिरुपदिष्टेऽप्यनुपदेशः**[७] इति । अनुपदेशः उपदेशाभासः इत्यर्थः । किञ्च **बाधितमर्थं वेदोऽपि न बोधयति**[८] इति न्यायोऽपि उक्तम् अर्थमेव द्रढयति । तस्मात् बन्धः न स्वाभाविकः ।

**२. बन्धस्य नैमित्तिकत्वपक्षः**

---

[१]तदेव, पत्रसंख्या - ३४
[२]कूर्मपुराणम् २.२.१२-१३
[३]अवधूतगीता १.४७
[४]शुक्लपटवत् बीजवच्चेत् । (सांख्यसूत्रम् १.१०)
[५]सांख्यसूत्रम् १.११
[६]तदेव १.७
[७]तदेव १.९
[८]सांख्यदर्शनम्, पत्रसंख्या - ३६


ISSN : 2320-740X

स्यादेतत् । मास्तु स्वाभाविकत्वं बन्धस्य नैमित्तिकत्वं तु स्यात् । नैमित्तिकत्वं च निमित्तजन्यत्वम् । तन्न । यावद्द्रव्यभावि अनागतावस्थं दुःखमिति हेतोः पुरुषे दुःखयोगस्य नैमित्तिकत्वे दुःखस्य ज्ञानाद्युपायोच्छेद्यत्वं न घटेत । **अनागतावस्थदुःखस्य यावद्द्रव्यभावित्वात्**[१] इति सांख्याचार्यशिरोमणेः वचोऽप्यत्र मानम् ।

अथ कथञ्चित् तुष्यतुदुर्जनन्यायेन नैमित्तिकत्वे दुःखस्य किं तत् निमित्तमिति विचारणीयम् । तत्र सांख्यदर्शने अविद्याकालादिपदार्थानां बन्धहेतुत्वमाशङ्क्य निराकृतम् । सम्प्रति तत् प्रस्तूयते । तत्रेदं मनसि निधेयं पाकजादिरूपवत् निमित्तजन्यत्वलक्षणं यन्नैमित्तिकत्वं तदेव बन्धे निराक्रियते न तु कालादीनां निमित्तत्वमात्रमपलप्यते । यथोक्तं - **कालदेशकर्मादीनां निमित्तत्वसामान्यं न अपलप्यते श्रुतिस्मृतियुक्तिभिः सिद्धत्वात् । परन्तु पाकजादिरूपवत् निमित्तजन्यत्वरूपं यत् नैमित्तिकत्वं तदेव बन्धे प्रतिषिध्यते, पुरुषे बन्धस्य औपाधिकत्वाभ्युपगमात् ।**[२] इति ।

१.१ **कालः**- ननु कालः स निमित्तम् । न, नित्यत्वात् व्यापकत्वात् च कालस्य । कालो हि नित्यः व्यापकश्च इति सदा तस्य सर्वावच्छेदेन मुक्ताऽमुक्तसकलपुरुषसम्बन्धः । तेन सदा सकलपुरुषाणां बन्धापत्तिः । ननु सहकार्यन्तरसम्भवासम्भवाभ्यामेव व्यवस्थोपपत्तौ न दोषः । तन्न । तथा सति यत्संयोगे सति यस्य अवश्यं बन्धः स एव सहकारी बन्धहेतुः स्यात् । पुरुषे बन्धव्यवहारश्च औपाधिकतया व्याख्येयः ।

२.२ **देशः** – समानेन मुक्तामुक्तसकलपुरुषसम्बन्धात् मुक्तस्यापि बन्धापत्तिरिति न्यायेन देशस्यापि न बन्धनिमित्तत्वम् ।

२.३ **अवस्था** - ननु संघातविशेषदेहरूपा या अवस्था सा एव बन्धनिमित्तमस्तु । सत्यं भवेदेवं यदि सम्भवेत् अन्यधर्मेण अन्यस्य बन्धः । न तु तथा अस्ति । यथोक्तं भाष्यकृता - **अन्यधर्मस्य साक्षात् अन्यबन्धकत्वे अतिप्रसङ्गात् मुक्तस्यापि बन्धापत्तेरित्यर्थः**[३] इति । अवस्थायाश्च पुरुषधर्मत्वं न सम्भवति । **असङ्गोऽयं पुरुष**[४] इति पुरुषस्य असङ्गत्वात् सङ्गरहितत्वात् । अवस्था तु देहस्यैव धर्मः । अन्यथा पुरुषस्य विकारहेतुसंयोगाख्यः सङ्गः प्रसज्येत एव । **स यदत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवति, असङ्गो ह्ययं पुरुषः**[५] इत्यादिश्रुतिरपि पुरुषासङ्गित्वे प्रमाणम् । सङ्गश्च न संयोगमात्रम्, देशकालसम्बन्धदर्शनात् पुरुषस्य ।

२.४ **कर्म** - कर्मणोऽपि बन्धनिमित्तत्वं निरकुरुत भगवान् सूत्रकारः - **न कर्मणान्यधर्मत्वादतिप्रसक्तेश्च**[६] इति । न तावत् विहितनिषिद्धकर्मणा पुरुषस्य बन्धः, अनात्मधर्मत्वात् कर्मणाम् । अन्यधर्मेण साक्षात् अन्यस्य बन्धे मुक्तस्यापि बन्धः आपद्येत । नापि स्वस्वोपाधिकर्मणा बन्धः

[१] तदेव, पत्रसंख्या - ३८
[२] तदेव पत्रसंख्या - ३९
[३] तदेव, पत्रसंख्या - ४०
[४] सांख्यसूत्रम् १.१५
[५] बृहदारण्यकोपनिषत् ४.३.१३
[६] सांख्यसूत्रम् १.१६

उक्तदोषाभावेऽपि अतिप्रसक्तिप्रसङ्गात्। कर्मजन्येन अदृष्टेनापि न साक्षात् पुरुषस्य बन्धः कर्मणां पुरुषधर्मत्वाभावात्[१]।

२.५ **अविद्या – ननु अभिन्नोऽपि हि बुद्ध्यात्मा विपर्यासनिदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥**[२] इति प्रमाणवार्तिकोक्तेः अविद्यया एव बन्धः। तन्न। अवस्तुत्वात् क्षणिकवादिनाम् अविद्यायाः। अयुक्तश्च अवस्तुना बन्धः।[३] न खलु स्वप्नरज्ज्वा कस्यापि बन्धनं दृष्टं लोके। न च बन्धोऽपि अवास्तव इति वाच्यं, सूत्रकृता एव बन्धावास्तवत्वस्य निराकृतत्वात्। किञ्च मिथ्या बन्धः इति श्रवणेन बन्धनिवृत्तिरूपफलासिद्धिनिश्चयेन तदर्थो महानायासो न सम्भवेत्। वस्तुत्वे च तस्य क्षणिकत्वसिद्धान्तहानिः।

२.६ **वासना** – अपरे बौद्धाः **क्षणिकाः बाह्यविषयाः सन्ति तेषां वासनया जीवस्य बन्धः**[४] इत्याहुः। तदयुक्तम्। अनादिवासनापि न पुरुषबन्धहेतुः, तेषां नये परिच्छिन्नदेहान्तःस्थत्वादात्मनः। आभ्यन्तरस्य हि पदार्थस्य बाह्यपदार्थेन उपरज्योपरञ्जकभावोऽसम्भवः देशव्यवधानात् स्रुघ्नस्थपाटलिपुत्रस्थयोः पुरुषयोः संयोगासम्भव इव। वासनाख्योपरागश्च संयोगे सत्येव भवति। ननु इन्द्रियवत् आत्मा विषयदेशं गच्छति संयुज्यते च विषयेण। ततो विषयोपरागः। तन्न। द्वयोः बद्धमुक्तात्मनोः एकस्मिन् विषयदेशे लब्धविषयोपरागात् न बन्धमोक्षव्यवस्था। अन्यथा मुक्तस्यापि बन्धापत्तिः। न च अदृष्टवशात् बन्धमुक्तव्यवस्था स्यादिति वाच्यं बौद्धमते सर्वस्यापि पदार्थस्य क्षणिकत्वात्। अतो न द्वयोः कर्तृभोक्त्रोः एककालासत्त्वेनोपकार्योपकारकभावः। न हि कर्तृनिष्ठादृष्टेन भोक्तृनिष्ठो विषयोपरागो युज्यते। ननु पितृनिष्ठेन पुत्रकर्मणा पुत्रोपकार इव अत्रापि व्यधिकरणादृष्टेन विषयोपरागः। न दृष्टासिद्धेः। तत्र पुत्रेष्ट्यापि पुत्रस्य उपकारो न घटते। यतो हि गर्भाधानमारभ्य जन्मपर्यन्तं स्थायी एक आत्मा नास्ति य जन्मोत्तरकालीनकर्माधिकारार्थं पुत्रेष्ट्या संस्क्रियेत। वयं सांख्यास्तु स्थैर्यम् अभ्युपगच्छाम इति न दोषः। पुत्रेष्टिजनितेन पुत्रोपाधिनिष्ठादृष्टेनैव पुत्रोपाधिद्वारा पुत्रस्य उपकारात् सांख्यनये न दृष्टान्तासिद्धिः। तस्मात् वासनापि न बन्धहेतुः।

२.७ **प्रकृतिः - प्रकृतिनिबन्धनाच्चेत् न तस्या अपि पारतन्त्र्यम्**[५] इति प्रकृतिरपि न बन्धहेतुः तस्याः बन्धकत्वे संयोगपारतन्त्र्यं स्यात् प्रकृत्याः। अन्यथान्तरेणापि संयोगविशेषं बन्धकत्वे प्रकृतेः प्रलयकालेऽपि दुःखबन्धः स्यात्।

### ३. बन्धस्य औपाधिकत्वपक्षः -

तस्मात् यत्पारतन्त्रा प्रकृतिः बन्धस्य कारणं भवति तस्मात् संयोगविशेषात् औपाधिकः बन्धः इति स्वीक्रियते। यथा अग्निसंयोगात् जले औष्ण्यमाविर्भवति तद्वत्। तथाहि पंरमार्षं सूत्रम् - **न**

[१] न कर्माणीप्यतद्धर्मत्वात्। (सांख्यसूत्रम् १.५२)
[२] प्रमाणवार्तिकम् २.३५४
[३] नाविद्यातोऽप्यवस्तुना बन्धायोगात्। (सांख्यसूत्रम् १.२०)
[४] सांख्यदर्शनम्, पत्रसंख्या - ६६
[५] सांख्यसूत्रम् १.१८

 ISSN : 2320-740X

**नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते**[1] इति। तेन प्रकृतिसंयोगात् ऋते पुरुषस्य तद्योगः बन्धयोगः नास्ति अपि तु स एव बन्धः। स च औपाधिकः। अथ यदि प्रकृतिसंयोगजन्यो बन्धः पाकजरूपमिव स्वीक्रियते तदा प्रकृतिवियोगेपि तद्योगः पाकरजरूपम् इव अनुवर्तेत। प्रकृतिवियुक्तश्च पुरुषः न शोचते इत्याह स्मृतिः - **यथा ज्वलद्गृहाश्लिष्टगृहं विच्छिद्य रक्ष्यते। तथा सदोषप्रकृतिविच्छिन्नोयं न शोचति।**[2] इति। ननु द्वितीयक्षणादि एव दुःखनाशकम् इति न दोषः। तन्न। कारणनाशः कार्यनाशकः इति न्यायात् तेनैव उपपत्तौ अन्यकल्पनायाः अन्याय्यत्वात्। दुःखादेश्च उपादानं वृत्तिः। तस्मात् दीपशिखावत् क्षणभङ्गुरायाः वृत्तेः आशुविनाशित्वेन एव तद्धर्माणां दःखेच्छादीनां विनाशः सम्भवति। तेन प्रकृतिवियोगे बन्धः नोपलभ्यते इति दुःखयोगलक्षणो बन्ध औपाधिक एव न तु स्वाभाविकः न वा नैमित्तिकः।

एतेन शुद्धस्य स्फटिकस्य यथा जपायोगं विना न रागयोगः तथैव नित्यशुद्धादिस्वभावस्य पुरुषस्य अन्तरेणोपाधियोगं न दुःखयोगः स्वतो दुःखाद्यसम्भवात्। यथोक्तं स्मृतौ –

**यथा हि केवलो रक्तः स्फटिको लक्ष्यते जनैः।**
**रञ्जकाद्युपधानेन तद्वत् परमपुरुषः॥**[3] इति।

आत्मनस्तु नित्यशुद्धादिस्वरूपत्वे - **अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुः**[4] इत्यादिश्रुतयः प्रमाणम्। ननु अहं सुखी दुःखी अहं करोमि इत्याद्यनुभवात् आत्मा विकारोपादानम् इति सिध्यति। न। अहं गौर इत्यादिभ्रमशतान्तःपातित्वेन अप्रामाण्यशङ्कास्कन्दिततया उक्तप्रत्यक्षाणाम् उक्ततर्कानुगृहीतानुमानापेक्षया दुर्बलत्वात्। तथाह्युक्तं सांख्यकारिकायां –

**तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।**
**गुणकर्तृत्वे च तता कर्तेव भवत्युदासीनः॥**[5] इति।

कर्तृत्वम् इत्यस्य दुःखित्वादिसकलविकाराः इत्यर्थः। यथा योगसूत्रे उक्तम् - **द्रष्टृदृश्ययोः संयोगो हेयहेतुः**[6] इति। गीतायां च उच्यते - **पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्**[7] इति। प्रकृतिस्थः नाम प्रकृतौ संयुक्तः। श्रुतौ अपि - **आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः**[8] इति। ननु कालादिसंयोगः इव प्रकृतिसंयोगः अपि मुक्तामुक्तपुरुषसाधारणः। तथा सति सः कथं बन्धहेतुः। तत्रोच्यते अत्र संयोगशब्देन जन्मापरनामा स्वस्वबुद्धिभावापन्नप्रकृतिसंयोगविशेष एव उच्यते। तस्मात् न दोषः। ननु नित्ययोः प्रकृतिपुरुषयोः महदादिहेतुः अनित्यः संयोगः कथं घटेत। तत्र प्रत्युच्यते प्रकृतिस्तावत् परिच्छिन्नाऽपरिच्छिन्नत्रिविधगुणसमुदायरूपा। तस्याश्च परिच्छिन्नगुणावच्छेदेन पुरुषेण सह संयोग उपपद्यते एव। प्रकृतेश्च संयोगः क्षोभः च भवत इत्यत्र श्रुतिस्मृती एव प्रमाणम्। तस्मादौपाधिक एव

[1] तदेव १.१९
[2] सांख्यदर्शनम्, पत्रसंख्या - ४८
[3] सौरपुराणम् ११.३१
[4] नृसिंहोत्तरतापनीयोपनिषत् २.९.९
[5] सांख्यकारिका २०
[6] योगसूत्रम् २.१७
[7] श्रीभगवद्गीता १३.२१
[8] कठोपनिषत् १.३.४

बन्धः ।

**उपसंहारः** – एवं विविच्यमाने पुरुषे दुःखत्रययोगलक्षणो बन्धः न स्वाभाविकः नापि नैमित्तिकः अपि तु औपाधिकः इत्यायाति । तत्र नैमित्तिकत्वपक्षे सांख्यसूत्रे यानि निमित्तानि निर्दिष्टानि बौद्धैश्च परिकल्पितानि च तानि निराकृतानि । इतोपि बन्धकारणानि शास्त्रान्तरे प्रसिद्धानि तत्र परीक्षितुं योग्यानि सन्ति ।

## सन्दर्भग्रन्थसूची

१. सांख्यदर्शनम्(सांख्यप्रवचनभाष्यसहितम्), कपिलमुनिः, गजाननशास्त्री मुसलगांवकरः(सम्पादकः), चौखम्बा संस्कृत संस्थान, वाराणसी, तृतीयसंस्करणम्, 2006.

२. सांख्यतत्त्वकौमुदी(कृष्णाव्याख्योपेता), वाचस्पतिमिश्रः,पं श्रीज्वालाप्रसाद् गौ़ड (व्याख्याकारः सम्पादकश्च), प्रथमं संस्करणम्, चौकम्बा सुरभारती प्रकाशन, वाराणसी, 2019.

३. सांख्यकारिका(सांख्यतत्त्वकौमुदीसहिता), ईश्वरकृष्णः, श्रीकृष्णवल्लभाचार्यः(सम्पादकः), द्वितीयं संस्करणम्, व्यास प्रकाशन, दिल्ली, 2007.

४. अवधूतगीता (भाषाटीकासहितः), परमानन्दजी (व्याख्याकारः, सम्पादकश्च), प्रथमं संस्करणम्, खेमराज श्रीकृष्णदास प्रकाशन, बम्बई, 2005.

५. पातञ्जलयोगदर्शन,महर्षिपतञ्जलिः, स्वामिश्रीब्रह्मलीनमुनिः(सम्पादकः), तृतीयसंस्करणम्, चौखम्भा प्रकाशन,२०१०.

६. अद्वैतशारदा




ISSN : 2320-740X

# भास्करोक्तसूक्ष्मनक्षत्रानयनक्रमस्य विमर्शः

डा. रमानन्द भट्टः एन्.*
सहायकप्राध्यापकः (सं.), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– अस्मिन् शास्त्रे पञ्च अङ्गानि कालस्य शुभाशुभत्वनिर्णये मुख्यानि । तिथिः, वासरः, नक्षत्रम्, योगः, करणं चेति तानि पञ्चाङ्गानि । तत्र सप्तविंशतिः नक्षत्राणि अश्विन्यादीनि शास्त्रे उक्तानि । नक्षत्रकक्ष्या सर्वान्ते वर्तते चेदपि क्रान्तिसंज्ञकसूर्यसञ्चारवृत्तस्य समीपवर्तीनि एतानि भानि क्रान्तिवृत्ते एव कल्प्यन्ते । एतानि नक्षत्राणि ग्रहैः भुज्यन्ते । नक्षत्रभोगार्थं ग्रहैः कियान् कालः स्वीक्रियते इत्येज्ज्ञानार्थं नक्षत्राणां प्रमाणं ज्ञातव्यम् । तदिदानीं सूक्ष्मतया निरूप्यते ।*

*क्रान्तिवृत्ते २१,६०० कलाः (३६००×६० ।) सन्ति । नक्षत्राणि तु सप्तविंशतिः (२७) । तदा एकस्य नक्षत्रस्य प्रमाणं भवति ८०० कलाः । अयं च क्रमः स्थूलः लोकव्यवहारार्थमेव । यतः नक्षत्राणां सूक्ष्मं प्रमाणमन्यदेव वर्तते । वसिष्ठगर्गादिभिः विवाहयात्रादिषु सम्यक्फलसिद्ध्यर्थं सूक्ष्मनक्षत्रानयनं कृतं वर्तते । अत्र अभिजित्सहितनक्षत्राणां गणनं कृतं वर्तते । तत्सर्वं निबबन्ध स्वीये सिद्धान्तशिरोमणौ ज्योतिर्गगनभास्करः आचार्यो भास्करः –*

***सूक्ष्मं कृतं भानयनं यदेतज्ज्योतिर्विदां संव्यवहारहेतोः ।***
***सूक्ष्मं प्रवक्ष्येऽथ मुनिप्रणीतं विवाहयात्रादिफलप्रसिद्ध्यै ॥***

*इदं भास्करवचनमाश्रित्य अस्माकं चिन्तनं प्रवर्तते । मुख्यरूपेण अत्र अधोनिर्दिष्टाः अंशाः चिन्त्यन्ते ।*

- *भास्करं विना अन्यैः इदं उक्तं वा इत्यस्य विषयस्य परिशीलनम् ।*
- *भास्करस्य आधारभूतानां कश्यपादीनां वचनस्य सङ्ग्रहः ।*
- *सूक्ष्मनक्षत्रस्य उपयोगः अन्यैः कृतो वा इत्यस्य विश्लेषणम् ।*
- *मुहूर्तेषु अस्य प्रयोजनम् इत्यनेके विषयाः सप्रमाणं चर्चिताः ।*

***कूटशब्दाः*** *– भास्करः, नक्षत्रम्, पञ्चाङ्गम्, बृहत्संहिता, शिरोमणिः*

अथ च वेदाङ्गभूतं ज्योतिश्शास्त्रं प्रत्यक्षमिति प्रसिद्धम् । इदं च शास्त्रं त्रिषु स्कन्धेषु विभक्तं वर्तते । तेषु त्रिषु स्कन्धेषु सिद्धान्तस्कन्धः सर्वतः ज्यायान् इति निस्सन्दिग्धम् । तदुक्तं तत्रभवता भास्करेण –

**जानन् जातकसंहिताः सगणितस्कन्धैकदेशा अपि**
**ज्योतिश्शास्त्रविचारसारचतुरप्रश्नेष्वकिञ्चित्करः ।**
**यः सिद्धान्तमनन्तयुक्तिविततं नौ वेत्ति भित्तौ यथा**
**राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः**[1] **॥इति ॥**

अस्मिन् शास्त्रे पञ्च अङ्गानि कालस्य शुभाशुभत्वनिर्णये मुख्यानि । तिथिः, वासरः, नक्षत्रम्, योगः, करणं चेति तानि पञ्चाङ्गानि । तत्र सप्तविंशतिः नक्षत्राणि अश्विन्यादीनि शास्त्रे उक्तानि । नक्षत्रकक्ष्या

---

***सम्पर्कसूत्रम्** - 9686548489, 8073556745 , Email- rnbhat1987@gmail.com
[1]सिद्धान्तशिरोमणिः – मध्यमाधिकारे कालमानाध्यायः – ०७ ।

सर्वान्ते वर्तते चेदपि क्रान्तिसंज्ञकसूर्यसञ्चारवृत्तस्य समीपवर्तीनि एतानि भानि क्रान्तिवृत्ते एव कल्प्यन्ते । एतानि नक्षत्राणि ग्रहैः भुज्यन्ते । नक्षत्रभोगार्थं ग्रहैः कियान् कालः स्वीक्रियते इत्येतज्ज्ञानार्थं नक्षत्राणां प्रमाणं ज्ञातव्यम् । तदिदानीं सूक्ष्मतया निरूप्यते ।

क्रान्तिवृत्ते २१,६०० कलाः (३६००×६० ।) सन्ति । नक्षत्राणि तु सप्तविंशतिः (२७) । तदा एकस्य नक्षत्रस्य प्रमाणं भवति ८०० कलाः । अयं च क्रमः स्थूलः लोकव्यवहारार्थमेव । यतः नक्षत्राणां सूक्ष्मं प्रमाणमन्यदेव वर्तते । वसिष्ठगर्गादिभिः[१] विवाहयात्रादिषु सम्यक्फलसिद्ध्यर्थं सूक्ष्मनक्षत्रानयनं कृतं वर्तते[२] । अत्र अभिजित्सहितनक्षत्राणां गणना कृता वर्तते । तत्सर्वं निबबन्ध स्वीये सिद्धान्तशिरोमणौ ज्योतिर्गगनभास्करः आचार्यभास्करः –

**स्थूलं कृतं भानयनं यदेतज्ज्योतिर्विदां संव्यवहारहेतोः ।**
**सूक्ष्मं प्रवक्ष्येऽथ मुनिप्रणीतं विवाहयात्रादिफलप्रसिद्ध्यै[३] ॥**

ततः नक्षत्राणां भोगमाह –

**अध्यर्धभोगानि ११८५ ।५२ षडत्र तज्ज्ञाः प्रोचुर्विशाखादितिभध्रुवाणि ॥**
**षडर्धभोगानि च ३९५ ।१७ भोगिरुद्रवातान्तकेन्द्राधिपवारुणानि ।**
**शेषाण्यतः पञ्चदशैकभोगान्युक्तो भभोगः शशिमध्यभुक्तिः ७९० ।३५[४] ॥**

सप्तविंशतौ नक्षत्रेषु षट् नक्षत्राणि अध्यर्धभोगानि, षड् अर्धभोगानि, पञ्चदश च भानि चन्द्रमध्यभुक्तिसमभोगानि । अभिजिन्नक्षत्रभोगस्तु "सर्वर्क्षभोगोनितचक्रलिप्ताः वैश्वाग्रतः स्यादभिजिद्भभोगः[५]" इत्युक्त्या २५४ ॥१८ ॥ प्रमाणको भवति । कोष्ठे इदं प्रदर्श्यते ।

| क्र. सं | नक्षत्राणि | नक्षत्रभोगप्रमाणम् |
|---|---|---|
| १ | अश्विनी | ७९०′ \| ३५″ |
| २ | भरणी | ३९५′ \| १७″ |
| ३ | कृत्तिका | ७९०′ \| ३५″ |
| ४ | रोहिणी | ११८५′ \| ५२″ |
| ५ | मृगशिरः | ७९०′ \| ३५″ |
| ६ | आर्द्र | ३९५′ \| १७″ |
| ७ | पुनर्वसुः | ११८५′ \| ५२″ |
| ८ | पुष्यः | ७९०′ \| ३५″ |

[१] एतेषाम् आचार्याणां मूलग्रन्थावलोकनार्थं प्रयत्नः कृतः । उपलब्धेषु ग्रन्थेषु / अवलोकितेषु ग्रन्थेषु अयं विषयः न लब्धः । किन्तु बृहत्संहितायां कानिचन वचनानि लभ्यन्ते ।

[२] "अथ पुलिशवसिष्ठगर्गादिभिर्यद्विवाहादौ सम्यक् फलसिद्ध्यर्थं कथितं तत् सूक्ष्ममिदानीं प्रवक्ष्ये" इति वासनाभाष्ये भास्करः - सिद्धान्तशिरोमणिः – स्पष्टाधिकारः – ७१-७५ ।

[३] सिद्धान्तशिरोमणिः – स्पष्टाधिकारः – ७१ -७२ ।

[४] सिद्धान्तशिरोमणिः – स्पष्टाधिकारः – ७२ -७३ ।

[५] सिद्धान्तशिरोमणिः – स्पष्टाधिकारः – ७४ ।


ISSN : 2320-740X

| | | |
|---|---|---|
| ९ | आश्लेषा | ३९५′ \| १७″ |
| १० | मघा | ७९०′ \| ३५″ |
| ११ | पूर्वाफल्गुनी | ७९०′ \| ३५″ |
| १२ | उत्तराफल्गुनी | ११८५′ \| ५२″ |
| १३ | हस्तः | ७९०′ \| ३५″ |
| १४ | चित्रा | ७९०′ \| ३५″ |
| १५ | स्वाती | ३९५′ \| १७″ |
| १६ | विशाखा | ११८५′ \| ५२″ |
| १७ | अनुराधा | ७९०′ \| ३५″ |
| १८ | ज्येष्ठा | ३९५′ \| १७″ |
| १९ | मूलम् | ७९०′ \| ३५″ |
| २० | पूर्वाषाढा | ७९०′ \| ३५″ |
| २१ | उत्तराषाढा | ११८५′ \| ५२″ |
| २२ | अभिजित् | २५४′ \| १८″ |
| २३ | श्रवणः | ७९०′ \| ३५″ |
| २४ | धनिष्ठा | ७९०′ \| ३५″ |
| २५ | शतभिषक् | ३९५′ \| १७″ |
| २६ | पूर्वाभाद्रपदा | ७९०′ \| ३५″ |
| २७ | उत्तराभाद्रपदा | ११८५′ \| ५२″ |
| २८ | रेवती | ७९०′ \| ३५″ |
| योगकलाः | - | २१६००′ |

चन्द्रस्य मध्यभुक्तिरेव (७९० ॥३५ ॥) समभोगः, स्वीयार्धेन (३९५ ॥ १७ ॥) सहिता मध्यभुक्तिरेव अध्यर्धभोगः, स्वीयार्धेन रहिता मध्यभुक्तिरेव अर्धभोगः भवति ।

अभिजिन्नक्षत्रं विहाय सर्वनक्षत्रभोगः २१३४६ कलाः[१]। चक्रकलाभिः इदम् ऊनीक्रियते चेत् अभिजिद्भोगः लभ्यते ।

तत्र ग्रहस्थितनक्षत्रस्य गतगम्यकालज्ञानार्थमाह –

**कलीकृतादिष्टखगाद्विशोध्य दास्रादिभोगान् गतभानि विद्यात् ॥**
**विशुद्धसङ्ख्यानि गतं तु शेषमशुद्धभोगात् पतितं तदेष्यम् ।**
**गतागते षष्टिगुणे विभक्ते ग्रहस्य भुक्त्या घटिका गतैष्याः[२] ॥**

[१]एवं विभागकरणसमये ३० विकलात्मकं किञ्चित् प्रमाणं त्यक्तं दृश्यते ।
[२]सिद्धान्तशिरोमणिः – स्पष्टाधिकारः – ७४-७५ ।

यस्य ग्रहस्य नक्षत्रं साधनीयं तस्य ग्रहस्य अभीष्टसमयस्य राश्यादिस्फुटः ज्ञेयः। स ग्रहः कलात्मकतया परिवर्तनीयः। तस्मात् कलात्मकग्रहात् अश्विन्यादीनां नक्षत्राणां भोगः शोध्यः। यावत् शोधयितुं शक्यते तावत् शोधयेत्। अत्र यावन्तः भोगाः शुद्धाः तावन्ति गतनक्षत्राणि जानीयात्। शेषाः कलाः वर्तमाननक्षत्रे गतकलाः। ताः अशुद्धभोगात् शोध्याः। शोधनात् लब्धाः कलाः एष्याः भवन्ति। तत्र गतकलाः षष्टिगुणाः ग्रहस्पष्टगत्या भक्ताः गतघटिकाः भवन्ति। एष्यकलाः षष्टिगुणाः ग्रहस्पष्टगत्या भक्ताः गम्यघटिकाः भवन्ति।

अत्रेदानीम् उदाहरणं प्रदर्श्यते। यद्यपि सर्वेषां ग्रहाणां नक्षत्रज्ञानम् अपेक्ष्यते। तथापि पञ्चाङ्गे चन्द्रनक्षत्रस्यैव गतगम्यघटीज्ञानं प्राधान्यं भजत इति कृत्वा चन्द्रनक्षत्रस्योदाहरणं प्रदर्श्यते। तदर्थं कल्पितः राश्यादिः चन्द्रस्फुटः - ०१-०९-३३-२२। कल्पिता चन्द्रस्पष्टगतिः – ८१० कलाः। कलीकृतचन्द्रस्फुटः – २३७३-२२। अस्मात् दास्रादभोगान् विशोधयेत्। तदा –

| | |
|---|---|
| २३७३-२२ | कलात्मकचन्द्रः |
| ७९०-३५ | अश्विनीभोगः |
| १५८२-४७ | शेषः |
| ३९५-१७ | भरणीभोगः |
| ११८७-३० | शेषः |
| ७९०-३५ | कृत्तिकाभोगः |
| ३९६-५५ | शेषः |
| ११८५-५२ | रोहिणीभोगः न शुद्ध्यति |

रोहिणीभोगः न शुद्ध्यति अत्र रोहिणीभोगः न शुद्ध्यतीति रोहिणी चन्द्रस्थितनक्षत्रम्। तत्र शेषः एव गतकलाः ३९६-५५। रोहिणीभोगात् शेषस्य शोधनेन गम्यकलाः लभ्यन्ते।

| | |
|---|---|
| ११८५-५२ | रोहिणीभोगः |
| ३९६-५५ | शेषः गतकलाः |
| ७८८-५७ | गम्यकलाः |

**गतगम्यकालानयनम् -**


ISSN : 2320-740X

$$\frac{\text{गतकलाः} \times ६०}{\text{ग्रहगतिः}} = \text{गतकालः}$$

$$\frac{\text{गम्यकलाः} \times ६०}{\text{ग्रहगतिः}} = \text{गम्यकालः}$$

$$\frac{७८९ \times ६०}{८१०} = \text{५८ घट्यः, २६ विघट्यः च} = \text{गम्यकालः}$$

$$\frac{३९७ \times ६०}{८१०} = \text{२९ घट्यः, २४ विघट्यः च} = \text{गतकालः}$$

आहत्य रोहिणीप्रमाणम् = ५८-२६+२९-२४ = ८७ घट्यः ५० विघट्यः च ।
इदमेव पञ्चाङ्गसाधने उत्क्रमेण क्रियते । तत्र क्रमस्तु सूर्यसिध्दान्ते –

**भभोगोऽष्टशतीलिप्ताः खाश्विशैलास्तथा तिथः ।**
**ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनादिकम् ॥**

इदमेव पञ्चाङ्गसाधने उत्तक्रमेण क्रियते । तत्र क्रमस्तु सूर्यसिद्धान्ते –

**भभोगोऽष्टशतीलिप्ताः खाश्विशैलास्तथा तिथेः ।**
**ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनादिकम्**[1] **॥**

यस्य ग्रहस्य नक्षत्रं साध्यं तस्य ग्रहस्य कलाः साध्याः । ताः कलाः भभोगेन अष्टशतेन कलाभिः विभक्ताः चेत् लब्धितुल्यानि अश्विन्यादिगतनक्षत्राणि भवन्ति । शेषकलाः वर्तमाननक्षत्रे गतकलाः भवन्ति । ताः कलाः नक्षत्रप्रमाणेन शुद्धाः एष्यकलाः भवन्ति । एष्यकलाः ग्रहगत्या भक्ताः फलं गम्यं दिनाद्यं फलम् । एवमेव गतकलाभिः गतं दिनाद्यं फलं स्यात् । गतगम्यफलयोगेन नक्षत्रभोगकालः लभ्यते ।

पूर्वप्रदर्शितोदाहरणे – कलात्मकः चन्द्रः - २३७३-२२ । नक्षत्रभोगेन विभज्यते । तदा २३७३-२२÷८००= लब्धिः २, अतः गतनक्षत्रं भरणी, चन्द्रस्थितनक्षत्रं कृत्तिका । अत्र ग्रहनक्षत्रं अन्यदेव प्राप्तं वर्तते । शेषकलाः ७७३-२२ ग्रहनक्षत्रे कृत्तिकायां गतकलाः । गतकलाः नक्षत्रभोगेन विशोध्यन्ते तदा गम्यकलाः ८००-(७७३-२२)=२६-३८ । अस्मात् गतगम्यकालज्ञानम् ।

[1]सूर्यसिद्धान्तः – आर्षः – २.६४ ।

$$\frac{२७ \times ६०}{८१०} = \text{२ घट्यौ} = \text{गम्यकालः}$$

$$\frac{७७३ \times ६०}{८१०} = \text{५७ घट्यः, १५ विघट्यः च} = \text{गतकालः}$$

आहत्य कृत्तिकाप्रमाणम् = ५७-१५+२ = ५९ घट्यः १५ विघट्यः च ।

एवं प्रकारद्वयेनापि नक्षत्रानयनं कृतम् । अस्मिन् उदाहरणे नक्षत्रभेदः एव दृष्टः । सूक्ष्मनक्षत्रानयने रोहिणीनक्षत्रं प्राप्तम् । स्थूलमानेन च कृत्तिकानक्षत्रम् । आचार्यभास्करमते तु विवाहादिषु सम्यक् फलावाप्तये सूक्ष्मनक्षत्रमेव अपेक्षितम् । तदुक्तम् – **इह यन्नक्षत्रानयनं कृतं तत् स्थूलं लोकव्यवहारार्थमात्रं कृतम् । अथ पुलिशवसिष्ठगर्गादिभिर्यद्विवाहादौ सम्यक् फलसिद्ध्यर्थं कथितं तत् सूक्ष्ममिदानीं प्रवक्ष्ये**[१] इति ।

बृहत्संहितायाम् आचार्यः मिहिरः चन्द्रचाराध्याये चन्द्रमसो नक्षत्रभोगत्वेन यमंशमाह स अंशः अत्र संयुज्यते । तत्र चन्द्रचाराध्याये वराहोक्तिः –

nscenter **षडनागतानि पौष्णाद् द्वादश रौद्राच्च मध्ययोगीनि ।**
**ज्येष्ठाद्यानि नवर्क्षाण्युडुपतिनातीत्य युज्यन्ते** [२] ॥

पौष्णात् रेवतीनक्षत्रात् आरभ्य षट् नक्षत्राणि चन्द्रेण अनागतानि अप्राप्तानि युज्यन्ते अर्थात् संयोगं प्राप्नुवन्ति । तदेवम् – उत्तराभाद्रानक्षत्रस्थः चन्द्रः रेवत्या सह सङ्गमेति । एवं रेवत्यां स्थितः अश्विन्या सह, अश्विन्यां स्थितः भरण्या सह इत्येवम् अग्रेऽपि मृगशिरःपर्यन्तं ज्ञेयम् । रौद्रात् आर्द्रायाः द्वादश नक्षत्राणि मध्ययोगीनि चन्द्रेण सह युज्यन्ते । अर्थात् आर्द्रातः अनुराधापर्यन्तं द्वादशसु नक्षत्रेषु एषां मध्यप्राप्तः चन्द्रः एतैः सह संयोगं प्राप्नोति । ज्येष्ठादीनि नव अतीत्य अतिक्रम्य चन्द्रेण युज्यन्ते । अर्थात् ज्येष्ठातः उत्तराभाद्रापर्यन्तेषु नवसु नक्षत्रेषु अतिक्रम्य चन्द्रः युतः भवति । अर्थात् चन्द्रः मूलस्थः ज्येष्ठया सह सङ्गमेति, पूर्वाषाढास्थः मूलेन सह, उत्तराषाढास्थः पूर्वाषाढाया सह इत्येवम् अन्येषामपि ।

किन्तु अनेन वचसा भास्करोक्तस्य सिद्धिः भवतीति वक्तुं न शक्यते । अत्रोक्तः क्रमः अन्यः इति प्रतिभाति । तथापि अस्य श्लोकस्य व्याख्यानावसरे व्याख्यात्रा भट्टोत्पलेन स्वीयविवृतौ गर्गवचनमिति किञ्चित् सङ्गृहीतम् । तत्तु भास्करोक्तस्य मूलं भवितुमर्हति । तत्र विवरणे एवमस्ति ।

गर्गादिभिः कानिचन नक्षत्राणि अर्धभोगीनि, कानिचन अध्यर्धभोगीनि, कानिचन च समभोगीनि कथितानि । अत्र अर्धभोगीनि अतीत्य युज्यन्ते, अध्यर्धभोगीनि अनागतानि, समभोगीनि मध्यभोगीनि युज्यन्ते । अत्र गर्गवचनम् –

**उत्तराश्च तथादित्यं विशाखा चैव रोहिणी ।**
**एतानि षडध्यर्धभोगीनि महाक्षेत्राणि ॥**

[१]वासनाभाष्ये भास्करः - सिद्धान्तशिरोमणिः – स्पष्टाधिकारः – ७१-७५ ।
[२]बृहत्संहिता – चन्द्रचाराध्याये सप्तमः श्लोकः ।


ISSN : 2320-740X

मघाश्विकृत्तिकासोमतिष्यपित्र्यभगाह्वयाः ।
सावित्रचित्रानुराधा मूलं तोयं च वैष्णवम् ॥
धनिष्ठा चैकपाच्चैव समभागः प्रकीर्तितः ।
एतानि पञ्चदश समभोगीनि मध्यक्षेत्राणि ॥
याम्येन्द्ररुद्रवायव्यसार्पवारुणसंज्ञिताः ।
एतानि षडर्धभोगीनि स्वल्पक्षेत्राणि[१] ॥

Conclusion

एवं भास्करेण यत्प्रतिपादितं तदार्षमतमित्यत्र इदं भट्टोत्पलव्याख्याने दृश्यमानं वचनमेव प्रमाणम् । इदानीं तु लोके व्यावहारिकस्यैव उपयोगः शास्त्रज्ञैः क्रियमाणः दृश्यते इत्यतः विद्वद्भिः इदं भास्करप्रोक्तम् ऋषिमतं भृशं चिन्तनीयम् । यतः पञ्चाङ्गेषु नक्षत्रस्य प्राधान्यं वर्तते[२] । नक्षत्रं सूक्ष्मं चेदेव कर्म सफलं भवति । अतः पञ्चाङ्गकारैः इदं सम्यक् विचिन्त्यं विशेषतः । पञ्चाङ्गप्रकरणे स्थूलं स्थापयन्तु नाम । तथापि कर्मणां मुहूर्तनिरूपणावसरे सूक्ष्मं नक्षत्रम् आश्रित्यैव मुहूर्तः स्थापनीयः इति मे मतिः इत्यलमतिपल्लवितेन ॥

## सन्दर्भग्रन्थसूची


१. **सिद्धान्तशिरोमणिः** – वासनाभाष्यसहितः – श्रीमद्बापूदेवशास्त्रीभिः संशोधितः – चौखम्भा संस्कृत संस्थान – वाराणसी – २००५ ।

२. **सूर्यसिद्धान्तः** – श्रीतत्त्वामृतभाष्यसहितः – श्रीकपिलेश्वरशास्त्रिभिः विरचितः – चौखम्भा संस्कृत संस्थान – वाराणसी – वि. सं. २०६० ।

३. **बृहत्संहिता** – भट्टोत्पलविवरणसहिता, अच्युतानन्तझाव्याख्यासहिता, डा. रामचन्द्रपाण्डेयः, चौखाम्बा विद्याभवनम्, वाराणसी – 2014 ।

४. **विद्यामाधवीयम्** – विद्यामाधवविरचितम्, विष्णुशर्मणः मुहूर्तदीपिकाव्याख्यासहितम्, डा. रामशास्त्री, ORI Mysore संस्थया प्रकाशितम् – १९२३ ।




[१] बृहत्संहिता – चन्द्रचाराध्याये सप्तमश्लोकस्य भट्टोत्पलव्याख्याने ।
[२] "तिथितिथिदलयोगवारतारा जगति भवन्ति यथोत्तरं बलिष्ठाः" – इति विद्यामाधवः ।

# वैदिकसंस्काराणां स्वरूपं, महत्त्वं, कर्णवेधस्य वैज्ञानिकता च
# (संस्कारशब्दस्य व्याकरणव्युत्पत्तिलभ्यार्थसहितम्)

डा. यशस्वी*
सहाचार्यः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः

***लेखसारः*** *– विश्वस्य विश्वैर्मनुष्यैराचरितुं योग्यानां सत्य-अहिंसा-अस्तेयादिरूपाणाम् आचरणानां मनुष्येष्वाधानाय ऋषय आचार्याश्च वेदमुपजीव्य संस्कारविधिम् आविश्चक्रुः, येन मनुष्यस्य अभ्युदयनिःश्रेयसौ सिध्येतां, समाजस्य श्रेयः च सम्पद्येत । नामकरण-उपनयनादिरूपाश्चामी संस्कारा विशिष्य गृह्यसूत्रेषु धर्मसूत्रेषु च प्रकारभेदैः विधानीकृताः । एतेषु संस्कारभेदेष्वन्यतमस्य कर्णवेधस्य चिकित्साविज्ञानदृष्ट्या अपि प्रयोजनं सुश्रुतसंहितायां प्रत्यपाद्यत ।*

***कूटशब्दाः*** *– संस्काराः, वैदिकसंस्काराः, षोडशसंस्काराः, कर्णवेधः, संस्कारविज्ञानम् ।*

## उपक्रमः

विश्ववारायाः वैदिकसंस्कृतेः मनुष्येष्वाधानाय ऋषयः उपनयनादिसंस्काराणां गृह्यसूत्रेषु धर्मसूत्रेषु च विधानं चक्रुः । का नाम वैदिकी संस्कृतिरिति जिज्ञासायामुच्यते वेदेनैव[१] 'सा प्रथमा संस्कृतिर्विश्ववारा इति । नाम यः श्रेष्ठाचारः अस्तेय-अहिंसा-सत्याचरणादिरूपः देशकालाभ्यामनवच्छिन्नः विश्वस्य विश्वैर्मनुष्यैर्वरीतुमर्हः, सा संस्कृतिर्वर्त्ततेतमाम् । तस्यास्संस्कृतेः सत्सङ्कल्पपूर्वकं वैदिकप्रक्रियाविशेषनिर्वहणपुरस्सरञ्च आत्मन्याधानं शरीरे च येन क्रियते ; सः संस्कार इति स्थितम् ।

## संस्काराणां स्वरूपम्

द्वेधा ह्यर्थयोरयं रूढोऽस्ति लोके संस्कारशब्दः । द्वेधा चायं व्युत्पाद्यो व्याकरणेन । तथा हि समुपसृष्टात् कृधातोः भावे[२] घञ्प्रत्यये 'समवाये च'[३] इति सूत्रेण समुदायीभवने अर्थे कृधातोः सुडागमे संस्कारशब्दो व्युत्पद्यते । एवञ्च संस्करणं संस्कारः ; गुणान्तराधानमिति यावत् । अर्थाद् अन्तःकरणे घनीभूता या वासना, तत्र विषयेन्द्रियक्रियाजन्याः प्रभावाः ये समवयन्ति = एकीभवन्ति = प्रतिजन्म प्रतिकर्म च संयुज्यन्ते गुणान्तरत्वेन चेतसि ; ते संस्कारशब्दभाजः । अन्तःकरणे जायमानाः सूक्ष्मप्रभावरूपा एत एव संस्काराः घनीभूय वासनापदवाच्यतां गताः जीवानां जात्यायुर्भोगरूपेण परिणमन्ति । आ कैवल्यात् एभ्यो न मुच्यते जीवः ; सत्यपि जातिदेशकालजन्मादिव्यवधाने । तदुक्तं महर्षिणा पतञ्जलिना योगदर्शने[४] 'ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्' 'जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्' इति । आतश्च शोश्रूयन्ते वाक्यान्येवंविधानि लोके - देवदत्तस्य पूर्वजन्मनः

---

***सम्पर्कसूत्रम्** - 9441451900, , Email- yashaswee4@gmail.com

[१]यजुर्वेदः – 7.14

[२]अष्टाध्यायी - 3.3.18

[३]अष्टाध्यायी - 6.1.137

[४]योगदर्शनम् - 4.8-9

एतस्य जन्मनो वा संस्काराः प्रबलास्सन्ति यदयं साध्वधीते, शास्त्रे नयते, आशु गृह्णात्यर्थं, मङ्क्षु स्मरति च मन्त्रसूत्रादीनीति ।

अमुष्माद् वासनारूपाद् भिन्नेऽर्थे प्रयुज्यमानः संस्कारशब्दः करणघञन्तः संस्क्रियते अनेन इत्यर्थकः । 'अकर्तरि च कारके संज्ञायाम्'[१] इति सूत्रेणात्र घञ् । करणार्थकस्यास्य संस्कारशब्दस्य घञ्विधायके सूत्रे संज्ञायाम् इत्युक्तत्वात् उपनयनादिक्रियाविशेषाणां संस्कार इति संज्ञा । 'सम्परिभ्यां करोतौ भूषणे'[२] इति सूत्रेणात्र सुडागमः कात् पूर्वः श्रूयमाणः सकारः । इह सम् इत्युपसर्गः सम्यगित्यर्थकोऽस्ति; सामर्थ्याच्च श्रेष्ठार्थकः । एवञ्च श्रेष्ठगुणैः श्रेष्ठद्रव्यैः श्रेष्ठकर्मभिः श्रेष्ठान्नपानादिना च मनुष्याणामन्तःकरणस्य शरीरस्य च भूषणं = गुणोत्कर्षः दीक्षापूर्वकं येन वैदिकविधिना क्रियते; सः संस्कारसंज्ञकोऽस्ति । अम्लरसादिना सम्मृष्टं ताम्रपात्रादिकं यथा दीव्यति, तथा संस्कारद्वारा गुणान्तराधानेन शरीरान्तःकरणे उत्कर्षं लभेते ।

**अत्र ध्यातव्यांशाः**

गुणान्तराधानरूपा क्रिया अर्थद्वये समाना चेदपि द्वयोरर्थयोर्मध्ये भेदत्रयं किञ्चिदस्ति ।

I. एकः संस्कारशब्दः भावघञन्तः तदितरश्च करणघञन्त इति कृत्वा आद्यः वासनासंघातरूपार्थकः, द्वितीयस्तु साधनरूपार्थकः ।
II. अन्तःकरणे वासनात्वेन परिणंस्यमानं मनुष्यस्य कर्मणां प्रभावरूपेण आधीयमानं गुणान्तरं साध्वपि स्याद्, असाध्वपि स्याद् आहोस्वित् साध्वसाधु स्याद् । उपनयनादिसंस्कारेण तु यथाशक्ति साधुः, साधीयान्, साधिष्ठश्चैव गुण आधातुमिष्यते ।
III. वासनार्थके संस्कारशब्दे श्रूयमाणः ककारपूर्वः सकारः समवायरूपं विषयं बुद्धावुपस्थापयति । उपनयनाद्यर्थके च संस्कारशब्दे श्रूयमाणः ककारपूर्वः सकारः भूषणरूपं नाम साधुगुणोत्कर्षविषयं बुद्धावुपस्थापयति इति विवेकः ।

**संस्काराणां महत्त्वम्**

क्षेत्रे जातान् शालीन् यथातथं न जक्षिति मनुष्यः । प्रेक्षापूर्वकार्ययं तुषाद्यपनयनजलाधानपाकादिना सूपशाकादिना च संस्कृत्य भुङ्क्ते । इत्थमेव जातं शिशुं परिणतं च बालं पितरः, मातामहाः, पितामहाः, आचार्यादयश्च यथातथं नोपाददते - नाम जातमात्रेण परिणतमात्रेण च तेन सह व्यवहारं न कुर्वन्ति; किन्तु तं सद्विद्या-सदाचार-सदाहारादिभिः संस्कृत्य तेन सह व्यवहरन्ति; येन सः स्वस्य समाजस्य चोन्नतये प्रकल्पते । सद्विद्यादिभिस्तस्य संयोजनम् अभिभावकाः उपनयनादिवैदिकसंस्कारैस्सम्पादयन्ति । अत्रेदं ध्यातव्यं यद् गृह्यसूत्राद्युक्तदिशा संस्काररूपकर्मकाण्डस्य करणं प्रतीकमात्रं, बालादिषु सत्सङ्कल्पजनकमात्रञ्चास्ति । तत्संस्कारे प्रतीकमात्रं कृतस्य कर्मणः प्रत्यायनीयं सदाचरण-तपःकरण-सद्विद्याप्राप्त्यादिकं यदस्ति, तस्य प्राप्तये सततं प्रयतनमेव संस्काराणामुद्देश्यमस्ति । एवंरूपेण आत्मसात्कृतास्संस्कारा एव

[१] अष्टाध्यायी - 3.3.17
[२] अष्टाध्यायी - 6.1.136

ISSN : 2320-740X

शरीरेन्द्रियान्तःकरणस्थाः दुर्वासनाः विनाश्य दुर्बलीकृत्य वा तत्र सात्विकवासनाः जनयन्ति ; तदद्वारा जनः कश्चित् सुखं समेधते, धीरश्च कश्चित् प्रत्यगात्मानमीक्षते ; कण्टकेनैव कण्टकम् इति न्यायेन कश्चिच्च द्वन्द्वातीतः, परोपकारनिरतः सात्विकसंस्कारैः राजसतामससंस्कारानभिभूय परमवैराग्येण अन्तःकरणादपि मुक्त्वा ब्रह्मसंस्थोऽमृतत्वमेति, कैवल्यमाप्नोति[१] । सर्वमिदमभिसमीक्ष्य एतद्युगे वेदानां वैदिकसंस्कृतेश्च समुद्धारकैः दयानन्दभगवत्पादैः वैदिकसंस्काराणां निरूपके वेदादिप्रमाणान्विते स्वीये संस्कारविधावेवं न्यगादि[२]

**‘वेदादिशास्त्रसिद्धान्तमाध्याय परमादरात् ।**
**आर्यैतिह्यं पुरस्कृत्य शरीरात्मविशुद्धये ॥**
**संस्कारैस्संस्कृतं यद्यन्मेध्यमत्र तदुत्तमम् ।**
**असंस्कृतं तु यल्लोके तदमेध्यं प्रकीर्त्यते ॥**
**अतः संस्कारकरणे क्रियतामुद्यमो बुधैः ।**
**शिक्षयौषधिभिर्नित्यं सर्वथा सुखवर्धनः ॥**

‘जिस करके शरीर और आत्मा सुसंस्कृत होने से धर्म, अर्थ, काम और मोक्ष को प्राप्त हो सकते हैं और सन्तान अत्यन्त योग्य होते हैं, इसलिये संस्कारों का करना कराना सब मनुष्यों को अति उचित है’ इति ।

**कर्णवेधसंस्कारस्य वैज्ञानिकता**

समुपलब्धेषु प्रसिद्धगृह्यसूत्रेषु कात्यायनपरिशिष्टयुक्ते पारस्करगृह्यसूत्रे ‘भद्रं कर्णेभिः श्रृणुयाम देवा०[३]’ इत्यादिमन्त्रं प्रमाणत्वेनोपजीव्य जातस्य शिशोः तृतीये पञ्चमे वा वर्षे कर्णवेध-संस्कारो विहितः । संस्कारस्यामुष्य प्रयोजनं सुश्रुतसंहितायामेवं न्यरूपि[४] - ‘रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते’ इति । कर्णाभरणाभ्यां कर्णौ सुशोभेते इति तु ज्ञातमेव किन्तु रक्षा कस्मादुच्यते इत्येवं जिज्ञासा भवत्येव । तस्मादुक्तं तत्समाधये[५] -

**‘शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम् । व्यत्यासाद् वा शिरो विध्येदन्त्रवृद्धिनिवृत्तये’ । इति**

कर्णवेधाद् अन्त्रवृद्धिरोगः (HERNIA) निवर्त्यते इति सुश्रुतः प्राह । सुश्रुतसंहितायां कर्णवेधविषये सुबहु वर्णितमस्ति, येनेदमनुमीयते यदस्य संस्कारस्य नैकविधानि वैज्ञानिकप्रयोजनानि विदितान्यासन् तत्कालिकवैद्यानाम् । ACUPUNCTURE इत्याख्यचिकित्सापद्धतेर्दृष्ट्या कर्णवेधस्य भृशं महत्त्वं भवितुमर्हति । अत एव कुशलेन भिषक्प्रवरेण बहुसावधानतया कर्णवेधः कार्य इति निरदेशि सुश्रुतादिषु ।

एतावता शोधपत्रेण वैदिकसंस्काराणां स्वरूपं, महत्त्वं, कर्णवेधस्य वैज्ञानिकता च दिङ्मात्रमिह प्रस्तुतम् ।

---

[१] योगदर्शनम् - चतुर्थपादः, अन्तिमसूत्रं द्रष्टव्यम्
[२] संस्कारविधिः – प्रारम्भिकश्लोकाः भूमिका च
[३] यजुर्वेदः – 25.21
[४] सुश्रुतसंहिता – सूत्रस्थानम्-26.1
[५] सुश्रुतसंहिता – चिकित्सास्थानम् – 19.21


ISSN : 2320-740X

## सन्दर्भग्रन्थसूची


1. संस्कारविधिः – स्वामी दयानन्दसरस्वती, सम्पा. - मीमांसको युधिष्ठिरः, प्रका.- रामलाल कपूर ट्रस्ट (सोनीपत, हरियाणा) , सं. – 1974 ।
2. अष्टाध्यायी - सम्पा. - जिज्ञासुः ब्रह्मदत्तः, प्रका. - रामलाल कपूर ट्रस्ट (सोनीपत,हरियाणा) , सं. – 1998 ।
3. योगदर्शनम्- आचार्यः उदयवीर-शास्त्री, सम्पा.- विजयकुमारगोविन्दरामहसानन्दः, प्रका. – आर्यसाहित्यभवनम्, सं. – 2021 ।
4. सुश्रुतसंहिता - प्रका. - चौखम्बा संस्कृत सिरिज, बनारस-१, सं. – 2011 ।




# नाथसम्प्रदायस्य ऐतहासिकविकासः, साधनापद्धतिः, साम्प्रदायिकसंरचना च

डॉ० छबिलाल न्यौपानेः*
सहायक-प्राचार्यः, का.द.सं.वि.वि.,
बिहारप्रदेशः

***लेखसारः*** – प्रस्तुतोऽयं शोधलेखः नाथसम्प्रदायस्य ऐतिहासिक-क्रमविकासस्य, दार्शनिक-अधिष्ठानस्य, योगसाधना-प्रणाल्याः, साम्प्रदायिक-संरचनायाश्च साङ्गोपाङ्गं विश्लेषणात्मकमध्ययनं प्रस्तौति। विशेषतः नेपालदेशस्य दाङ्-जनपदे प्रतिष्ठितस्य गोरक्षरत्ननाथमठस्य (चौघेरा) विशिष्टपरम्परायाः, तत्रत्यायाः पीर-पद्धतेः, दीक्षा-विधेः, अहर्निशं प्रचलन्त्याः उपासनायाश्च शास्त्रीयं वैज्ञानिकं च विवेचनमत्र विहितम्। नाथसम्प्रदायो वस्तुतः शैवयोगपरम्परायाः एका विशिष्टा धारा अस्ति, या हठयोगम्, तन्त्रसाधनाम्, गुरुकेन्द्रित-अध्यात्ममार्गं च प्राधान्येनाङ्गीकरोति। अस्य सम्प्रदायस्य अनुयायिनः लोकपरम्परायां कर्णभेदिनः (कानफटा) योगिनः इति नाम्नाऽपि प्रसिद्धाः सन्ति। भगवद्-गोरक्षनाथः अस्य सम्प्रदायस्य प्रधानः पुनस्सङ्घटकः आद्यप्रवर्तकश्च मन्यते। चौघेरा-स्थितः रत्ननाथमठः अस्य सम्प्रदायस्य एकं प्रमुखं सिद्धपीठं वर्तते, यत्र अद्यापि अनन्यसाधारणी पीर-स्थापना-परम्परा, श्रवणविदारणपूर्विका दीक्षा-विधिः, पात्रदेवतायाः विशिष्टा पूजापद्धतिश्च अक्षुण्णा वर्तते। एतदध्ययनं समकालीन-परिप्रेक्ष्ये नाथसम्प्रदायस्य प्रासङ्गिकतां, विद्यमानानि आह्वानानि, भविष्यत्कालीन-दिशानिर्धारणं च कर्तुं प्रयतते।

***कूटशब्दाः*** – नाथसम्प्रदायः, भगवद्-गोरक्षनाथः, सिद्ध-रत्ननाथः, हठयोगः, कर्णभेदिनः योगिनः , दर्शनी-साधकाः, योगसाधना-प्रणाली, पीर-परम्परा, मठप्राध्यक्ष्यम्, चौघेरा-रत्ननाथ-सिद्धपीठम्।

## १. प्रस्तावना

नाथसम्प्रदायस्तावत् हिन्दू-धर्मपरम्परायाः सा गभीरा योगधारा वर्तते, यया आध्यात्मिक-साधनायाः क्षेत्रे किमपि अलौकिकम् अद्वितीयं च योगदानं विहितम्। अयं सम्प्रदायः मुख्यतया हठयोगम्, तन्त्रसाधनाम्, गुरुकेन्द्रित-उपासना-पद्धतिं च प्राधान्येन अङ्गीकरोति।

नाथ-शब्दस्य व्युत्पत्तिलभ्यः अर्थः स्वामी, प्रभुः, रक्षको वा भवति। ऋग्वेदादि-प्राचीन-वाङ्मयात् आरभ्य नाथ-इति शब्दः सृष्टिकर्तुः, ज्ञातुः, रक्षकस्य च अर्थे प्रयुक्तः उपलभ्यते।[१]

पाणिनीय-अष्टाध्यायी-परवर्तिन्यां परम्परायां 'नाथृ-याचनोपतापैश्वर्याशीःषु' (धातुपाठः १०.४२) इति सूत्रानुसारं याचना, प्रार्थना, स्तुतिः, सन्तापात् त्राणम्, ईश्वरात् ऐश्वर्यप्राप्तिः, आशिषः संवरणं चेत्येतेषु अर्थेषु अस्य शब्दस्य विकासः जातः दृश्यते।[२]

भगवद्-गोरक्षनाथस्य 'गोरखवाणीग्रन्थे नाथशब्दः द्विधा प्रयुक्तः— प्रथमतः स्रष्टृ-रूपेण (रचयिता), द्वितीयतश्च परमतत्त्व-रूपेण। इत्थं नाथ-शब्देन मूलतः सृष्टेः निर्मात्री 'माया' तथा तस्याः सञ्चालकं परमतत्त्वम् इति उभयोः बोधो जायते।[३]

नेपालदेशे नाथसम्प्रदायस्य इतिहासः, तस्य विकासः, व्यापकः प्रभावश्च अद्यावधि पर्याप्ततया

---

***सम्पर्कसूत्रम्** - 9560754554, Email- chhabilalneupane@hotmail.com

[१] ऋग्वेदे (६/२६/५) – 'नाथ' इति शब्दः सृष्टिकर्तुः वाचकत्वेन प्रयुक्तः अस्ति।

[२] पाणिनीयायाम् अष्टाध्याय्याम् (३/२/१) – 'नाथ्' धातोः व्याकरणिकी व्याख्या वर्तते।

[३] गोरखवाणी, सबदी २ – अस्मिन् पदे भगवता गोरक्षनाथेन 'नाथ-तत्त्वस्य' तात्विकी विवेचना कृता।

शोधविषयतां नापन्नः। एतामेव पृष्ठभूमिकां स्वीकृत्य नाथसम्प्रदायस्य बहु-आयामिकम् अध्ययनं प्रस्तोतुम् अयं शोधलेखः प्रयतते। विशेषतः नेपालस्य दाङ्-जनपदे चौघेरा-स्थाने प्रतिष्ठितस्य गोरक्ष-रत्ननाथ-मठस्य परम्परा, तत्रत्या साधनापद्धतिः, साम्प्रदायिक-संरचनायाः विश्लेषणं चास्य शोधस्य केन्द्रबिन्दुः वर्तते।

### २. नाथसम्प्रदायः - ऐतिहासिक-पृष्ठभूमिः

### २.१ नाथ-शब्दस्य व्युत्पत्तिः अर्थश्च

नाथ-शब्दस्य विश्लेषणे एका दार्शनिकी प्रक्रिया - न+अथ इति वर्णद्वयस्य योगं स्वीकरोति। संस्कृत-वाङ्मये अथशब्दः मङ्गलाचरणरूपेण ग्रन्थारम्भस्य सूचकः वर्तते। यथा ब्रह्मसूत्रे (१/१/१)— **"अथातो ब्रह्मजिज्ञासा"**। अस्मिन् सन्दर्भे 'न+अथ' इत्यस्य तात्पर्यं भवति— यः अथ (प्रारम्भः) तथा इति (समाप्तिः) इत्यनयोः सीमाद्वयात् परं वर्तते, सः ब्रह्मवाचकः शब्दः एव नाथ इति।[१]

यास्कप्रणीत-निरुक्तानुसारं थर्व-धातुः गत्यर्थकः वर्तते, अतः थर्वन्-शब्दस्य अर्थः गतिशीलः इति जायते। नाथ-शब्दे अन्तर्निहितः अथ-भागः अविचलत्वं, स्थैर्यं वा द्योतयति, यत् योगस्य योगिनां वा लक्षणं वर्तते। इयं व्युत्पत्तिः नाथपरम्परायाः योगिनश्च प्राचीनतां प्राग्वैदिककालीनां साधयति। अस्य ऐतिहासिकं साक्ष्यं सिन्धुघाटी-सभ्यतायाः उत्खनने प्राप्ता महायोगिनः मूर्तिरस्ति।[२]

ऋग्वेदे नाथशब्दः क्रियाशक्तिरूपेण प्रयुक्तः दृश्यते, यस्य भावः अस्ति— 'हे शक्ते! त्वं मम ऊर्जायाः वर्धिका असि, त्वमेव वित्तवर्धिका (ऐश्वर्यदात्री) असि'। आप्टेमहोदयस्य संस्कृतकोशे नाथ (नाथ्+अच्) शब्दः पुंल्लिङ्ग-संज्ञात्वेन स्वीकृतः, यस्य अर्थः स्वामी, प्रभुः वा निर्दिष्टः।[३]

### २.२ सम्प्रदायस्य स्थापना विकासश्च

पौरस्त्यकालविभाजनदृष्ट्या नाथसम्प्रदायस्य प्रादुर्भावः 'स्मृतिकाले' (ई.पू. ५०० तः ईस्वीय ९०० पर्यन्तम्) सञ्जातः इति प्रतीयते। अस्मिन्नेव कालखण्डे मनु-याज्ञवल्क्य-नारद-विष्णु-पराशरादि-स्मृतिग्रन्थानां रचना अभवत्, यैः ग्रन्थैः वर्णाश्रम-व्यवस्थायाः सुदृढीकरणस्य प्रयासो विहितः। अस्यैव परिणामस्वरूपं धर्मस्य रूढिवादित्वात्, कठोरतायाः, विकृतिभ्यश्च समाजस्य उपेक्षितं वर्गं मोचयितुं बौद्ध-जैन-सिक्ख-रसेश्वर-नाथमतानि अस्तित्वं प्रापुः।[४]

भगवद्-गोरक्षनाथेन प्राचीनस्य शैवयोगस्य अभिनवा व्याख्या विहिता, तस्य च नाथयोगः इति नामकरणं कृत्वा सः मार्गः युगानुकूलः (युगसम्मतः) कृतः। तेन सम्पूर्णे एशिया-महाद्वीपे नाथसम्प्रदायस्य एका जीवन्ती मठ-व्यवस्था संस्थापिता।

गोरक्षनाथस्य आविर्भावकाले जगति वैदिकधर्मः, बौद्धधर्मः, जैनधर्मः, शैव-पाशुपत-कापालिक-मतानि, काश्मीरशैव-वीरशैव-रसेश्वर-सिद्धान्ताः इत्यादयः अनेके धर्माः सम्प्रदायाश्च प्रचलिताः आसन्। तस्मिन् समये एतेषु सर्वेषु पन्थेषु काश्चन आन्तरिकविकृतयः समाविष्टाः आसन्, यासां

[१] ब्रह्मसूत्रस्य (१/१/१) शाङ्करभाष्ये – 'अथ' इति शब्दः मङ्गलसूचकः आरम्भार्थश्च स्वीकृतः।

[२] सिन्धुसभ्यतायाः उत्खनने – प्राप्तां योगिनः मूर्तिं मजुमदार महोदयः 'महायोगिनः शिवस्य' आदिप्रतिमारूपेण स्वीकरोति।

[३] आप्टे, संस्कृत-हिन्दी-कोशः – पृष्ठम् ४५०।

[४] द्विवेदी, ग्रन्थावली – ६ – पृ. २०-२५।

परिष्करणं नाथयोगस्य मुख्यं लक्ष्यमासीत् ।[१]

**२.३ गोरखनाथस्य उत्पत्तिः महत्त्वं च**

भगवद्-गोरक्षनाथस्य प्रादुर्भावविषये लोकपरम्परायां मतद्वयं प्रचलितमस्ति— एकं तु मत्स्यतः अपरं च गोमयात् इति ।

श्रीसुरतनाथयोगिनाम् मतानुसारं, गोरखनाथस्य गुरुः मत्स्येन्द्रनाथः मन्यते। लोकप्रसिद्धा किम्वदन्ती वर्तते यत् **मत्स्यस्य मुखात् निर्गतत्वात् सः मत्स्येन्द्रनाथः** इति संज्ञया विभूषितः, तेनैव महात्मना गोरखनाथाय योगधर्मस्य प्रचार-प्रसार-उत्तरदायित्वं प्रदत्तम् ।[२]

भारतवर्षे तु गोरखनाथस्य उत्पत्तिः गोमयात् अभवत् इति जनश्रुतिः बलवती अस्ति। अस्याः कथायाः सारः अयमस्ति यत्— मत्स्येन्द्रनाथः केनापि दम्पतिना प्रार्थितः सन् सन्तानप्राप्तये योगविभूतिं प्रदत्तवान्, किन्तु तेन दम्पतिना सा विभूतिः अविश्वासवशात् गोमये प्रक्षिप्ता। तस्मादेव गोमयात् दिव्यबालकस्य उत्पत्तिः अभवत्। **गौः (धेनुः) इत्यस्याः रसेन (कृपया) रक्षितत्वात् सः बालकः गोरक्षनाथः** इति नाम्ना विख्यातो जातः ।[३]

गोरक्ष-रत्ननाथयोः सम्बन्धविषये अपि एका रुचिकरा कथा समुपलभ्यते। नेपालदेशस्य दाङ्-राज्यस्य नृपः रत्नपरीक्षकः यदा वने मृगयार्थं प्रविष्टः, तदा गोरखनाथः वराहरूपं धृत्वा तस्य सम्मुखम् उपतस्थे। राज्ञा प्रहृतेन बाणेन विद्धः सः वराहः यदा पलायितः, तदा राजा तस्य अनुसरणं कृतवान्। अन्ते राजा अपश्यत् यत्- कश्चन तेजस्वी योगी स्वदेहात् बाणं निष्कास्य पुरतः संस्थाप्य ध्याने निमग्नः अस्ति। तदनन्तरं गोरखनाथः राज्ञे आत्मज्ञानस्य उपदेशं दत्त्वा तं स्वशिष्यत्वेन अङ्गीकृतवान्, येन सः योगी रत्ननाथः इति नाम्ना प्रसिद्धः अभवत् ।[४]

**३. नाथसम्प्रदायस्य दार्शनिकाधिष्ठानम्**

**३.१ योगः तन्त्रं च**

नाथसम्प्रदायस्य मुख्यं दर्शनं योगः तन्त्रं च वर्तते। अस्मिन् सन्दर्भे श्रीदेवनाथयोगिनां मतम् उल्लेखनीयं वर्तते— "नाथसम्प्रदायः योगं तन्त्रं च स्वकीयत्वेन मुख्यदर्शनरूपेण अङ्गीकरोति। योगं विना संसारस्य अस्तित्वं नैव सम्भवति। जीव-ब्रह्मणोः अर्थात् आत्म-परमात्मनोः एकीभावाय (संयोजनाय) योगः अनिवार्यो वर्तते।"[५]

नाथदर्शने परमतत्त्वम् अनादिनिधनम् अप्रमेयं च इति प्रोक्तम्। व्युत्पत्तिदृष्ट्या नाथ-शब्दः कश्चन निषेधमुखी-उद्घोषः अस्ति, यतोहि तस्य परमार्थतत्त्वस्य न तु आदिः (प्रारम्भः) विद्यते, न च अन्तः (विनाशः), नापि तत् केनापि प्रमाणेन प्रमेयम् (ज्ञेयम्) अस्ति। एतादृशम् अज्ञेयतत्त्वम् उद्दिश्यैव महावैयाकरणेन भर्तृहरिणा अपि '**अनादिनिधनं ब्रह्म**' (वाक्यपदीयम् १.१) इति प्रतिपादितम् ।[६]

नाथसम्प्रदायिनः आगमानुयायिनः सन्ति। तेषां दृष्टौ सांसारिक-भोग-विलासादिषु किमपि प्रयोजनं

[१]उपाध्यायः, गोरक्षनाथः – पृ. १३६-१४० ।
[२]सुरतनाथयोगी – वयः ८५ वर्षाणि, चौघेरामठस्य वरिष्ठः विद्वान् ।
[३]इयं कथा – उत्तरभारते विशेषरूपेण प्रसिद्धा वर्तते ।
[४]चौघेरामठस्य स्थानीया जनश्रुतिः / किम्वदन्ती ।
[५]देवनाथयोगी – चौघेरामठस्य पूर्व-पीर-महाभागः ।
[६]भर्तृहरिः, वाक्यपदीयम्, ब्रह्मकाण्डम् ।


ISSN : 2320-740X

न भवति । तद्विपरीतं निगमानुयायिनः (अत्र कर्मकाण्डपराः अभिप्रेताः) संसारे कथमुपभोगः करणीयः, के च तस्य लाभाः इत्येतेषु विषयेषु प्रवृत्ताः भवन्ति । नाथयोगिनां कृते सुखभोगस्य सर्वथा अभावः वर्तते, अतः ते 'आगम-मार्गिणः' इति निगद्यन्ते ।[१]

**३.२ पिण्ड-ब्रह्माण्डवादः**

नाथसम्प्रदायस्य अपरं महत्त्वपूर्णं दार्शनिकम् अधिष्ठानं 'पिण्ड-ब्रह्माण्डवादः' वर्तते । अस्य सिद्धान्तस्यानुसारं व्यष्टि-शरीरे (पिण्डे) तथा समष्टि-संसारे (ब्रह्माण्डे) च कश्चन अभिन्नः तादात्म्य-सम्बन्धः विद्यते । यदुक्तं— "यत् पिण्डे तद् ब्रह्माण्डे" इति । मानवशरीरस्य अन्तरे एव सम्पूर्णस्य विश्वस्य सारतत्त्वानि, नद्यः, पर्वताः, ग्रहाः, नक्षत्राणि च सूक्ष्मरूपेण अवस्थितानि सन्ति । योगसाधनायाः माध्यमेन शरीरान्तर्गतं चैतन्यं (कुण्डलिनीं) जागृतं कृत्वा साधकः ब्रह्माण्डीय-चेतनया सह एकाकारतां प्राप्तुं शक्नोति ।

अस्याः आध्यात्मिक्याः प्रक्रियायाः स्वरूपं गोरखवाण्यां स्पष्टीकृतम् अस्ति—

**"आपा मेटीला सतगुरू पेजीला, ना कररवा जोग जुगत का हेला । गुरू मुषि भोरी जब पैषचला, तब सहज ज्योषत का मेला ॥"**[२]

अस्याः पङ्क्तेः दार्शनिकान्वयः - साधकः स्वकीयम् अहंकारं विलाप्य सद्गुरुं शरणं गच्छेत् । योगसाधनायाः कूट-प्रक्रियाणां कदापि उपेक्षा न करणीया । यदा साधकः गुरोः मुखारविन्दात् उपदेशं प्राप्य अन्तःकरणरूपिण्यां झोलिकायां (भिक्षापात्रे) ज्ञानं सङ्गृह्णाति, तदा तस्य अन्तः सहज-ज्योतेः (परमात्मनः प्रकाशस्य) साक्षात्कारः जायते ।

**३.३ गुरुवादः**

नाथसम्प्रदाये गुरुतत्त्वस्य स्थानं सर्वोपरि, अनन्यसाधारणं च विद्यते । नाथयोगिनां गूढ-साधनामार्गे प्रव्रजितुं गुरुकृपा अनिवार्यमधिष्ठानं वर्तते । गुरोः कारुण्यं कटाक्षं च विना साधनायां सिद्धिः सर्वथा दुर्लभा । नाथयोग-प्रक्रियायां निरञ्जन-पदस्य (परममोक्षस्य) प्राप्तये गुरोः मार्गनिर्देशनम् अपरिहार्यं मन्यते ।

अस्मिन् सन्दर्भे हठयोगप्रदीपिकायाः मङ्गलश्लोकः स्मरणीयः —

**"नमः शिवाय गुरवे नादबिन्दुकलात्मने ।**
**निरंजनपदं याति नित्यं यत्र परायणः ॥"**[३]

नाथपरम्परायाः समग्रापि साधना गुरुतत्त्वमाश्रित्यैव प्रवर्तते । योगसाधनायाः गुरुतत्त्वेन सह अविनाभाव-सम्बन्धः अङ्गीकृतः । अस्मिन् मार्गे साधकेन काश्चन रहस्यमय्यः कठोराश्च पद्धतयः अनुसर्तव्याः भवन्ति । एतादृश्याः तीव्र-साधनायाः समये प्रमादः, अज्ञानं वा शिष्यस्य प्राणहानिमपि कर्तुं शक्नोति, अतः पदक्षेपे-पदक्षेपे गुरोः संरक्षणम् आवश्यकं भवति ।[४]

**४. नाथसम्प्रदायस्य साधना-पद्धतिः**

---

[१] देवनाथयोगिनः साक्षात्कारः – २०७७ आषाढ ५ ।
[२] नागार्जुनः, पौडी-हस्तलेखः – संवत् ३ ।
[३] अयं श्लोकः – नाथसम्प्रदायस्य 'गुरुस्तोत्रे' उल्लिखितः अस्ति ।
[४] द्विवेदी, पूर्वोक्तम् – पृ. १३७ ।

### ४.१ हठयोगः

नाथसम्प्रदायस्य साधनाप्रणाल्याः मुख्यकेन्द्रं हठयोगो वर्तते। हठयोगस्य अभ्यासेन एव राजयोगस्य सिद्धिः जायते। हठयोगः मुख्यतया प्राणायाम-प्रधानः मार्गः मन्यते। लययोगस्य राजयोगस्य च निष्पत्तौ प्राणायामः हठयोगश्च परमसहकारिणौ भवतः ।[१]

हठयोगस्य द्वे विधाने प्रसिद्धे स्तः । प्रथमं तावत्— भगवद्-गोरक्षनाथात् पूर्वं प्रचरितः हठयोगः, द्वितीयं च— गोरक्षनाथेन उपदिष्टः हठयोगः ।

**प्राचीनहठयोगः -** अस्मिन् योगमार्गे महर्षिपतञ्जलिप्रोक्तस्य अष्टाङ्गयोगस्य (यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधीनाम्) पूर्णतया अनुसरणं क्रियते ।

**गोरक्षप्रणीत-हठयोगः -** भगवता गोरक्षनाथेन यः योगः उपदिष्टः, सः 'षडङ्गयोगः' इति नाम्ना प्रसिद्धः । अस्मिन् अष्टाङ्गयोगस्य अन्तिमानां षण्णाम् अङ्गानाम् (आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधीनाम्) एव प्राधान्यं स्वीकृतम्, यतोहि अत्र यम-नियमपालनं योगिनः स्वाभाविके चरित्रे एव अन्तर्भूतं मन्यते ।[२]

### ४.२ षडङ्गयोगः

नाथसम्प्रदाये षडङ्गयोगस्य अनन्यसाधारणं महत्त्वं वर्तते। अस्मिन् योगमार्गे अष्टाङ्गयोगस्य प्रथमद्वयं (यम-नियमौ) परित्यज्य आसन-प्राणायाम-प्रत्याहार-धारणा- ध्यान-समाधि-रूपाणि षट् अङ्गानि स्वीक्रियन्ते-

### संक्षिप्तग्रन्थसूची

१. **आसनम् - "स्थिरसुखमासनम्"**[३] इति लक्षणानुसारं स्थिरतया सुखपूर्वकं च उपवेशनम् आसनं कथ्यते । हठयोगस्य ग्रन्थेषु बहूनाम् आसनानां वर्णनं लभते, किन्तु तेषु सिद्धासन-पद्मासन-सिंहासन-भद्रासनानि श्रेष्ठतमानि मन्यन्ते । गोरक्षयोगे आसनं प्राथमिकम् अनिवार्यं च तत्त्वं वर्तते ।[४]

२. **प्राणायामः -** प्राणायामस्य मुख्यं लक्ष्यं नाडीशुद्धिः अस्ति । सिद्धसिद्धान्तपद्धतेः अनुसारं प्राणस्य स्थिरता एव प्राणायामः । अस्मिन् रेचक-पूरक-कुम्भक-सङ्घट्टीकरण-रूपाः चतस्रः क्रियाः नाडीशुद्ध्यर्थं निर्दिष्टाः सन्ति ।[५] प्राणायामेन एव बिन्दुरक्षा, अजरत्वं, अमरत्वं, दिव्यदेहस्य प्राप्तिश्च सम्भवति । प्राणस्य निग्रहेण चित्तं स्वतः स्थिरं भवति ।[६]

३. **प्रत्याहारः -** बाह्येन्द्रियाणां विषयेभ्यः निवर्तनं चित्तस्य च उन्मुखीकरणं प्रत्याहारः इत्युच्यते। प्रत्याहारबलेन मनः, प्राणः, बिन्दुश्च वशं गच्छन्ति । अस्मिन् अवस्थायां चित्तवृत्तयः आत्म-परमात्मनोः एकीभूतस्वरूपे निमग्नाः भवन्ति ।[७]

४. **धारणा -** चित्तस्य एकस्मिन् निश्चितलक्षितार्थे स्थिरीकरणं धारणा अस्ति। धारणया मानसिकी दृढता

[१] सोलङ्की, नाथपन्थः निर्गुणसन्तकाव्यञ्च – पृ. १९० ।
[२] तत्रैव – पृ. १९१ ।
[३] योगसूत्रम् २.४६ ।
[४] गोरक्षयोगः, आसन-प्रकरणम् ।
[५] प्राणतोषिणी – पृ. ८३५ ।
[६] द्विवेदी, पूर्वोक्तम् – पृ. १३३ ।
[७] राजस्थान-पुरातन-ग्रन्थमाला १९० – पृ. २० ।

 ISSN : 2320-740X

उत्पद्यते । नाथपरम्परायां धारणा पञ्चविधा प्रोक्ता— पार्थिवी, आप्यी, वैश्वानरी (आग्नेयी), वायवी, नभी (आकाशी) च ।[१]

५. **ध्यानम्** - ज्ञानयुक्ता, अपरिवर्तिता, अविचलस्थितेः नाम ध्यानम् । अस्य द्वौ भेदौ स्तः— सगुणं निर्गुणं च । भगवते गोरक्षनाथाय निर्गुणं निराकारं च ध्यानमेव अभिप्रेतमस्ति ।[२]

६. **समाधिः** - यत्र ध्याता ध्येयं च एकीभूतौ भवतः, सा स्थितिः समाधिः । समाधिना एव मोक्षः (परमपदम्) प्राप्यते । गोरक्षनाथः समाधेः पराकाष्ठां सहजावस्था इति मन्यते ।[३]

## ५. नाथसम्प्रदायस्य द्वादश पन्थानः

नाथसम्प्रदाये द्वादश-पथानां विशिष्टं महत्त्वं विद्यते । योगि-विलासनाथ-मतानुसारेण तेषां विवरणम् अस्ति-[४]

## संक्षिप्तग्रन्थसूची

१. **सत्यनाथी पन्थाः** - अस्य मूलप्रवर्तकः आदिनाथः शिवः । अस्य मुख्यानि स्थानानि पातालपुरी (भुवनेश्वरम्, ओडिशाराज्यम्) उत्तराखण्डः च स्तः ।

२. **रामनाथी पन्थाः** - अस्य प्रवर्तकः भगवान् परशुरामः । अस्य प्रभावक्षेत्रं हरियाणाराज्यं नेपालदेशः च स्तः ।

३. **पागलपथः** - अस्य प्रचारकः पालकनाथः । अस्य मुख्यकेन्द्रे रोहतास-पेशावरम् (पाकिस्तानम्) हरियाणा-राज्यस्य अस्थलबोहर-स्थानं च स्तः ।

४. **पाव-पथः** - अस्य उत्तराधिकारी हनुमान्नाथः । अस्य प्रधानपीठं नेपालदेशस्य हनुमानगढी-स्थाने अस्ति ।

५. **धर्मनाथी पन्थाः** - अस्य उत्तराधिकारी धर्मनाथः । अस्य प्रमुखं स्थानं नेपालदेशस्य बर्दिया-जनपदे अस्ति ।

६. **माननाथी पन्थाः** - अस्य प्रवर्तकः राजा मानसिंहः । अस्य मुख्यस्थानं लखनऊनगरस्य फुलवारी-क्षेत्रे वर्तते ।

७. **किपलनाथपथः** - अस्य मूलप्रवर्तकः गोरक्षनाथः, उत्तराधिकारी च किपलनाथः । अस्य प्रभावः बङ्गालराज्यस्य गोरखवंशी-क्षेत्रे हरियाणाराज्यस्य झिहाण-स्थाने च स्तः ।

८. **गङ्गानाथी पन्थाः** - अस्य प्रवर्तकौ भगीरथ-भीष्मौ । अस्य प्रमुखाणि स्थानानि गङ्गासागरम् (बङ्गालराज्यम्) गुरुदासपुरम् (पञ्जाबः) च स्तः ।

९. **नटेश्वरी (दयानाथी) पन्थाः** - अस्य प्रवर्तकः लक्ष्मणः । अस्य मुख्यस्थानं पञ्जाब-राज्यस्य गोरखवटल्ला-क्षेत्रे अस्ति ।

१०. **आई (आयके) पन्थाः** - अस्य उत्तराधिकारिणौ उदयनाथः (पार्वती भवानी) तथा योगिनीविमलानाथः च स्तः ।

---

[१]तत्रैव ।
[२]गोरखवाणी, सबदी ५ ।
[३]उपाध्यायः, पूर्वोक्तम् – पृ. १४२ ।
[४]योगी विलासनाथः, नाथपन्थ-परिचयः – हस्तलिखितग्रन्थः ।

११. **बैराग-पन्थाः** - अस्य नामाङ्कनकर्ता राजा बैरागी । अस्य प्रधानं स्थानं राजस्थानराज्यस्य पन्चासे-क्षेत्रे अस्ति ।

१२. **रावल-पन्थाः** - अस्य नामकरणं सिद्धयोगि-नरसिंहेन कृतम् । अस्य मुख्यस्थानम् उज्जयिन्याः महाकालक्षेत्रं वर्तते ।

एतेषां द्वादश-पथानां मध्ये षट् (६) पन्थानः आदिनाथस्य (शिवस्य) परम्परातः, अन्ये च षट् (६) पन्थानः भगवद्-गोरक्षनाथस्य परम्परातः उत्पन्नाः इति मन्यन्ते ।[१]

**६. गोरक्षरत्ननाथमठः, चौघेरा**

**६.१ ऐतिहासिकपृष्ठभूमिः**

नेपालदेशस्य दाङ्-जनपदे चौघेरा-स्थाने प्रतिष्ठितः गोरक्षरत्ननाथमठः नाथसम्प्रदायस्य एकं लब्धप्रतिष्ठं प्रमुखं च सिद्धपीठं वर्तते । अत्रत्यायाः परम्परायाः अनुसारेण, यदा भगवता गोरक्षनाथेन दाङ्-नरेशः रत्नपरीक्षकः योगदीक्षया दीक्षितः कृतः, तदनन्तरमेव अस्य मठस्य स्थापना अभवत् । सिद्धरत्ननाथः विविधेषु देशेषु भ्रमणं कृत्वा योगधर्मस्य व्यापकं प्रचारं विहितवान्, अन्ते च चौघेराक्षेत्रे समाधिस्थो जातः इति जनश्रुतिः अस्ति ।[२]

अस्मिन् मठे वर्तमानकाले अपि पात्रदेवतायाः (भिक्षापात्रस्य) रूपेण सिद्धरत्ननाथस्य पूजा विधीयते । प्रायः सहस्रद्वयशतवर्षेभ्यः (१२००) अस्य मठस्य परम्परा, पीर-पद्धतिः, आध्यात्मिक-अनुष्ठानानि च अविरलतया निरन्तरं प्रचलन्ति सन्ति ।[३]

**६.२ पीर-परम्परा** अस्य मठस्य सर्वोत्तमा विशिष्टा च परम्परा पीर-पद्धतिः वर्तते । वस्तुतः पीर-शब्दः पारसीकमूलकः अस्ति । ऐतिहासिक-वृत्तान्तानुसारं, यदा सिद्धरत्ननाथः योगप्रचारार्थं इस्लामीय-देशं (खुरासान-प्रभृति) गतः, तदा तत्रत्यः बादशाहः (शासकः) तस्य योगप्रभावेण अत्यन्तं प्रसन्नः सन् तस्मै ‘पीर’ इति गौरवमयीम् उपाधिं दत्तवान् ।[४] अस्मिन् मठे पीर-पदवी-प्राप्तये केचन कठोराः अनुल्लङ्घनीयाः च नियमाः निर्दिष्टाः सन्ति-

- सः पूर्णतः अविवाहितः ब्रह्मचारी भवेत् ।
- सः ‘कर्णभेदी’ (कर्णमुद्राधारी) योगी एव भवेत् ।
- सः द्यूत-मद्यपानादि-व्यसनेभ्यः सर्वथा मुक्तः स्यात् ।
- सः वर्षपर्यन्तं मठस्य परिधौ ‘बन्दिवत्’ निवस्तुं समर्थः भवेत् ।[५]

प्रतिवर्षं फाल्गुन-कृष्ण-एकादश्याम् ‘पीर-स्थापना-महोत्सवः’ आयोज्यते । अस्मिन् दिने निवर्तमानः (पुरातनः) पीरः नूतनं पीरं विधिवत् आसने उपवेशयति । नूतनपीरस्य कृते वर्षमेकं यावत् अधोलिखितानां नियमानां पालनम् अनिवार्यं भवति-[६]

---

[१] देवनाथयोगिनः साक्षात्कारः – २०७७ आषाढ ५ ।
[२] सुरतनाथयोगिनः साक्षात्कारः – २०७७ आषाढ ४ ।
[३] हितैषी योगी, पीर-पदस्थापनायाः इतिहासः – पृ. २-३ ।
[४] तत्रैव – पृ. ४ ।
[५] देवनाथयोगिनः साक्षात्कारः – २०७७ आषाढ ५ ।
[६] तत्रैव ।


ISSN : 2320-740X

- सः पादत्राणयोः प्रयोगं न कुर्यात् ।
- सः मठस्य सीमां परित्यज्य बहिः न गच्छेत् ।
- सः कदापि गृहस्थ-जीवनं न अनुसरेत् ।
- सः नित्यमेव 'पात्रदेवतायाः' विहितविधानेन पूजां कुर्यात् ।

## ६.३ दीक्षा-विधिः - कर्णविदारणपरम्परा

नाथसम्प्रदायस्य प्रमुखा विशिष्टा च परिचयमुद्रा 'कर्णविदारणपरम्परा' (कर्णमुद्राधारणम्) वर्तते, येन साधकः 'दर्शनी-योगी' इति संज्ञां लभते । श्रीदेवनाथयोगिनां मतानुसारं— कस्मिंश्चित् विशेष-पुण्यतिथौ गुरोः सन्निधौ विहितानां विशिष्टमन्त्राणां शपथानां च अनन्तरं 'करद' (उभयतः तीक्ष्णधारायुक्तं शस्त्रम्) इति उपकरणेन साधकस्य कर्ण-शष्कुली विदीर्यते ।[१]

इयं प्रक्रिया अतीव सङ्कटापन्ना कष्टसाध्या च वर्तते । कर्णविदारणात् परं साधकः एकचत्वारिंशत् (४१) दिनानि यावत् गुप्तवासे तिष्ठति । तेषु प्रथम-नव-दिनेषु केवलं 'चित्रा' (द्रव-आहारः) एव गृह्यते । अस्याम् अवधौ साधकाय शयनस्य (पार्श्वपरिवर्तनस्य) अनुमतिः न भवति । किम्वदन्त्यनुसारं— प्राचीनकाले एतस्यां कठिन-साधनायां यद्यपि स्वल्पापि त्रुटिः प्रमादः वा जायते, तर्हि गुरु-शिष्यौ उभौ अपि 'जीवत्-समाधिना' दण्ड्येते स्म ।[२]

आधुनिके युगे राज्यस्य विधि-नियमैः, वैधानिक-प्रावधानैः, कालस्य परिवर्तनेन च इयं कठोर-परम्परा क्रमशः न्यूनतां गच्छति ।

## ६.४ दैनिकी उपासना-विधिः उत्सवाश्च (Daily Rituals and Festivals)

सिद्ध-रत्ननाथ-मठस्य दैनिकी उपासनापद्धतिः अतीव सुव्यवस्थिता, अनुशासनबद्धा च वर्तते । पूजायाः समय-सारिणी निम्नवत् अस्ति-[३]

- निशीथकाले (रात्रौ) १२:००वादने - पूजायाः प्रारम्भः ।
- रात्रौ १२:३० वादने - पूजायाः समापनम् (अस्मिन् समये पूजकेन 'ताउलो-प्रक्षेपण' (पात्र-निक्षेप) कार्यं विधीयते) ।
- रात्रौ १:०० वादने - सर्वे साधकाः स्नानं कृत्वा शुचिभूत्वा पुनः पूजायां उपस्थिताः भवन्ति ।
- रात्रौ ३:३० वादनं यावत् - पुनः सविधि-पूजा प्रवर्तते ।
- प्रातः ४:०० वादने - प्रातःकालीनपूजायाः विश्रामः ।
- अपराह्णे ३:०० वादने - पुनः सायंकालीन-पूजायाः आरम्भः ।

### मठे आयोज्यमानाः प्रमुखाः उत्सवाः

मठे वर्षपर्यन्तं विभिन्नाः पारम्परिकाः उत्सवाः सोत्साहं आयोज्यन्ते, येषां विवरणम् अधः दत्तम् अस्ति-

## ६.५ पात्रदेवतायाः पाटनदेवी-यात्रा

[१] तत्रैव ।
[२] तत्रैव ।
[३] देवनाथयोगी (लिखितम्) – सिद्धरत्ननाथमठस्य दैनन्दिनी उपासना-विधिः, २०७७ ।

| उत्सवस्य नाम | विवरणम् / विवरणम् |
|---|---|
| पीर-स्थापना-मेला | नूतन-पीरस्य पदाभिषेकः मुख्य-उत्सवश्च । |
| महाशिवरात्रिः | भगवतः शिवस्य आराधना हठयोगिभिः सह । |
| विजयादशमी | शक्ति-साधनायाः विजयस्य च प्रतीकम् । |
| महास्नानम् | शुद्धीकरणस्य आध्यात्मिकं पर्व । |
| मकर-सङ्क्रान्तिः | उत्तरायण-पुण्यकालस्य उत्सवः । |
| ऋषि-तर्पणी (जनै-पूर्णिमा) | 'महाभण्डारा' इत्यस्य विशेषम् आयोजनम् । |
| अन्य-उत्सवाः | दीपावली, वैशाख-पूर्णिमा, फागु-पूर्णिमा (होली), महारुद्री-यज्ञः, नागपञ्चमी, 'खीरे-औंशी', स्वस्थानी-पूर्णिमा, श्रीकृष्ण-जन्माष्टमी इत्यादयः । |

अस्य मठस्य अन्या काचित् महत्त्वपूर्णा परम्परा वर्तते— प्रतिवर्षं चैत्रमासे भारतवर्षस्य पाटन-स्थित-पाटेश्वरी-मन्दिरं प्रति सम्पाद्यमाना यात्रा । इयं यात्रा त्रयोविंशतौ दिनेषु भवति । चैत्र-शुक्ल-द्वादशीतः आरभ्यमाणा इयं यात्रा पञ्चम्यां तिथौ पाटननगरं सम्प्राप्य विश्रामं लभते ।[१]

यदा इयं मण्डली पाटनदेवीमन्दिरं प्राप्नोति, तदा तत्रत्यस्य सम्पूर्णस्य अर्चन-पूजन-कार्यस्य उत्तरदायित्वं नेपाली-साधूनां हस्ते समायाति । पञ्चदिनानि यावत् तत्र विशिष्टां पूजां निर्वर्त्य, दशम्यां रात्रौ एषा मण्डली पुनः नेपालदेशं प्रति प्रस्थानं करोति । इयं यात्रा नेपाल-भारत-सम्बन्धस्य पौराणिकीं सांस्कृतिकीं च दृढतां प्रदर्शयन्ती एका महत्त्वपूर्णा सेतुभूता परम्परा वर्तते ।[२]

**७. समसामयिक-सन्दर्भः**

**७.१ भूमि-सम्बद्धाः समस्याः**

गोरक्ष-गुठी (मठस्य धार्मिक-न्यासः) इत्यस्य स्वामित्वे पूर्वं १,३४० विघा-परिमितं विस्तृतं भूक्षेत्रम् आसीत् । किन्तु कालान्तरे तस्मात् १,१०० विघा-परिमितं भूक्षेत्रं 'रैकर' परिवर्तितं जातम् । वर्तमानकाले तत्रत्याः कृषकाः तस्याः भूमेः वैधानिकं स्वामित्वाधिकारं (प्रमाणपत्रं) प्राप्तवन्तः । अवशिष्टायां २४० विघापरिमित-भूमौ अपि ५२ विघाभूमौ 'मोही'इत्येषाम् (भोगकर्तृणाम्) अधिकारः विद्यते ।[३]

नेपालदेशस्य सशस्त्र-द्वन्द्व-कालानन्तरं मठस्य भूमिः बलात् अधिगृहीता, कृषकाः च तस्याः भूमेः स्वेच्छया उपभोगं कुर्वन्तः सन्ति । अस्य परिणामस्वरूपं मठस्य वार्षिकायः वर्तमानकाले कष्टेन दशलक्षरूप्यकाणां मितः संवृत्तः अस्ति, येन मठस्य दैनन्दिनी व्यवस्था प्रभाविता दृश्यते ।[४]

**७.२ संरक्षणं प्रवर्द्धनञ्च**

नाथसम्प्रदायस्य गूढ-योगिकज्ञानस्य, विशिष्टसाधनापद्धतेः, अमूल्य-सांस्कृतिक-सम्पदां च संरक्षणं सम्प्रति महती आवश्यकता वर्तते । 'आगम-सम्प्रदायस्य' तादृशं गम्भीरं संशोधनम् अध्ययनं च अद्यावधि न जातं, येन इयं समृद्धपरम्परा क्रमशः विलुप्तिं प्रति गच्छन्ती अस्ति । खेदस्य विषयोऽयं यत्

[१]तत्रैव ।
[२]तत्रैव ।
[३]हिरानाथयोगिनः साक्षात्कारः – २०७७ आषाढ ६ (भूमिसम्बन्धी विवरण) ।
[४]तत्रैव ।


ISSN : 2320-740X

आधुनिक-शिक्षणपद्धतेः प्रभावात् वयं नूतन-युववर्गं प्रति एतस्याः गौरवमय्याः परम्परायाः आकर्षणं जनयितुं न शक्तवन्तः ।[१]

## सन्दर्भग्रन्थसूची

### प्राचीनग्रथाः


- काश्यपः, आर्. एल्., & श्रीनिवासनः, आनन्दः । (२०२३) । ऋग्वेदसंहिता : मूलसंस्कृतपाठः हिन्दी-आङ्ग्लभाषानुवादैः टिप्पण्यश्च सहितः । प्राकृतभारतीअकादमी ; श्रीअरविन्द-कपाली-शास्त्री-वैदिक-संस्कृति-संस्थानम् ।
- दीक्षिता, पुष्पा । (२०१६) । अष्टाध्यायीसहजबोधः - पाणिनीयपौष्पीप्रक्रियादृष्ट्या पाणिनीयाष्टाध्याय्याः पठनविधिः (षड्खण्डात्मकः ग्रन्थसमुच्चयः) । प्रतिभा प्रकाशनम् ।
- दाशोरा, नन्दलालः । (२०२२) । ब्रह्मसूत्रम् (वेदान्तदर्शनम्) - संस्कृतमूलपाठः पदच्छेद-पदपदार्थ-हिन्दीभाषानुवादसहितः । रणधीरप्रकाशनम् ।
- भर्तृहरिः । (२०२४) । वाक्यपदीयम् : काण्डत्रयसंवलितं मूलमात्रं संशोधितसंस्करणम् । सरस्वतम् पब्लिकेशनम् ।
- नित्यानन्दगिरिः, स्वामी । (१९९२) । पातञ्जलयोगसूत्रम् - योगिराजश्रीश्यामाचरणलाहिडीमहाशयस्य आध्यात्मिकसाधनामार्गानुसारेण संक्षिप्तव्याख्यासहितम् । विश्वानन्दयोगसंस्थानम् ।
- यतीन्द्रनाथः, योगिराजः । (२०२३) । गोरखवाणी तथा गोरखयोगः । रणधीरप्रकाशनम् ।
- भट्टाचार्यः, रामतोषः । (२०२०) । प्राणतोषिणी । चौखम्बा विद्याभवनम् ।


### हस्तलिखितग्रन्थाः (पाण्डुलिपयः)


- नागार्जुनः – पौडीहस्तलेखः ।
- योगीविलासनाथः – नाथपन्थपरिचयः (द्वादशपन्थानां विवरणम्)


### आधुनिकग्रन्थाः


- आप्टे, वामनशिवरामः ; संस्कृत-हिन्दी-कोशः ; नवदेहली ।
- उपाध्यायः, डा. नागेन्द्रनाथः ; गोरक्षनाथः : नाथसम्प्रदायस्य परिप्रेक्ष्ये ; (सम्बद्धं प्रकाशनम्) ।
- द्विवेदी, डा. हजारीप्रसादः ; हजारीप्रसाद-द्विवेदी-ग्रन्थावली (भागः-६), नाथ-सम्प्रदायः ; राजकमल प्रकाशनम् ।
- पौडेलः, प्रा.डा. सुधनकुमारः (संयोजकः) ; नाथसम्प्रदायः सिद्धरत्ननाथश्च - इतिहासः, परम्परा, मान्यता, साधनापद्धतिश्च ; नेपाल-संस्कृत-विश्वविद्यालयः, २०७७ ।
- योगी, हितैषी लक्ष्मीनाथः (२०७६) ; पीर-पदस्थापनायाः इतिहासः मठे रोट-महिमा च ; गोरक्षरत्न-सिद्धरत्ननाथमठः, घोराही-१७, चौघेरा, दाङ् ।


[१] सुरतनाथयोगिनः साक्षात्कारः – २०७७ आषाढ ४ (आगमपन्थस्य लोपप्रसङ्गः) ।

- राजस्थान-पुरातन-ग्रन्थमाला (१९०) ; राजस्थानस्य नाथसम्प्रदायः साहित्यञ्च (लेखः :योगी आदित्य-नाथः) ; राजस्थान-प्राच्यविद्या-प्रतिष्ठानम् ।
- सोलङ्की, डा. कोमलसिंहः ; नाथपन्थः निर्गुणसन्तकाव्यञ्च ; (सम्बद्धं प्रकाशनम्) ।

**प्रत्यक्षसाक्षात्काराः**

- 1. श्रीसुरतनाथयोगी 2. श्रीदेवनाथयोगी 3. श्रीहिरानाथयोगी - (सर्वे साक्षात्काराः नेपाल-संस्कृत-विश्वविद्यालयस्य अनुसन्धान-परियोजनान्तर्गतं २०७७ वैक्रमाब्दे आषाढमासे सम्पादिताः ।)

**अप्रकाशित-मठाभिलेखः**

- देवनाथयोगिप्रणीता – सिद्धरत्ननाथमठस्य दैनन्दिनी उपासना-विधिः (हस्तलिखित-व्यवस्थापन-पत्रिका, चौघेरा-मठः) ।

**लोक-जनश्रुतयः**

- उत्तरभारते प्रसिद्धा गोरखनाथ-गोमय-जन्मसम्बन्धी कथा (गोरखनाथस्य उत्पत्ति-प्रसङ्गः) ।
- चौघेरा-मठस्य स्थानीया जनश्रुतिः / किम्वदन्ती (राजा रत्नपरीक्षक-गोरक्षनाथ-समागम एवं मठ-स्थापना-प्रसङ्गः) ।



 ISSN : 2320-740X

# श्रीरामचरितस्तोत्रम् – रामायणसारप्रदर्शकम् अप्रकाशितं स्तोत्रम्

रिधमः पण्ड्या*
सहायकाचार्यः, सो.सं.वि.वि., वेरावलम्,
गुजरात

***लेखसारः*** *– रामस्य अयनं शास्त्रमिति रामायणम् । स्वयं नारायणः त्रेतायुगे रावणवधाय मनुष्यलोके रामरूपेण अवतीर्णः । चरितं रघुनाथस्य शतकोटिं प्रविस्तरम् इत्यनुसारं भगवतः रामस्य चरितं शतकोटिषु श्लोकेषु विभक्तमस्ति । नैकानि रामायणानि सन्ति येषु रामावतारलीला सविस्तरमुल्लिखिता । यथा – वाल्मीकिरामायणम्, आनन्दरामायणम्, अध्यात्मरामायणम्, कन्बरामायणम्, रामचरितमानसम्, काकभुशुण्डीरामायणम्, शिवरामायणम् इत्यादीनि । विदूषां मतानुसारं शताधिकं रामायणं वर्तते । तदतिरिच्य रामाधारितानि विविधासु भाषासु नैकानां पुस्तकानां लेखनं सञ्जातम् ।*

*अल्पज्ञानिनां कृते सप्तकाण्डात्मक-वाल्मीकिरामायणपठने यदि प्रवृत्तिः न स्याच्चेत् रामायणसारमध्येतृणां कृते नारायणपर्वणीकरेण रामचरितस्तोत्रस्य रचना कृता । अस्मिन् स्तोत्रे रामायणस्य सारः वर्णितः । इदं स्तोत्रमद्यावधि अप्रकाशितमासीत् । अस्य अल्पज्ञातस्तोत्रस्य प्रकाशनमावश्यकमिति विचार्य अस्मिन् शोधपत्रे एकादशश्लोकात्मकस्यास्य स्तोत्रस्य पाठसम्पादनं किञ्च तद्वर्णनं क्रियते ।*

***कूटशब्दाः*** *– रामायणम्, मातृका, रामः, स्तोत्रम्, काण्डम्, अयोध्या*

## प्रास्ताविकम्

अनन्तशास्त्रं बहवश्च विद्याः इत्यनुसारं शास्त्राण्यनन्तानि सन्ति । विविधेषु शास्त्रेषु चतुर्विधपुरुषार्थप्रतिपादकाः विद्याः सन्ति । इतिहासपुराणैः वेदार्थं चिन्तयेदिति स्मृतिकारमतम् । धर्मार्थकाममोक्षरूपपुरुषार्थोपदेशयुक्तं कथाभिस्सहितं पूर्ववृत्तमितिहासमुच्यते । महाभारतं रामायणं च इतिहासः । रामस्य अयनमिति रामायणम् । यत्र भगवतः रामस्य लीला सरसा चित्रिता वर्तते । भारतीयवाङ्मये आदिकाव्यत्वेन रामायणं प्रतिष्ठितमस्ति । रामायणं धर्मस्य, आदर्शजीवनस्य, राजधर्मस्य पारिवारिकमूल्यानां च विश्वकोश इवास्ति । विविधेषु ग्रन्थेषु रामायणस्य महिमा प्रदर्शितः अस्ति । यथा स्कन्दपुराणे उत्तरखण्डे –

**रामायणं महाकाव्यं सर्ववेदेषु सम्मतम् । सर्वपापप्रशमनं दुष्टग्रहनिवारणम् ॥**[१]

महाकाव्यं रामायणमिदं सर्ववेदानां सारः वर्तते । समस्तपापानां नाशकः तथा दुष्टग्रहोत्पन्नबाधानां निवारणकारकमस्ति ।

## रामायणवैविध्यम्

**चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं पुंसां महापातकनाशनम् ॥**[२]

बुधकौशिकऋषिणा रचिते श्रीरामरक्षास्तोत्रे रामचरितविस्तारमेवं प्रोक्तम् । अनेनानुमीयते यद्

*सम्पर्कसूत्रम् - 7359919788, Email- ridhampandya111@gmail.com

[१]श्रीवाल्मीकिरामायणम्, प्रथमः खण्डः, स्कन्दपुराणोक्तं श्रीवाल्मीकिरामायणमाहात्म्यम्, १.१९, गीताप्रेस, गोरखपुर, संवत् २०७१

[२]रामरक्षास्तोत्रम्, श्लो. १, गीताप्रेस, गोरखपुर

भगवतः रामस्य चरितमनन्तं वर्तते। सर्वादौ वाल्मीकिमुनिना चतुर्विंशतिसहस्रपरिमितं रामायणं रचितम्। किन्तु भगवतः रामस्य सर्वासां लीलानां सङ्ग्रहः तस्मिन् न जातः। अत एव कालान्तरे विविधैः मुनिभिः, आचार्यैः कविभिश्च स्वभक्त्यनुसारं रामायणस्य रचना कृता। अनुमानानुसारं समग्रविश्वेषु प्रायः ३०० अधिकानि रामायणानि वा रामधारिता रचनाः प्राप्यन्ते। एतासु रचनासु काश्चन अत्र दृश्यन्ते।

| | | |
|---|---|---|
| १. वाल्मीकिरामायणम् | २. अध्यात्मरामायणम् | ३. आनन्दरामायणम् |
| ४. अद्भुतरामायणम् | ५. कम्बरामायणम् | ६. शिवरामायणम् |
| ७. अगस्त्यरामायणम् | ८. काकभुशुण्डिरामायणम् | ९. तोरवेरामायणम् |
| १०. मन्त्ररामायणम् | ११. चम्पूरामायणम् | १२. रामचरितमानसम् |

एतदरिच्य विविधासु भाषासु रामायणाधारिताः नाट्यरचनाः प्राप्यन्ते। यथा – प्रतिमानाटकम्, अभिषेकनाटकम्, महावीरचरितम्, रघुवंशम्, उत्तररामचरितम्, अनर्घराघवम्, प्रसन्नराघवम्, राघवाभ्युदयम्, हनुमन्नाटकम्, भट्टिकाव्यम्, जानकीहरणमित्यादयः।

## स्तोत्रं नाम किम्?

शब्दकल्पद्रूमानुसारं स्तूयते अनेन इति स्तोत्रम्। स्तोत्रं नाम ईश्वरस्य, देवतायाः, गुरोः, तीर्थस्य वा महापुरुषस्य गुणमहिमप्रकाशकः काव्यविशेषः स्तुतिविशेषः वा इति स्तोत्रमुच्यते। ष्टुञ् धातोः ष्ट्रन् प्रत्ययेन अयं शब्दः निष्पद्यते। इष्टानां प्रशंसा वा गुणकथनं स्तोत्रस्य सामान्यः विषयो भवति। अमरकोशे स्तवः, स्तोत्रम्, स्तुतिः, नुतिः[1] इति स्तोत्रशब्दस्य पर्यायवाचिनः शब्दाः प्राप्यन्ते।

स्तोत्रेषु सामान्यतया महिमा, गुणकथनम्, रूपवर्णनम्, ऐश्वर्यकथनम्, भक्तिप्रदर्शनम्, प्रार्थना, स्वात्मसमर्पणम् इत्यादयः भक्तिभावाः दृश्यन्ते। एतद्भेदानां विविधानि उदाहरणानि प्राप्यन्ते। अनेकानि स्तोत्राणि अन्ते फलश्रुतिं वहन्ति। श्लोकसङ्ख्यानुसारं पञ्चकम्, षट्कम्, सप्तकम्, अष्टकम्, दशकम्, शतकनामस्तोत्रं सहस्रनामस्तोत्रं वा भवितुमर्हति। स्तोत्रस्य उत्पत्तिः वेदादेव अभवत्। चतुर्षु वेदेषु अग्न्यादिदेवानां स्तुतिपरकाणि सूक्तानि सन्ति। उपनिषत्स्वपि स्तुत्यात्मकाः मन्त्राः प्राप्यन्ते। अष्टादशपुराणे स्तोत्राणां महान् विकासः जातः। कारणं यद् विविधेसु पुराणेषु प्रायः सहस्रशः स्तोत्राणि दृश्यन्ते।

महाभारतादीतिहासग्रन्थेषु स्तोत्राणां वैविध्यं दृश्यते। कालान्तरे नैकैराचार्यैः भक्तैश्च स्वतन्त्ररूपेण स्तोत्राणां रचना कृता। आदिशङ्कराचार्यस्य स्तोत्रसाहित्ये योगदानमभूतपूर्वं वर्तते। तेन प्रायः २५० अधिकस्तोत्राणां रचना कृता। वैष्णवपरम्परायामपि नैके विद्वांसः आसन् यैः स्तोत्रसाहित्ये स्वयोगदानं दत्तम्। तदनन्तरमाधुनिककालेऽपि विद्वांसः स्तोत्ररचनां कुर्वन्ति।

[1]अमरकोशः (रामाश्रमी संस्कृतप्रकाशाख्य हिन्दीव्याख्ययाचोपेतः), प्रथमकाण्डम्, शब्दादिवर्गः, श्लो. सं. ११, सम्पा. – श्री पण्डितः हरगोविन्दशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, वि. सं २०५३।


ISSN : 2320-740X

**पाण्डुलिपिपरिचयः**

नारायणशर्मणाविरचितं "श्रीरामचरितस्तोत्रं" स्तोत्रसाहित्येषु विलक्षणं स्तोत्रं वर्तते। New Catalogus Catalogorum, Vol. no. 24, page no. 127 मध्ये अस्य स्तोत्रस्य विवरणं प्राप्यते[१]। तत्र निर्देशानुसारं स्तोत्रस्यास्य द्वे प्रतिलिपी स्तः। एते मातृके "Vrindavan Research Institute, Vrindavan" इति पाण्डुलिपिभाण्डागारे सुरक्षिते स्तः। एकदा आन्तर्जाले अन्वेषणेन "ज्ञानभारतम्" इति सार्वकारिकसंस्थायाः जालपुटे द्वे मातृके प्राप्ते। अन्यजालपुटेषु, शोधपत्रिकासु अन्वेषणं कृतं किन्तु कुत्राप्यस्य प्रकाशितं स्वरूपं न प्राप्तम्। N.C.C. मध्येऽपि इदं स्तोत्रं प्रकाशितरूपेण उल्लेखः न दृश्यते। तर्हि मनसि विचारः आगतः यदस्य अप्रकाशितस्तोत्रस्य अल्पज्ञातस्तोत्रस्य वा प्रकाशनं भवेच्चेत् अस्याः पाण्डुलिपेः लिखितविषयस्य संरक्षणं भविष्यति। तदनन्तरं सर्वादौ द्वयोः पाण्डुलिप्योः अवलोकनं कृतम्। वृन्दावनशोधसंस्थायाः पाण्डुलिपिविवरणिकायाः अवलोकनेन प्राप्तविवरणमधोलिखितकोष्ठके लिखितमस्ति।

| | |
|---|---|
| ग्रन्थाङ्कः – १६१८० | ग्रन्थसङ्ख्या – २९ |
| विषयः – भक्तिः (स्तोत्रम्) | आधारपत्रम् – कर्गजपत्रम् |
| नाम – रामचरितस्तोत्रम् | भाषा – संस्कृतम् |
| लिपिः – देवनागरी | पूर्णः/अपूर्णः – पूर्णः |
| पत्रसङ्ख्या – ३ | स्थितिः – उत्तमा |
| रचनाकारः – नारायणः शर्मा | विशेषः – अतिप्राचीना मातृका न प्रतीयते। |
| लिपिकारः नास्ति | आकारः – १६.६ x९१.४ |

| | |
|---|---|
| ग्रन्थाङ्कः – १६१८४ | ग्रन्थसङ्ख्या – २३ |
| विषयः – भक्तिः (स्तोत्रम्) | आधारपत्रम् – कर्गजपत्रम् |
| नाम – रामचरितस्तोत्रम् | भाषा – संस्कृतम् |
| लिपिः – देवनागरी | पूर्णः/अपूर्णः – पूर्णः |
| पत्रसङ्ख्या – २ | स्थितिः – उत्तमा |
| रचनाकारः – नारायणः शर्मा | विशेषः – अतिप्राचीना मातृका न प्रतीयते। |
| लिपिकारः - गोपीनाथः धर्माधिकारी | आकारः – २०.८ x११.४ |

द्वयोः पाण्डुलिप्योरवलोकनेन ज्ञायते यद् एते मातृके अतिप्राचीने न स्तः। अनयोः पत्राणि, लिखिताक्षराणां शैली प्राचीना न प्रतीयते। १६१८० क्रमाङ्कस्य मातृकायामक्षराणि सुस्पष्टानि सन्ति। तस्यां लिपिकारेण अवशिष्टः पाठः उपरि भागे दक्षिणभागे च लिखितः अस्ति। अस्यां लिपिकारस्य कोऽप्युल्लेखः नास्ति। १६१८४ क्रमाङ्कस्य मातृकायां कुत्रचिदक्षराणि स्पष्टानि न सन्ति। पुनश्च तत्र नवमः श्लोकः लुप्तः वर्तते। प्रारम्भे लिपिकारस्य नाम गोपीनाथः धर्माधिकारी इति दृश्यते तथा तत्रैव अस्य

[१]New Catalogues Catalogorum, Vol. no. 24, Ed. Dr. Siniruddha Dash, University of Madras, 2011.

स्तोत्रस्य उपनाम श्रीरामलीलास्तवः इति लिखितं वर्तते ।

**सम्पादनपद्धतिः**

स्तोत्रमिदं एकादशश्लोकात्मकं लघुकायं वर्तते अतोऽस्य सम्पादने विशिष्टायाः पद्धत्याः आवश्यकता न प्रतीयते । १६११८० क्रमाङ्कस्य मातृका केन्द्रस्थाने मूलमातृकारूपेण स्वीकृता । तस्याः कूटसञ्ज्ञा VRI-1 तथा अपरा मातृकायाः कूटसञ्ज्ञा VRI-2 प्रदत्ता । अवग्रहाः, हलन्तवर्णाः, विसर्गाः साक्षाद् मयैव परिष्कृता । एतदरिरिच्य पाठभेदः, अशुद्धपाठः लुप्तपाठः च पादटिप्पणौ योजितः । द्वयोः पाण्डुलिप्योरधिकाः दोषाः न प्राप्यन्ते ।

**पाण्डुलिपिसम्पादनम्**

[१]योगीन्द्रैरभिषिच्यमानमणुभिर्गङ्गापयोबिन्दुभिः
देवेन्द्रैरभिवृष्यमाणममलैः पुष्पैर्विमानस्थितैः ।
राजेन्द्रैरभिवन्द्यमानमुपदाहस्तैः समन्तात्स्थितैः
सीतासंयुतमासनस्थितमहं ध्यायामि रामं हृदि ॥ १ ॥

एवं ध्यायेत्[२] पठेत् स्तवम् ।

देवप्रार्थनयाऽमले[३] रविकुले प्रोद्भूय साकेतके
निघ्नं कौशिकविद्विषः पथिगतोऽहल्यां शिलामुद्धरन् ।
भङ्क्त्वा चापमुदुह्य भूमितनयां श्रीभार्गवं योऽजयत्
तं वन्दारुसुरद्रुमं भवहरं श्रीरामचन्द्रं भजे ॥ २ ॥
पित्राज्ञावशतो विहाय नगरीं यातं वनं दण्डकान्
भ्रात्रा राज्यकृतेऽर्थितं च बहुधा नावर्त्तमानं तु यम् ।
गेहायातमपूजयत् सवनितासौमित्रिमत्रिर्मुनिः
तं वन्दारुसुरद्रुमं भवहरं श्रीरामचन्द्रं भजे ॥ ३ ॥
येनारण्यगतेन पञ्चवटिकास्थाने विराधादिकान्
हत्वा दैत्यगणान् वने मृगयता रक्षो हृतां जानकीम् ।
गृध्रेशश्च कबन्धकश्च शबरी मोक्षं प्रति प्रापिताः
तं वन्दारुसुरद्रुमं भवहरं श्रीरामचन्द्रं भजे ॥ ४ ॥
सुग्रीवेण[४] कपीश्वरेण सदृशं[५] सख्यं समं कुर्वते
तच्छत्रुं हरते गिरौ निवसते स्त्रीमार्गणं वाञ्छते ।
यस्मै मारुतिपूर्वकाः कपिगणाः भक्त्या चतुर्दिक्ष्वगुः

[१]VRI-1 श्रीरामचन्द्राय नमः । VRI-2 श्रीगणेशाय नमः, श्रीरामचन्द्राय नमः, श्रीगुरुभ्यो नमः । इति लेखकविहितं मङ्गलाचरणम् ।
[२]VRI-1 ध्यायम् ।
[३]VRI-2 "अमले" इति खण्डितः पाठः ।
[४]VRI-2 सुग्रीवीण ।
[५]VRI-1, VRI-2 सदृषा ।

 ISSN : 2320-740X

तं वन्दारुसुरद्रुमं भवहरं श्रीरामचन्द्रं भजे ॥५ ॥
तीर्त्वा[१] वारिनिधिं प्रविश्य च पुरीं दृष्ट्वा विदेहात्मजां
सम्भाष्यापि च रावणेन नगरीं दग्ध्वा च तां सर्वतः ।
आयातो हनुमानवायमुदिताद् यस्मात्समालिङ्गनं
तं वन्दारुसुरद्रुमं भवहरं श्रीरामचन्द्रं भजे ॥६ ॥
बद्ध्वा सेतुमपां निधौ कपिगणैर्गत्वा च लङ्कापुरीं
हत्वा रावणमात्मजानुजयुतं लब्ध्वा वधूं वह्नितः ।
आयातस्य निजां पुरीं मुनिकृतो यस्याभिषेकोऽभवत्
तं वन्दारुसुरद्रुमं भवहरं श्रीरामचन्द्रं भजे ॥७ ॥
वैदेहीं रजकापवादमिषतस्त्यक्त्वाऽश्वमेधाध्वरं[२]
कृत्वा सर्वगुणाश्रयौ कुशलवौ राज्येऽभिषिच्यात्मजौ ।
यस्मिन् याति निजं पदं समचलत्सर्वाप्ययोध्यापुरी
तं वन्दारुसुरद्रुमं भवहरं श्रीरामचन्द्रं भजे ॥८ ॥
[३]प्रादूर्भूय रवेः कुले पितृगिरा सन्त्यज्य राज्यं वने
[४]अव्यादान्विनिहत्य वानरपतेः सख्यं समासाद्य यः ।
सीतोदन्तमुपेत्य सानुजसुतं हत्वा च लङ्केश्वरं
वैकुण्ठं पुनरभ्यगाद्भगवते रामाय तस्मै नमः ॥९ ॥
श्रीरामायणसप्तकाण्डचरितैः संगर्भितं सप्तकं
श्रीनारायणशर्मणा विरचितं श्रीरामलीलास्तवम् ।
यो भक्त्या प्रतिवासरं परिपठेत् प्रातः प्रदोषेऽथवा
लब्ध्वा वर्गचतुष्टयं स सुकृती स्याद्देवकः संशयः ॥१० ॥[५]
श्रीपर्वणीकरोपाख्यनारायणसुधीकृतम् ।
श्रीरामचरितस्तोत्रं भूमौ विजयतां सदा ॥११ ॥
श्रीरामचन्द्रार्पणमस्तु । श्रीशं वन्दे ।[६]

**ग्रन्थप्रतिपादितविषयः**

नारायणशर्मणाविरचितं 'श्रीरामचरितस्तोत्रम्' भगवतः रामावतारस्य सारं लीलाश्च सङ्केतमाध्यमेन प्रतिपादयति । एतादृशानि स्तोत्राणि केवलं भक्तिरसस्य भागः न, अपितु रामायणस्य प्रमुखघटनानां सारग्राहकाणि काव्यान्यपि भवन्ति । स्तोत्रकारेण प्रथमे श्लोके भगवतः श्रीरामस्य ध्यानं कृतम् । यत्र

[१] VRI-1, VRI-2 कीर्त्वा ।
[२] VRI-2 "मिषतस्त्यक्त्वा" इत्यस्पष्टः पाठः ।
[३] VRI-2 अयं श्लोकः लुप्तः ।
[४] "अव्यादान्" इति संशयात्मकः पाठः ।
[५] इति । मातृकास्थितोऽयं पाठः पादटीपे स्थापितः ।
[६] VRI-2 कल्याणं भवता सदा । मितीभाद्रपदशुद्ध ६ मङ्गलवारेण लिखितम् ।

मुख्यरूपेण रामाभिषेकस्य प्रसङ्गः दृश्यते। द्वितीयश्लोकतः अष्टमश्लोकपर्यन्तं एकस्य काण्डस्य वर्णनं विद्यते। नवमः श्लोकः एकश्लोकीरामायणं वर्तते। तस्मिन् श्लोके सम्पूर्णरामायणस्य चरितं सङ्केतरूपेण विद्यते। दशमे श्लोके फलश्रुतिः प्राप्यते। श्लोकेऽस्मिन् कविना स्वनामपूर्वकं फलश्रुतिः दत्ता। एकादशे श्लोके स्तोत्रकारेण स्तोत्रस्यास्य भूतले सर्वत्र प्रसारः स्यादिति प्रार्थना कृता। अस्मिन् स्तोत्रे द्वितीयतः अष्टमश्लोकपर्यन्तं प्रत्येककाण्डस्योल्लिखितप्रसङ्गानां सङ्केतः प्रदर्श्यते।

१. बालकाण्डम् – रामावतारप्रयोजनम्, विश्वामित्रस्याश्रमे गमनं तथा राक्षसानां वधः, अहल्याया उद्धारः, सीतास्वयंवरः, परशुरामेन सह युद्धम् इति।
२. अयोध्याकाण्डम् – राज्ञः दशरथस्यादेशेन अयोध्यात्यागः, दण्डकारण्यगमनम्, भरतस्य रामं प्रति निवेदनम्, अत्र्याश्रमं प्रति आगमनम् इति।
३. अरण्यकाण्डम् – पञ्चवटीप्रदेशे निवासः, विराधादिराक्षसानां वधः, जानकीहरणम्, जटायुवधः, कबन्धस्योद्धारः, शबर्याः मोक्षः इति।
४. किष्किन्धाकाण्डम् – सुग्रीवेण साकं मैत्री, वालिनः वधः, सीताया अन्वेषणम्, हनुमदादि वानरैः द्वारा अन्वेषणकार्यम् इति।
५. सुन्दरकाण्डम् – हनुमतः लङ्काप्रवेशः, सीतया सह वार्तालापः, लङ्कादहनम्, हनुमतः पुनरागमनम्, हनुमद्रामयोः परस्परं समालिङ्गनम् इति।
६. युद्धकाण्डम् – कपिगणस्य साहाय्येन समुद्रसेतोः निर्माणम्, पुत्रबान्धवसहितं रावणवधः, सीतायाः अग्निपरीक्षा, श्रीरामस्य अयोध्यां प्रत्यागमनम्, वसिष्ठादिमुनिभिः रामस्य राज्याभिषेक इति।
७. उत्तरकाण्डम् – रजकापवादाय सीतापरित्यागः, अश्वमेधयागः, कुशलवयोः राज्याभिषेकः, श्रीरामस्य अयोध्यापुर्याः भक्तैः सहितं स्वलोकगमनम् इति।

## श्रीरामचरितस्तोत्रस्य वैशिष्ट्यम्

**छन्दोवैशिष्ट्यम्** - अस्मिन् स्तोत्रे प्रयुक्तं वृत्तं शार्दूलविक्रीडितमस्ति। लक्षणमस्य एवं यद् – सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्। अस्य छन्दसः प्रत्येकं पादः एकोनविंशतिवर्णात्मकः अस्ति। यस्य दीर्घत्वात्, गाम्भीर्यात् तथा प्रवाहमयलयात् व्याघ्रस्य विलसितगमनस्य उपमा दत्ता इति भाति। अस्य लयः भक्तस्य चित्ते भक्तिमुत्पादयति।

**रसवैविध्यम्** – अस्मिन् स्तोत्रे विविधरसानां प्रयोगः दृश्यते। यथा मङ्गलाचरणे शृङ्गाराद्भुतरसयोः वैविध्यम्, सीताविरहे अयोध्यात्यागसमये च करुणः, सुन्दरकाण्डे युद्धकाण्डे च रौद्रः वीरश्च, लङ्कादहनसमये वीररसेन साकं भयानकरसस्यापि आभा दृश्यते। एतैः साकं भक्तिः तु सर्वत्र प्रतीयते।

**शब्दावली** – अस्मिन् स्तोत्रे प्रदत्ता शब्दावली अत्यन्ता सरला अस्ति। कुत्रचिद् स्थलेषु सामासिकपदानि सन्ति। कुत्रचिद् प्रसादगुणस्य माधुर्यगुणस्य च तादृशः समन्वयः अस्ति। येन क्लिष्टशब्दाः अपि रसभावयुक्ताः प्रतीयन्ते।

 ISSN : 2320-740X

**ध्रुवपदसौन्दर्यम्** – द्वितीयश्लोकतः नवमश्लोकपर्यन्तं चतुर्थचरणे समागतं "तं वन्दारुसुरद्रुमं भयहरं श्रीरामचन्द्रं भजे" इति ध्रुवपदं रामभक्तिं प्रकाशयति । अत्र ध्रुवपदेन भवभयनाशकस्य श्रीरामचन्द्रस्य वन्दनं च सिद्धं भवति ।

**श्रीरामचरितस्तोत्रस्य भावानुवादः**

**प्रथमः श्लोकः**

भावानुवादः – अयं श्लोकः ध्यानश्लोकस्वरूपः । कविः स्वहृदये भगवतः श्रीरामस्य दिव्यं स्वरूपं चिन्तयति । यस्य श्रीरामस्य योगिश्रेष्ठैः गङ्गाजलबिन्दुभिः अभिषेकः क्रियते, देवाधिपत्यैः गगनस्थात् विमानात् पुष्पवृष्टिः क्रियते, समन्तात् स्थिताः महाराजाः अञ्जलिबद्धहस्तैः यं प्रणमन्ति, तादृशं सीतया सहितं सिंहासनासीनं श्रीरामचन्द्रमहं मम हृदये ध्यायामि । (अत्र स्तोत्रकारः ध्यानरूपेण श्रीरामस्य दिव्यराज्याभिषेकमयीं मूर्तिं स्वहृदयकमले प्रतिष्ठापयति । भगवान् रामः केवलं अयोध्यानरेशः न, अपितु योगिनां परमध्यानविषयः, देवानामाराध्यः, नृपाणामपि नृप इति प्रतिपाद्यते ।)

**द्वितीयः श्लोकः**

भावानुवादः – कविना अस्मिन् श्लोके बालकाण्डस्य सारः प्रदर्शितः । देवानां प्रार्थनया (रावणादिदैत्यविनाशार्थम्) अयोध्यायां निर्मले सूर्यवंशे अयोध्यापुर्यामवतारं कृत्वा येन विश्वामित्रमहर्षेः यज्ञरक्षार्थं राक्षसाः हताः, मार्गे पाषाणभूता अहल्या स्वपादस्पर्शेन उद्धारिता, ततः जनकसभायां शिवधनुर्भङ्गं कृत्वा सीता परिणीता तथा च विवाहोत्तरकाले मार्गान्तरे परशुरामस्य दर्पः स्वतेजसा चूर्णितः । तं संसारभवभयहारिणं श्रीराममहं भजे ।

**तृतीयः श्लोकः**

भावानुवादः – अयं श्लोकः अयोध्याकाण्डस्य सारं प्रदर्शयति । यः (कैकेय्याः वरदानफलरूपां) पितुः दशरथस्य आज्ञया अयोध्यायाः राज्यं त्यक्त्वा दण्डकारण्यं जगाम, भरतेन बहुप्रार्थनां कृत्वापि यः अयोध्यां न प्रत्यावृत्तः, वनवासे अत्रिर्मुनिः स्वपत्न्या अनसूयया सह यस्य सीतया सौमित्रिणा च सह सत्कारं कृतवान् । तं संसारभवभयहारिणं श्रीराममहं भजे । (अस्मिन् श्लोके श्रीरामस्य पितृभक्तिः, सत्यपालनम्, भ्रातृस्नेहः तथा ऋषिमण्डले प्राप्तगौरवमित्यादिगुणाः वर्णिताः सन्ति ।)

**चतुर्थः श्लोकः**

भावानुवादः – अरण्यकाण्डसारप्रदर्शकोऽयं श्लोकः । अरण्ये पञ्चवट्यां स्थितेन येन विराधादयः राक्षसाः निहताः, ततः सुवर्णमृगस्य वधसमये रावणेन सीता अपहृता, तदनन्तरं सीतान्वेषणकाले येन जटायु-कबन्ध-शबरीभ्यः मोक्षः प्रदत्तः, तं संसारभवभयहारिणं श्रीराममहं भजे । (अयं श्लोकः श्रीरामस्य वनवासकालीनचरित्रस्य साररूपेण निरूपणं करोति । भगवान् श्रीरामः केवलं दुष्टसंहारकर्ता न, अपितु भक्तवत्सलः, मोक्षदाता, करुणासागरश्च इति प्रतिपाद्यते ।)

**पञ्चमः श्लोकः**

भावानुवादः – अयं श्लोकः किष्किन्धाकाण्डस्य प्रमुखघटनानां संक्षिप्तं चित्रणं करोति । यः ऋष्यमूकपर्वते निवसन्तं सुग्रीवं प्राप्य तेन सह मित्रतां सम्पादितवान् । सुग्रीवस्य दुःखं ज्ञात्वा रामः तस्य शत्रुं वालिनं जघान तथा सुग्रीवं राज्ये प्रतिष्ठापितवान् । यस्य आज्ञया सीतायाः अन्वेषणाय हनूमत्प्रमुखाः

कपयः चतसृषु दिक्षु गताः। तं संसारभवभयहारिणं श्रीराममहं भजे। अत्र रामस्य मित्रवत्सलता, प्रतिज्ञापालनम्, भक्तपरायणता च विशेषतया दृश्यते।

**षष्ठः श्लोकः**

भावानुवादः – अयं श्लोकः सुन्दरकाण्डस्य सम्पूर्णं सारं सङ्क्षेपेण निरूपयति। श्रीहनुमान् यस्याज्ञया महोदधिमुल्लङ्घ्य लङ्कापुर्यां प्रविष्टः। तत्र अशोकवाटिकायां दुःखार्तां सीतां दृष्ट्वा रामस्य अभिज्ञानं दत्वा तया सह संवादं कृतवान्। ततः रावणस्य दर्पभङ्गार्थं लङ्कां सर्वतो दग्ध्वा पुनः श्रीरामस्य समीपमागतः। हनूमता समानीता सीतावार्ता श्रीरामस्य हृदयं परममुदा पूरितवती। अत एव यः तस्य अद्वितीयसेवाभक्तेः प्रशंसां कृत्वा स्नेहपूर्वकं समालिङ्गनं दत्तवान्। तं संसारभवभयहारिणं श्रीराममहं भजे। (रामायणे एतदालिङ्गनं भक्तेः परमपुरस्काररूपेण वर्ण्यते। धनं, राज्यं वा न दत्त्वा स्वयं भगवान् रामः स्वहृदयमेव हनूमते समर्पितवान्।)

**सप्तमः श्लोकः**

भावानुवादः – अत्र स्तोत्रकारः श्रीरामस्य चरितस्य अन्तिमं विजयोत्सवमयं युद्धकाण्डं सारभूतं वर्णयति। यः सुग्रीवप्रमुखैः कपिवीरैः सह समुद्रे सेतुं निर्माय लङ्कां प्राप्तवान्। ततः पुत्रबान्धवसहितं रावणं निहत्य सीतां पुनः प्राप्तवान्। सीतायाः पावनत्वस्य लोकप्रतीत्यर्थं अग्निपरीक्षा सम्पन्ना। तदनन्तरं श्रीरामः सीतया सह पुष्पकविमानेन अयोध्यां प्रत्यागतः। यस्य अयोध्यायामागतस्य वसिष्ठादिमुनिभिः राज्याभिषेकः कृतः। तं संसारभवभयहारिणं श्रीराममहं भजे। (तत एव रामराज्यस्य शुभारम्भः अभवत्। तादृशं भक्तजनानां मनोरथसिद्धिदायकं संसारदुःखनाशकं श्रीरामचन्द्रं कविः भक्त्या भजति।)

**अष्टमः श्लोकः**

भावानुवादः – अयं श्लोकः श्रीरामचरितस्य उत्तरकाण्डस्य प्रसङ्गान् सङ्क्षेपेण निरूपयति। यः लोकमर्यादारक्षणाय रजकस्य अपवादं श्रुत्वा (मर्यादावशात्) निष्पापां सीतां वनं प्रेषितवान् (तथापि तस्य हृदयस्थितं सीतायाः महत्त्वं कदापि न न्यूनमभवत्)। अनन्तरं धर्मसंस्थापनार्थम् अश्वमेधमहायज्ञं कृतवान्। वाल्मीकेराश्रमे संवर्धितौ सर्वगुणसम्पन्नौ कुशलवौ स्वपुत्रौ ज्ञात्वा तयोः राज्याभिषेकं कृत्वा राजधर्मस्य परममादर्शं प्रदर्शितवान्। ततः स्वस्य अवतारकार्यसमाप्तौ सरयूतीरे देहं परित्यज्य स्वकीयं दिव्यं वैकुण्ठं प्रति प्रस्थितवान्। तस्मिन् समये अयोध्यावासिनोऽपि रामभक्त्या प्रेरिताः तेन सह दिव्यलोकगमनं कृतवन्तः। तस्मै संसारतारकाय, संसारभवभयहराय रामाय नमः। (एतेन कारणेन भगवान् रामचन्द्रः भक्तानां सर्वकामप्रदः, संसारबन्धविनाशकश्च इति स्तोत्रकारः तं पुनः प्रणमति।)

**नवमः श्लोकः**

भावानुवादः– अस्मिन् श्लोके स्तोत्रकारः श्रीरामावतारस्य सम्पूर्णचरितं सङ्क्षेपेण दर्शयति। एकश्लोकी-रामायणस्य उत्तममुदाहरणमयं श्लोकः। यः सूर्यवंशे अवतीर्य पितुः दशरथस्य वचनपालनार्थं राज्यं परित्यज्य वनवासं स्वीकृतवान्। तत्र वालिनं निहत्य सुग्रीवेण साकं मैत्रीं कृतवान्। ततः हनुमद्द्वारा सीतायाः वृत्तान्तं ज्ञात्वा सपुत्रबान्धवं रावणं संहृत्य धर्मं संस्थापितवान्। अवतारकार्यसमाप्तौ पुनः स्वीयं परमधाम वैकुण्ठं प्रस्थितवान्। तस्मै संसारतारकाय रामाय नमः।

**दशमः श्लोकः**


ISSN : 2320-740X

भावानुवादः – अयं श्लोकः स्तोत्रस्य फलश्रुतिरूपः अस्ति । कविः स्वकीयस्य श्रीरामलीलास्तवस्य माहात्म्यं प्रतिपादयति। एषः स्तवः श्रीरामायणस्य सप्तानां काण्डानां प्रमुखचरितानि सङ्क्षेपेण अन्तर्भावयति । यः श्रद्धाभक्तिपूर्वकं प्रतिदिनं प्रातःकाले वा प्रदोषकाले अस्य स्तोत्रस्य पाठं करोति, स धर्मार्थकाममोक्षात्मकं पुरुषार्थचतुष्टयं प्राप्नोति। तस्य जीवनं पुण्यमयं भवति। सः देवतुल्यः गुणसम्पन्नश्च भवति । एतस्मिन् विषये कश्चिदपि संशयो नास्तीति कविना दृढतया प्रतिपादितम् ।

**एकादशः श्लोकः**

भावानुवादः – पर्वणीकर इत्युपनाम्ना प्रसिद्धेन विदुषा नारायणेन विरचितम् इदं श्रीरामचरितस्तोत्रं भूतले सर्वत्र प्रसृत्य निरन्तरं यशः मान्यतां च प्राप्नोतु इति ।

## उपसंहारः

अत्र एवं प्रकारेण नारायणशर्मणा विरचितं श्रीरामचरितस्तोत्रं सम्पादितम् । स्तोत्रमिदं अन्येषु विलक्षणं दृश्यते । एकस्मिन्नेव स्तोत्रे सप्तश्लोकीरामायणम् एकश्लोकीरामायणञ्च समाविष्टमस्ति । रामभक्तानां कृते इयं कृतिः अत्यन्तं महत्त्वपूर्णं दृश्यते ।

## सन्दर्भग्रन्थसूची


१. श्रीरामचरितस्तोत्रम्, मातृकासङ्ख्या १६११८०, Vrindavan Research Institute, Vrindavan.

२. श्रीरामचरितस्तोत्रम्, मातृकासङ्ख्या १६११८४, Vrindavan Research Institute, Vrindavan.

३. श्रीवाल्मीकिरामायणम्, प्रथमः खण्डः, स्कन्दपुराणोक्तं श्रीवाल्मीकिरामायणमाहात्म्यम्, १.१९, गीताप्रेस, गोरखपुर, संवत् २०७१ ।

४. अमरकोशः (रामाश्रमी संस्कृतप्रकाशाख्य हिन्दीव्याख्ययाचोपेतः), सम्पा. – श्री पण्डितः हरगोविन्द-शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, वि. सं २०५३ ।

५. रामरक्षास्तोत्रम्, श्लो. १, गीताप्रेस, गोरखपुर ।

६. New Catalogues Catalogorum, Vol. no. 24, Ed. Dr. Siniruddha Dash, University of Madras, 2011.




# संस्कृतवाङ्मये पर्यावरणविज्ञानम्

डा मनीष शर्मा
सहायकाचार्य :, भाषाशिक्षाविभाग :
राष्ट्रिय-शैक्षणिक-अनुसंधान एवं प्रशिक्षण-परिषद्,
नवदेलही

***लेखसारः*** *– प्रस्तुते शोधलेखे संस्कृतवाङ्मये निहितस्य पर्यावरणविज्ञानस्य समालोचनात्मकमध्ययनं कृतम् । भारतीयसंस्कृतेः मूलाधारभूतेषु वेदेषु पर्यावरणसंरक्षणसम्बद्धानां विचाराणां विस्तृतं निरूपणं दृश्यते । वैदिकवाङ्मये पृथिवी, जलम्, वायुः, अन्तरिक्षम्, ओषधयः, वनस्पतयः च जीवनस्य आधारतत्त्वरूपेण प्रतिपादिताः सन्ति । लेखे पाणिनीयव्याकरणे तथा महाभाष्ये वर्णितानां वृक्ष-वनस्पतीनां स्वरूपं, वर्गीकरणं तथा तेषां पर्यावरणीयमहत्त्वं विवेचितम् । ऋग्वेद, अथर्ववेद तथा यजुर्वेदेषु उपलब्धानां मन्त्राणां माध्यमेन प्रकृतिपूजा, पर्यावरणसंरक्षणम्, जैवसन्तुलनम् तथा प्रदूषणनिवारणस्य भावनाः प्रकाश्यन्ते । अध्ययनादिदं स्पष्टं भवति यत् प्राचीनभारतीयमनीषिभिः पर्यावरणस्य संरक्षणं मानवजीवनस्य अनिवार्यकर्तव्यरूपेण स्वीकृतम् आसीत् । अतः संस्कृतवाङ्मये निहिताः पर्यावरणसम्बद्धाः सिद्धान्ताः अद्यतनपर्यावरणसंकटस्य समाधानाय अपि मार्गदर्शकाः सन्ति ।*

***कूटशब्दाः*** *– संस्कृतवाङ्मयम्, पर्यावरणविज्ञानम्, वेदाः, पर्यावरणसंरक्षणम्, वनस्पतयः, ओषधयः, पृथिवी, वायुः, जैवसन्तुलनम्, वैदिकदृष्टिः ।*

भारतीयहिन्दूधर्मस्य सभ्यतायाः संस्कृतेश्च मुख्याधारशिला वेदाश्रिता वर्तते । भारतीयपरम्परामनुश्रित्य वेदः अपौरुषेयः वर्तते । वेदः संस्कृतवाङ्मयस्य मूलभूतात्मा वर्तते । भारतीयसंस्कृतेः देदीप्यमानं स्वरूपं वर्तते । यत्र भारतीयाचार-विचार-धर्म-दर्शन-सामाजिक-राजनैतिकजीवन-ज्ञान-विज्ञानसम्बन्धीनि तथ्यानि वर्तन्ते । अतः मनुना कथितं यत् - **सर्वज्ञानमयो हि सः** । अत्र नैकानि वैज्ञानिकतत्त्वानि भिन्न-भिन्नस्थलेषु प्राप्यन्ते यत्र वैज्ञानिकतत्त्वेषु पर्यावरणविज्ञानक्षेत्रेऽपि विविधानि तथ्यानि दरीदृश्यन्ते ।

**वैदिकसाहित्ये तथा व्याकरणशास्त्रे पर्यावरणम् -**

वेदाः संस्कृतवाङ्मयस्य प्राचीनतमाः ग्रन्थरत्नाः सन्ति, ऋषिभिः प्रत्यक्षीभूताज्ञानराशिरेव वेदः नित्येव प्रामाणिकं वर्तते यत्र साक्षादृषिभिः मन्त्राः द्रष्टाः- "**ऋषयोमन्त्रद्रष्टारः**" इति । यत्र भारतीयमनीषिभिः संस्कृतवाङ्मयस्य सर्वोत्त्कृष्टकृतिः वेदःवर्तते । मानवसमाजे लौकिकजीवनस्य सर्वेषां विषयाणां वेदेनसहसम्बन्धः दरीदृश्यते, यथा पर्यावरणं मानवसंरक्षणार्थं महत्त्वपूर्णं वर्तते, मानवस्य लौकिकजीवने पर्यावरणस्य विषये चिन्तनं, व्याख्यानं, बेबीनार, संगोष्टी, इत्यादयेषु आयोजनं अद्यावधिपर्यन्तं दरीदृश्यते । परन्तु वेदेष्वपि पर्यावरणरक्षणस्य विषये बृहच्चिन्तनं, मन्थनञ्च दृश्येते ।

तथैव व्याकरणशास्त्रेऽपि महर्षि पाणिनिना एकस्मिन् सूत्रे वनस्पतीनाम् औषधीनाञ्च भेदः पृथक् – पृथग् रूपेण स्वीकृतःकाशिकाकारेण औषधिस्वरूपे दुर्वावणम्, मूर्धावणम्, तथा वनस्पतिस्वरूपे शिरीषवणम्, बदरीवणम् चेत्यनयोरुदाहरणं प्रदत्तमासीत् ।

पाणिनिना "**पाककर्णपर्णपुष्पमूलफलवालोत्तरपदाच्च**" [१]। सूत्रे प्रायः वृक्षाणां सर्वेषामङ्गानां

***सम्पर्कसूत्रम्** - 8922041232, Email- manishsharmavkya@gmail.com

[१]अष्टाध्यायी- 4.1.64 ।

परिगणना कृता । एवमेव पतञ्जलिकाले वृक्ष-पादप-पुष्प सदृशानां वनस्पतीनां विविधाप्रकारेण उल्लेखः प्राप्यते ।

**वृक्षभेदः**- भाष्यकारेण वृक्षाणां स्वरूपगुणाधारेण विभागद्वयं कृतम्- . क्षीरीवृक्ष, . कण्टकी च[१]। **क्षीरीवृक्षः**- येषु वृक्षेषु क्षीरं निर्गच्छति तद्वृक्षः क्षीरीवृक्षो भवति । यथा- नीरग्रोध-प्लक्ष-सप्तपर्ण-पिप्पलादयः ।

**न्यग्रोध** अयं वटवृक्षस्यापरं नाम वर्तते, न्यग्रोध क्षीरीवृक्षेषु समागतो वर्तते, एतस्य मूलं भूमेः अधः प्रसरति, जटाश्च निम्नगाः भवन्ति, अतः एतस्य नाम न्यग्रोधः अभवत्[२], एषः अवरोहवान्, क्षीरी, पृथुपर्ण कथ्यते[३] ।

**प्लक्षः**- अयमपि न्यग्रोधवृक्षवत्क्षीरीवृक्षः वर्तते तथा प्रवृत्तिरपि न्यग्रोधवद् अधं प्रति प्रसरति । भाष्ये प्रायः प्लक्षः न्यग्रोधयोः वृक्षयोः समानरूपेण वर्णनं वर्तते । एकस्मिन् स्थले प्लक्षशब्दस्य व्युत्पत्तिसमये कथितं यत् यदि दुग्धक्षरणकारणात्

प्लक्षनामकरणमभवत् तर्हि न्योग्रोधवृक्षस्य कृतेऽपि "प्लक्षः" कथनीयः यतोहि दुग्धागमनं न्यग्रोवृक्षादपि भवति[४] ।

**सप्तपर्णः**-सप्तपर्णस्तवकयुक्तोऽयं वृक्षः विशिष्टो भवति [५]। अयं क्षीरीवृक्षो वर्तते ।

**पिप्पलः** वृक्षोऽयं प्लक्ष-न्यग्रोधवर्गस्य क्षीरीवृक्षः वर्तते एतस्य वर्णनं भाष्यकारेण कृतम्[६] ।

**पनसम्** – पनसस्य विषये भाष्यकारः सुपरिचितः आसीत् एकस्मिन् स्थाने पनसस्य पाचनस्य विषये चर्चा कृतास्ति ।[७]

**कण्टकवृक्षाः**- **खादिरः**- महाभाष्ये एतस्य वृक्षस्य वर्णनं प्रायः प्लक्षन्यग्रोधाभ्यं सह वर्तते[८]। अस्मिन् वृक्षे कण्टनाः भवन्ति[९]। एतस्य कष्टमत्यधिकं कटुः भवति, अनेन वृक्षेण खैरस्य निर्माणं भवति, यस्योपयोगः ताम्बूलनिर्माणे भवति । एतस्य नाम खादिरसारः अपि वर्तते[१०], यज्ञस्तम्भनिर्माणे यज्ञयूपनिर्माणे च एतस्य काष्टम् उपयुज्यते । **पलाश** धार्मिककार्ये पलाशवृक्षस्य काष्टपर्णादिवस्तूनि उपयुज्यन्ते । यज्ञे पलाशस्य समिधाः प्रयुज्यन्ते । भाष्ये प्लक्षन्यग्रोधवृक्षाभ्यां सह पलाशस्य उल्लेखः नैकेषु स्थलेषु अभवत्[११] ।

तस्मिन् कालेब्रह्मचारी दण्डस्य कृते प्रयोगं कुर्वन्ति स्म । पलाशवृक्षस्य पर्णछेत्तुं पलाशशातनः इति नाम्नः यन्त्रमासीत्[१२], पलाशपुष्पमत्यधिकं रक्तं भवति, येन प्रतीयते यत् स्त्रष्टा स्वीयहस्तः

[१]महाभाष्यम्- 5.2.94 ।
[२]महाभाष्यम्- 2.2.29 ।
[३]महाभाष्यम्- 1.1.56 ।
[४]महाभाष्यम्- 2.2.29 ।
[५]महाभाष्यम् 8.1.1 ।
[६]महाभाष्यम्- पस्पशाह्निकम् ।
[७]महाभाष्यम् 5.1.2
[८]महाभाष्यम्- 2.1.1 ।
[९]महाभाष्यम्- 1.1.46 ।
[१०]महाभाष्यम्- 3.3.17 ।
[११]महाभाष्यम्- 2.1.1 ।
[१२]महाभाष्यम्- 2.2.8 ।

**पर्यावरणशब्दस्य व्युत्पत्तिः स्वरूपञ्च –**

परि + आङ् उपसर्गपूर्वकं+ वृञ् वरणे धातौः ल्युट् प्रत्यये सति पर्यावरणशब्दः निष्पन्नो भवति । अस्य अभिप्रायो भवति मानवं परितः आच्छादितवातावरणमेव पर्यावरणम् । वातावरणं तु पर्यावरणस्य समानार्थकशब्दः वर्तते परन्तु अत्र पर्यावरणशब्दस्य व्यापाकोऽर्थः वर्तते। अस्यान्तर्गते पृथिवी, जलं, ऊर्जा, वायुः, नभः, जलवायुः, ऋतुः, वनस्पतिः, पशु-पक्षी, जीव-जन्त्वादि समाहिताः सन्ति । इत्थं प्रकारेण मानवजीवनं परितः आच्छादितःप्राकृतिकपरिवेशरेव पर्यावरणं वर्तते । पर्यावरणे वायु-स्थल-जलमडण्लानां सर्वाणि भौतिकं रासायनिकं च तत्त्वानि सम्मिलितानि भवन्ति ।पर्यावरणमिदं भौतिक-रासायनिक-तत्त्वाभ्यां सम्मिल्य निर्मितो वर्तते ।जैविकपर्यावरणे समस्तजीव-जगत्तथा सर्वाणि पादपाः वर्तन्ते । तथा भौतिकपर्यावरणे मृदा-जल-वायु-प्रकाश-तापानाञ्च सम्मेलनं भवति । अतः वक्तुं शक्नुमः यत्-'मानवस्य जीवनं विकासञ्च प्रभावितानि कारकाणि पर्यावरणान्तर्गते समाहितो वर्तते एवमेव मानवपर्यावरणयोः परस्परसम्बन्धस्य अध्ययनमेव पर्यावरणमिति ।

पर्यावरणस्याभिप्रायो वर्तते यत्- प्रकृतिप्रदत्तैः समस्तभौतिकसामाजिकवातावरणैः सह जैविकस्थि-तिरिति । वेदेषु ऋग्वेदे प्रकृत्योपसनायाः विश्ववाङ्मयस्य आदिम ग्रन्थो वर्तते ।

एवञ्च पर्यावरणस्य गहनाध्ययनं गाम्भीर्यचिन्तनम्, तथा सजीवरूपेण संरक्षणस्यापि प्रथमः ग्रन्थो वर्तते ।

ऋषिभिः निगदितं यत्-

**यददो वात ते गृहे अमृतस्य निधिर्हितः ।**
**ततो नो देहि जीवसे । नू चिन्नु वायोरमृतं वि दस्येत् ॥**[१]

अर्थात् हे वायोः ! त्वं पार्श्वे जीवनदायिनी अमृतस्वरूपा निधिः वर्तते, त्वमेव जीवनशक्तिरसि । त्वमेव सर्वरोगाणामौषधिः । वायोः अमृततत्त्वं न दस्येत् । अभिप्रायः इत्थं वर्तते यत् कदापि एतादृशं कार्यं न कुर्याद् येन वायौ विद्यमानं अमृततत्त्वस्य प्राणवायुः न्यूनता भवेत् । तथैव-

**येभ्यो माता मधुमत् पिन्वते पयः । पीयूषं द्यौः ।**[२]

अर्थात् पृथिवीमाता अस्मभ्यं मधुरं दुग्धं, अन्नं , जलञ्च ददाति । द्युलोकः अमृतं प्रददाति यस्मिन् सूर्योर्जा तथा मेघात् जलं भवति । एवमेव अथर्ववेदे उक्तम् -

**मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवन्त्वन्तरिक्षम् ॥**[३]

अर्थात् द्युलोकः, अन्तरिक्षः, औषधिः, तथा जलं तत्त्वानि अस्मभ्यं मधुरतां प्रदद्युः । एतानि तत्त्वानि प्रदूषणमुक्तवातावरणनिर्माणाय साहाय्यमाचरेत् ।

वेदेषु नैकाः मन्त्राः सन्ति ये पर्यावरणरक्षणार्थं महत्त्वपूर्णं योगदानं ददाति । अथर्वेदे निगदितं वर्तते-

**"माता भूमिः पुत्रोऽहं पृथिव्या"** [४]।

[१]ऋग्वेद 3/36/3
[२]ऋग्वेद 10/63/3
[३]अथर्ववेद 20/143/8
[४]अथर्ववेद 12/1/12

 ISSN : 2320-740X

तत्रैव-

इतोऽपि अथर्वेदे कथितम्

**"भूमिर्माता, भ्रान्तरिक्षम्, द्यौर्नः पिता"[१] ।**

यथा मातृ-पित्रोः सेवाकरणं, तयोः कष्टनिवारणं, तयोः रक्षणम् अस्माकं कर्तव्यं भवति तथैव प्रकृतेः रक्षणम् अस्माकं कर्तव्यं भवेत् । तद्यथा-

**"भूमिर्माता, भ्रान्तरिक्षम्, द्यौर्नः पिता"[२] । भूमिष्ट्वा पातु हरितेन विश्वभृद्**
**अग्निः पिपर्तु अयसा सजोषाः ।**
**वीरुद्भिष्टे अर्जुनं संविदानं दक्षं दधातु सुमनस्यमानम्[३] ॥**

उपर्युक्ताथर्वेदीयमन्त्रे द्योः भुवश्च उपयोगितायाः वर्णनमस्ति यत्र भूमेःअमूल्यसम्पदा अस्माभिः प्राप्यते । यथा अग्नेः लौहत्वं, वृक्षात् कल्याणकारीशक्तिरिति, इयं शक्तिरेव अस्माकं कृते प्राणवायुः (ऑक्सीजन) भवति ।

वेदेऽस्मिन् वायुमण्डलस्य शुद्ध्यर्थं द्यो-पृथिव्योः संरक्षणोपरि विशेषबलं दत्तमस्ति । द्यावापृथिव्योः मध्ये पोष्य-पोषकसम्बन्धो वर्तते । सूर्य : ऊर्जायाः स्रोतमस्ति,तथैवअन्तरिक्षं

वृष्टेः कारकम्, पृथ्वी तु ऊर्जावृष्ट्योः उपयोगेन धरायाम् अन्नादिनिर्माणं कृत्वा जीवनं सञ्चालयति । पारस्थितिकीतन्त्रे यदा केनचित् कारणेनकदाचिदसन्तुलनं भवति चेत् तदानीं महाप्रलयस्य प्रारम्भो भवति । पारस्थितिकीतन्त्रस्यअसन्तुलितवातावरणे प्रदूषणस्य मुख्यभूमिका भवति एतस्य निर्माणं मानवै : मानवविकासाय प्रकृतेः दोहनेन तथा असभ्यजीवनेन च कृतम् ।

**"द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षताम् अहंसो रिष :। मा दुर्विदत्रा निरृऋतिर्न ईशत ॥**
**द्यौः शान्तिः अन्तरिक्षं शान्ति :, पृथिवी शान्तिः । आपः शान्तिः, ओषधय : शान्ति : वनस्पतयः शान्तिः[४] ।**

उपर्युक्त-ऋग्वेदमन्त्रेण निर्दिष्टीयते यद् द्यौः भूश्च चेतनतत्त्वे वर्तेते, एते अस्माकं रक्षकाः, यदि पर्यावरणं प्रदूषितं भवति चेद् विनाशः,विपत्तिः, निर्ऋतिः (संकट) च उपस्थिताः भविष्यन्ति । अतः वयं द्युभूवोः रक्षां कुर्मः, येन वयमपि स्वमेव सुरक्षितां भवामः, यदि वयं प्रकृतये कष्टं दद्मः चेत् दुःखविपत्त्योः कारणं स्यामः । यजुर्वेदेऽपि निगदितं वर्तते यत्-

क. **द्यां मा लेखीः, अन्तरिक्षं मा हिंसीः, पृथिव्या संभव[५] ।**

ख. **अन्तरिक्षं दृंह, अन्तरिक्षं मा हिंसीः[६] ।**

ग. **दिवं दृंह, दिवं मा हिंसीः[७] ।**

---

[१]अथर्ववेद 6/120/2
[२]अथर्ववेद 6/120/2
[३]अथर्ववेद 5/28/5
[४]यजुर्वेद 36/17
[५]यजुर्वेद 5/43
[६]यजुर्वेद 14/12
[७]यजुर्वेद 15/65

घ. **उद् दिवं स्तभान, अन्तरिक्षं पृण**[१] ।

ङ. **दिवं जिन्व, अन्तरिक्षं जिन्व**[२] ॥

च. **पृथिवीं दृंह, पृथिवीं मा हिंसीः**[३]

पर्यावरणसंरक्षणस्य विषये यजुर्वेदकालीनजनारपि जागरुकाःआसन् । शतपथब्राह्मणेऽपि निगदितं वर्तते यत्- "**ओषधयो वै पशुपतिः**"अर्थात् ओषधयश्शिवस्य रूपमस्ति । यजुर्वेदस्य रुद्राध्याये शिवस्य सम्बोधनशब्दाःवर्तन्ते । तद्यथा- वृक्ष, वनस्पते, लते, गुल्म, कृषे, क्षेत्रस्वामिन् चेत्यादयः ।

## सन्दर्भग्रन्थसूची

महाभाष्यम्, पाणिनि-अष्टाध्यायी, यजुर्वेदः, अथर्वेदः



[१]यजुर्वेद 5/27
[२]यजुर्वेद 15/6
[३]यजुर्वेद 13/18


ISSN : 2320-740X

# हिन्दी

# संस्कृत वाङ्मय में भारतीय ज्ञान-परम्परा का सांस्कृतिक स्वरूप

डॉ. देवेन्द्र सिंह राजपूत
सहायकाचार्य, हरियाणा कें.वि.वि.,
महेंद्रगढ़

श्री बलराम*
शोधार्थी, हरियाणा कें.वि.वि.,
महेंद्रगढ़

***शोध सारांश*** *– आदिकाल से ही मनुष्य का स्वभाव रहा है कि वह किसी न किसी संस्कृति में रहना पसंद करता है । वह जिस भू-भाग पर निवास करता है, उसके प्रत्येक कण तथा विभिन्न आयामों के प्रति उसका प्रेम और अनुराग स्वभावतः रहता है । देश के प्रति अपनेपन, राष्ट्रभक्ति और राष्ट्रप्रेम की यही भावना आज के समय में सांस्कृतिक एकसूत्रता के रूप में जानी जाती है । जिन प्राकृतिक संसाधनों द्वारा उसके जीवन मूल्यों से निर्मित आवश्यकताएँ पूर्ण होती हैं तथा जिस जन-समुदाय में उसकी सांस्कृतिक एकता के सरोकार जुडे होते हैं, उन सभी के प्रति उसकी भावनाएँ जन्म से ही संबद्ध रहती हैं । भारतीय संस्कृति समूचे राष्ट्र को एकसूत्रता में बाँधती है । इसमें भारतीय भौगोलिक खंड, मौसम, ऋतुएँ, सभ्यताएँ, वेश-भूषा, भोजन, रंग-रूप, भाषाएँ आदि सभी विविधताओं के बाद भी एकरूपता दिखाई देती है । प्रस्तुत शोधपत्र का उद्देश्य भारत की विविधता में एकता स्थापित करने वाले दार्शनिक, मानवीय, सामाजिक तथा राजनीतिक मूल्यों का विवेचन करते हुए उसकी मूल सांस्कृतिक एकता का विस्तारपूर्वक विवरण प्रस्तुत करना है । प्राचीन भारतीय जीवन-शैली तथा उससे समन्वित चिंतन-परम्परा से निसृत भारत के दर्शन, धर्म और आध्यात्म का संपूर्ण देश में समान रूप से विकास हुआ । इसी कारण हम देखते हैं कि भारतीयों के जीवन से जुडे मूल्य-जैसे संस्कार, आश्रम, पुरुषार्थ आदि- समस्त भारत में समान रूप से परिपालित होते रहे हैं । भारत की सांस्कृतिक चेतना ही एकमात्र ऐसा तत्त्व रहा है जिसने सम्पूर्ण भारतवर्ष को एकसूत्रता में पिरोए रखा है । भारतीय सभ्यता विश्व की प्राचीनतम सभ्यताओं में से एक है, जिसकी विशेषता उसकी सांस्कृतिक एकसूत्रता है । भौगोलिक, भाषाई, धार्मिक और सामाजिक विविधताओं के बावजूद भारत की सांस्कृतिक चेतना एक अखंड धारा के रूप में प्रवाहित होती रही है । भारतीय ज्ञान-परम्परा जिसमें वेद, उपनिषद, पुराण, रामायण, महाभारत, दर्शन, स्मृतियाँ तथा लोक-परम्पराएँ सम्मिलित हैं एवं एकसूत्रता को स्थापित और पोषित किया है । इस शोधपत्र में भारतीय ज्ञान-परम्परा में निहित सांस्कृतिक एकसूत्रता के स्वरूप, उसके आधार तथा उसके सामाजिक-राष्ट्रीय महत्व का विवेचन किया गया है ।*

***कूटशब्द*** *– संस्कृत वाङ्मय, परम्परा, अखंडता, एकता, एकसूत्रता, राष्ट्रीयता, संस्कृति आदि ।*

## भूमिका

**"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।**
**वर्षं तद्भारतं नाम भारती यत्र सन्तति : ॥"**[1]

***सम्पर्कसूत्रम्** - 9355855540, Email- balramsiwan58@gmail.com

[1] विल्सन, एच. एच. ; श्रीधरस्वामीटीकासहित, विष्णु पुराण ; गीता प्रेस, गोरखपुर ; द्वितीय अंश ; तृतीय अध्याय ; प्रथम श्लोक ; संस्करण 2019 ; पृष्ठ सं. 72-73.

समुद्र के उत्तर और हिमालय पर्वत के दक्षिण में जो देश उसका नाम भारत है जहां (निवास करने वाली) संतति भारती कहलाती है । भारतीय संस्कृति के इतिहास में सिंधु नदी की अविस्मरणीय भूमिका रही है । पहले सप्तसिंधु, फिर 'सिंधु स्थान' और अब 'हिंदू स्थान' सब में ही 'सिंधु' के नाम की केन्द्रस्थानी भूमिका है । अतः भारतीय संस्कृति एक विशुद्ध भू-सांस्कृतिक अवधारणा की परिचायक है । राष्ट्रीयता का मूलाश्रय तो सदा से संस्कृति ही रहा है । इस प्रकार हर भारतीय नागरिक सांस्कृतिक रूप में एक 'हिंदू' है । संस्कृति के अर्थ को भली भांति समझने के लिए इसका 'सभ्यता' से विभेद करना वांछनीय होगा ।विद्वानों ने सभ्यता की विभिन्न अवधारणाओं का उल्लेख किया है । ऐसा विचार किया जाता है कि सभ्यता का आरंभ उस समय हुआ, जब लेखन एवं धातु का आविष्कार हुआ । क्योंकि इतिहास का आरंभ लेखन के साथ हुआ, अतएव सभ्यता का आरंभ भी उसी प्रकार हुआ । सभ्यता को संस्कृत का समानार्थक माना गया है तथा इस शब्द का प्रयोग शिक्षित लोगों के लिए किया गया है । सांस्कृतिक पर्व हो या कोई लोक पर्व – मेला, व्रत, त्योहार सभी में संस्कृति के संस्कार प्रतिबिम्बित होते हैं । ये पर्व त्योहार ही किसी देश-विदेश की संस्कृति के प्रतीक होते हैं क्योंकि इन्हीं के माध्यम से उस देश विशेष की संस्कृति की विशेषताएँ, आचार-विचार, रहन-सहन, जीवन के प्रति दृष्टिकोण, सामाजिक अंतर-संबंधों की गरिमा ही नहीं अपितु प्रकृति एवं पर्यावरण के प्रति गहरी आस्था एवं संवेदनशीलता भी परिलक्षित होती है । भारतीयों के लिए पर्व, उत्सव एवं त्यौहार उनके जीवन में नवीन हर्षोल्लास लाने के साथ-साथ उन्हें सुमार्ग पर चलने के लिए प्रेरित करने वाले सिद्ध हुए हैं । भारत एक बहुधर्मी एवं बहुभाषी देश है जहाँ पर सभी धर्मों को मानने वाले लोग निवास करते हैं तथा सौहार्द्र का वातावरण बनाने का प्रयास करते हैं । सभी धर्मों के अपने-अपने रीति-रिवाज, रस्म व त्यौहार होते हैं जिन्हें सभी धर्मों के लोग मिलकर हर्षोल्लास के साथ मनाते हैं । ये पर्व और त्यौहार समाज को जीवन्तता प्रदान करते हैं तथा विविधता में एकता का भाव उत्पन्न करते हैं । परिवारों एवं सामाजिक संस्थाओं में इन त्यौहारों को उत्साहपूर्वक मनाया जाता है । इनको मनाने के पीछे दृष्टि यही है कि समाज के लोग पर्व एवं त्यौहार के माध्यम से हमारी सभ्यता एवं संस्कृति को समझकर देश की भावनात्मक एवं राष्ट्रीय एकता को सुदृढ़ बनाने में अपनी सकारात्मक भूमिका का निर्वहन कर सकें । हिन्दू धर्म में पर्व और धार्मिक त्यौहार का इतना बाहुल्य है कि उनके लिये जनता में 'सात बार और नौ त्यौहार' की कहावत प्रचलित हो गई है । यदि खोज और विचार करके देखा जाए तो वास्तव में प्रत्येक तिथि और वार को पर्व माना गया है और उसे मनाने के लिये विशेष धार्मिक विधान भी बतलाया गया है । इनके सिवाय देवताओं, अवतारों, महापुरुषों की स्मृति अथवा जयन्ती के लिये भी त्योहार नियत किये गये हैं । कुछ अन्य पर्व जैसे संक्रान्ति, ग्रहण, कुम्भ आदि आकाश स्थित ग्रहों के योग और उनसे पृथ्वी पर पड़ने वाले प्रभाव को ध्यान में रखकर मनाये जाते हैं । धर्म और आध्यात्मिकता के भावों की वृद्धि के साथ ही धार्मिक और सामाजिक त्यौहारों का एक बड़ा उद्देश्य सामूहिकता की वृद्धि करना भी है । जो त्यौहार या उत्सव किसी प्राचीन महापुरुष या अवतार की जयन्ती के रूप में मनाये जाते हैं उनका एक बहुत बड़ा लाभ यह होता है कि जनता को उनके द्वारा सच्चरित्रता, नैतिकता, सेवा, सद्भावना आदि की शिक्षा मिलती है । भारतीय सांस्कृतिक एकता को प्रकट करने वाले अनेकों उत्सव प्रेम और बन्धुत्व के प्रतीक


ISSN : 2320-740X

रहते हैं। सम्पूर्ण भारत इन उत्सवों में एकसूत्रता में बंधा रहता है।

### भारतीय उत्सव

